TRIVANDRUM SANSKRIT SERIES

No. LXV.

THE

MAYAMATA

OF

MAYAMUNI

EDITED BY

MAHÂMAHOPÂḌHYÂYA

T. GAṆAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

1919.

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ६५.

श्रीमयमुनिविरचितं

मयमतं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

महामहोपाध्यायेन

त. गणपतिशास्त्रिणा

संशोधितम् ।

तच्च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः १०९४, कैस्ताब्दाः १९१

PREFACE.

Mayamata ascribed to the Muni Maya is an important and comprehensive treatise on architecture. It is copiously quoted as authority by subsequent writers on architecture and appears to be the oldest among the extant treatises on the subject. An old Tamil translation of this work is also in our possession which we hope to publish ere long as a second part of this volume. This edition contains 34 chapters, but from the list of contents given in the first chapter, it is certain that the work must have at least four more chapters at the end. A manuscript of two chapters among them has however been acquired by us, but as it is found hopelessly wrong, these chapters are not allowed to go into this edition.

The following manuscripts were consulted for preparing this edition:—

1. Belonging to the Palace Library containing a Tamil translation. It is in Malayalam characters on palm-leaves. There are thirty-four chapters in this manuscript but five chapters from 28th are wanting in it.
2. Obtained from Mr. Kesavan Krishnan of Njarakkal. It is in Malayalam characters on palm-leaves and runs up to the end of the 13th chapter.
3. Lent by late Mr. T A. Gopinatha Roa M. A., Superintendent of Archæology, Travancore. It runs up to a portion of 26th chapter and its variants are shown in the Appendix.
4. A transcript of five chapters from 28th, from a manuscript belonging to the Government Oriental Manuscripts Library, Madras, obtained with the kind help of the Curator.

Trivandrum,
17th June 1919.

T. GAṆAPATI SÂSTRÎ.

निवेदना ।

मयनाम्ना मुनिना विरचितमिदं मयमतं नाम प्रसिद्धं शिल्पशास्त्रं शिल्पसम्बद्धान् बहुरूपान् विषयान् वितत्य प्रतिपादयति । अर्वाचीनैः शिल्पनिबन्धनकृद्भिः प्रमाणतयानुसंहितत्वादिदमुपलभ्यमानेषु शिल्पग्रन्थेषु स्थविरमित्यवसातुं शक्यम । अस्य द्रमिलभाषानुवादोऽपि कश्चित् प्राचीनोऽस्मत्सकाशेऽस्ति, यमचिरादस्य द्वितीयभागात्मना प्रकाशयितुमभिलषामः । अत्राध्यायाश्चतुस्त्रिंशत् प्रकाशिताः, तदुपर्यपि चतुर्भिरध्यायैः शेषैर्भाव्यमिति प्रथमाध्यायदत्तविषयानुक्रमपर्यालोचनया प्रतीयते । सम्पादितौ च तत्रादिमौ द्वावध्यायौ, किन्तु परमाशुद्धत्वादत्र तौ न योजितौ ।

अस्य ग्रन्थस्य संशोधनायोपात्ता आदर्शग्रन्थास्तावदिमे —

१. राजकीयग्रन्थशालीयो द्रमिलभाषानुवादसनाथः केरलीयलिपिस्तालपत्रात्मकः ३४ तमाध्यायान्तः, अष्टाविंशतितमादिद्वात्रिंशान्ताध्यायविकलः क.संज्ञः.

२. आरकल्-केशवकृष्णसम्बन्धी तालपत्रात्मकः केरललिपिस्त्रयोदशाध्यायान्तः ख.संज्ञः.

३. ग.संज्ञस्तु पुरातनवस्तुविचारकार्यालयाध्यक्षगोपीनाथरायमहाशयसम्बन्धी षड्विंशाध्यायैकदेशान्तः, यद्गताः पाठभेदाः परिशिष्टतया एतत्पुस्तकस्यान्ते निवेशिताः.

४. चेन्नपुरस्थराजकीयग्रन्थशालीयादादर्शात् तदध्यक्षसाह्येन प्रतिरूप्यानायितोऽष्टाविंशतितमादिद्वात्रिंशान्ताध्यायपञ्चकात्मको घ.संज्ञः.

अनन्तशयनम्,
३-११-१०९४.

त. गणपतिशास्त्री.

विषयानुक्रमणी ।

॥ श्रीः ॥

मयमतं

नाम वस्तुशास्त्रं

श्रीमयमुनिविरचितम् ।

प्रणम्य शिरसा देवं सर्वज्ञं जगदीश्वरम् ।
तं पृष्ट्वास्मादलं श्रुत्वा शास्ति शास्त्रं यथाक्रमम् ॥ १ ॥
तैतिलानां मनुष्याणां वस्त्वादीनां सुखोदयम् ।
प्राज्ञो मुनिर्मयः कर्ता सर्वेषां वस्तुलक्षणम् ॥ २ ॥
आदौ वस्तुप्रकारं च भूपरीक्षापरिग्रहम् ।
मानोपकरणं चैव शङ्कुस्थापनमार्गकम् ॥ ३ ॥
सपदं स्वरविन्यासं बलिकर्मविधिं तथा ।
ग्रामादीनां च विन्यासं लक्षणं नगरादिषु ॥ ४ ॥
भूलम्बस्य विधानं च गर्भविन्यासलक्षणम् ।
उपपीठविधिं चैवाधिष्ठानानां तु लक्षणम् ॥ ५ ॥
स्तम्भानां लक्षणं चैव प्रस्तारस्य विधिक्रमम् ।
सन्धिकर्मविधानं च शिखराणां तु लक्षणम् ॥ ६ ॥

---

१. 'स्त' ख. पाठः.

G.P.T. 3192. 500 2-11-1922. B

एकभूमिविधानं च द्वितलस्य तु लक्षणम् ।
त्रितलस्य विधानं च चतुर्भूम्यादिलक्षणम् ॥ ७ ॥
ससारं परिवाराणां गोपुराणां तु लक्षणम् ।
मण्डपादिविधिं चैव शालानां चैव लक्षणम् ॥ ८ ॥
गृहविन्यासमार्गं च गृहवेशनमेव च ।
राजवेश्मविधानं च द्वारविन्यासलक्षणम् ॥ ९ ॥
यानानां शयनाना च लक्षणं लिङ्गलक्षणम् ।
पीठस्य लक्षणं सम्यगनुकर्मविधिं तथा ॥ १० ॥
प्रतिमालक्षणं देवदेवीनां मानलक्षणम् ।
चक्षुरुन्मीलनं चैव संक्षिप्योह यथाक्रमम् ॥ ११ ॥

पितामहाद्यैरमरैर्मुनीश्वरै-
र्यथा यथोक्तं सकलं मयेन तत् ।
तथा तथोक्तं सुधियां दिवौकसां
नृणां च युक्त्याखिलवस्तुलक्षणम् ॥ १२ ॥

इति मयमते वस्तुशास्त्रे सङ्ग्रहाध्यायः
प्रथमः ।

अथ द्वितीयोऽध्यायः ।

अमर्त्याश्चैव मर्त्याश्च यत्र यत्र वसन्ति हि ।
तद् वस्त्विति मतं तज्ज्ञैस्तद्भेदं च वदाम्यहम् ॥ १ ॥

---

१. 'ज्यैव य' ख. पाठः. २. 'वा' क. पाठः.

भूमिप्रासादयानानि शयनं च चतुर्विधम् ।
भूरेव [1]मुख्यवस्तु स्यात् तत्र जातानि यानि हि ॥२॥

प्रासादादीनि वास्तूनि वस्तुत्वा[2]द् [3]वस्तुसंश्रयात् ।
वस्तून्येव हि तान्येव प्रोक्तान्यस्मिन् पुरातनैः ॥ ३ ॥

वर्णगन्धरसाकारदिक्शब्दस्पर्शनैरपि ।
परीक्ष्यैवं यथायोग्यं गृहीता[4]वधिनिश्रिता ॥ ४ ॥

या सा भूमिरिति ख्याता व[5]र्णानां च विशेषतः ।
द्विविधं तत् समुद्दिष्टं गौणमङ्गीत्यनुक्रमात् ॥ ५ ॥

ग्रामादीन्येव गौणानि भवन्त्यङ्गी मही मता ।
सभा शाला प्रपा रङ्गमण्डपं मन्दिरं तथा ॥ ६ ॥

प्रासाद इति विख्यातं शिविकागिल्लिकारथम् ।
स्यन्दनं चैवमानीकं यानमित्युच्यते बुधैः ॥ ७ ॥

[6]मञ्चमञ्चिलिका काष्ठं पञ्जरं फलकासनम् ।
पर्यङ्कं बालपर्यङ्कं शयनं चैवमादिकम् ॥ ८ ॥

चतुर्णामधिकाराणां भूरेवा[7]दौ प्रवक्ष्यते ।
भूतानामादिभूतत्वादाधारत्वाज्जगत्स्थितेः ॥ ९ ॥

चतुरश्रं द्विजातीनां वस्तु श्वेतमनिन्दितम् ।
उदुम्बरद्रुमोपेतमुत्तरप्रवणं वरम् ॥ १० ॥

---

१. 'सर्वाधारा स्या' क. पाठः. २. 'म' ख. ग. पाठः. ३. 'य', ४. 'ये' ख. पाठः. ५. 'र्णा' ग. पाठः. ६. 'खट्टिका' क. ग. पाठः. ७. 'व' क. पाठः.

कषायमधुरं सम्यक् कथितं तत् सुखप्रदम् ।
व्यासाष्टांशाधिकायामं रक्तं तिक्तरसान्वितम् ॥ ११ ॥
प्राङ्निम्नं तत् प्रविस्तीर्णमश्वत्थद्रुमसंयुतम् ।
प्रशस्तं भूभृतां वस्तु सर्वसंपत्करं सदा ॥ १२ ॥
षडंशेनाधिकायामं पीतमम्लरसान्वितम् ।
प्लक्षद्रुमयुतं पूर्वावनतं शुभदं विशाम् ॥ १३ ॥
चतुरंशाधिकायामं वस्तु प्राक्प्रवणान्वितम् ।
कृष्णं तत् कटुकरसं न्यग्रोधद्रुमसंयुतम् ॥ १४ ॥
प्रशस्तं शूद्रजातीनां धनधान्यसमृद्धिदम् ।

एवं प्रोक्तो वस्तुभेदो द्विजानां
भूपानां वै वैश्यकानां परेषाम् ।
योग्यं सर्वं भूसुराणां सुराणां
भूपानां तच्छेषयोरुक्तनीत्या ॥ १५¹ ॥

इति मयमते वस्तुशास्त्रे वस्तुप्रकारो नाम
द्वितीयोऽध्यायः ॥

अथ तृतीयोऽध्यायः ।

देवानां तु द्विजातीनां चतुरश्रायताः श्रुताः ।
वस्त्वाकृतिरनिन्द्या सावाकप्रत्यग्दिक्समुन्नता ॥ १ ॥
हयेभवेणुवीणाब्धिदुन्दुभिध्वानिसंयुता ।
पुन्नागजातिपुष्पाब्जधान्यपाटलगन्धकैः ॥ २ ॥

---

१. 'च' ख. पाठः.

पशुगन्धसमा श्रेष्ठा सर्वबीजप्ररोहिणी ।
एकवर्णा घना स्निग्धा सुखसंस्पर्शनान्विता ॥ ३ ॥
बिल्वो निम्बश्च निर्गुण्डी पिण्डितः सप्तपर्णकः ।
सहकारश्च षड्वृक्षैरारूढा या समस्थला ॥ ४ ॥
श्वेता रक्ता च पीता च कृष्णा कापोतसन्निभा ।
तिक्ता च कटुका चैव कषायलवणाम्लका ॥ ५ ॥
मधुरा षड्रसोपेता सर्वसम्पत्करी धरा ।
प्रदक्षिणोदकवती वर्णगन्धरसैः शुभा ॥ ६ ॥
पुरुषाञ्जलिमात्रे तु दृष्टतोया मनोरमा ।
निष्कपाला निरुपला कृमिवल्मीकवर्जिता ॥ ७ ॥
अस्थिवर्ज्या नसुषिरा तनुवालुकसंयुता ।
अङ्गारैर्वृक्षमूलैश्च शूलैश्चापि पृथग्विधैः ॥ ८ ॥
पङ्कसङ्करकूपैश्च दारुभिर्लोष्टकैरपि ।
शर्कराभिरयुक्ता या भस्माद्यैस्तु तुषैरपि ॥ ९ ॥
सा शुभा सर्ववर्णानां सर्वसम्पत्करी धरा ।
दध्याज्यमधुगन्धा च तैलासृग्गन्धिका च या ॥ १० ॥
शवमीनपक्षिगन्धा (या?) सा धरा निन्दिता वरैः ।
सभाचैत्यसमीपस्था नृपमन्दिरसंश्रिता ॥ ११ ॥
देवालयसमीपस्था कण्टकिद्रुमसंयुता ।
वृत्तत्रिकोणविषमा वज्राभा कच्छपोन्नता ॥ १२ ॥

१. 'हरा।' ख. पाठः. २. 'दरीभि' ग. पाठः. ३. 'नी' ख. पाठः.

चण्डालावासगेच्छाया चर्मकारालयाश्रिता ।
एकद्वित्रिचतुर्मार्गा तरिताव्यक्तमार्गिका ॥ १३ ॥
निम्नं यत् पणवाकारं पक्षीव मुरवोपमम्[2] ।
मत्स्याभं तु चतुष्कोणे महावृक्षसमायुतम् ॥ १४ ॥
चैत्यवृक्षयुतं सालचतुष्कोणसमाश्रितम् ।
भुजङ्गनिलयं चैव शङ्करारामेव च ॥ १५ ॥
श्मशानं चाश्रमस्थानं कपिसूकरसन्निभम् ।
वनोरगनिभं टङ्कं शूर्पोलूखलसन्निभम् ॥ १६ ॥
शङ्खाभं शङ्कुनाभं च बिडालकृकलासवत् ।
ऊषरं कृमिभिर्जुष्टं गृहगौलिसमाकृति ॥ १७ ॥
अन्यदेवंविधं वस्तु निन्दितं वस्तुपाठकैः ।
बहुप्रवेशमार्गं च मार्गविद्धं च गर्हितम् ॥ १८ ॥
यत् कर्म विहितं मोहादेवंभूते तु वस्तुनि ।
तन्महादोषहेतुः स्यात् सर्वथा तद् विवर्जयेत् ॥१९॥

श्वेतासृक्पीतकृष्णा हयगजनिनदा षड्रसा चैकवर्णा
गोधान्याम्भोजगन्धोपलतुषरहितावाक्प्रतीच्युन्नता या ।
पूर्वोदग्वारिसारा वरसुरभिसमा शूलहीनास्थिवर्ज्या
सा भूमिः सर्वयोग्या कणदररहिता सम्मतार्थैर्मुनीन्द्रैः ॥ २० ॥

इति मयमते वस्तुशास्त्रे भूपरीक्षा नाम

तृतीयोऽध्यायः ।

---

१. 'स', २. 'पो' क. पाठः.

अथ चतुर्थोऽध्यायः।

आकारवर्णशब्दादिगुणोपेतं भुवः स्थलम्।
सङ्गृह्य स्थपतिः प्राज्ञो दत्त्वा देवबलिं पुनः॥ १॥
स्वस्तिवाचकघोषेण जयशब्दादिमङ्गलैः।
अपक्रामन्तु भूतानि देवताश्च सराक्षसाः॥ २॥
वासान्तरं व्रजन्त्वस्मात् कुर्या[1] भूमिपरिग्रहम्।
इति मन्त्रं समुच्चार्य विहिते भूपरिग्रहे॥ ३॥
कृष्टा गोमयमिश्राणि सर्वबीजानि वापयेत्।
दृष्ट्वा तानि विरूढानि फलपकगतानि च॥ ४॥
सवृषाश्च सवत्साश्च ततो गास्तत्र वासयेत्।
यतो[2] गोभिः परिक्रान्तमुपघ्राणैश्च पूजितम्॥ ५॥
संहृष्टवृषनादै[3]श्च निर्धौतकलुषीकृतम्।
वत्सवक्त्रच्युतैः फेनैः संस्कृतं प्रस्नैवैरपि॥ ६॥
स्नातं गोमूत्रसेकैश्च गोपुरीषैः सलेपनम्।
च्युतरोमन्थनोद्गारैर्गोष्पदैः कृतकौतुकम्॥ ७॥
गोगन्धेन समाविष्टं पुण्यतोयैः शुभं पुनः।
तथा पुण्यतिथोपेते नक्षत्रविषये शुभे॥ ८॥
करणे च सुलग्ने च मुहूर्ते च बुधेप्सिते।
अक्षतैः श्वेतपुष्पैश्च बलिकर्म विधीयते॥ ९॥

---

१. 'र्याद् भू' क. पाठः. २. 'दा' ख. पाठः. ३. 'दानैश्च', ४. 'स्तुतैर' क. पाठः. ५. 'षानुले', ६. 'स्थि', ७. 'वृक्षैश्च' ख. पाठः.

ब्राह्मणैश्च यथाशक्त्या वाचयेत् स्वस्तिवाचकम् ।
वस्तुमध्ये ततस्तस्मिन् खानयेद् वसुधातलम् ॥ १० ॥
अरत्निमात्रगम्भीरं चतुरश्रसमन्वितम् ।
दिग्भागस्थैमसम्भ्रान्तमसंक्षिप्तसमुच्छ्रयम् ॥ ११ ॥
अर्चयित्वा यथान्यायं तं कूपमभिवन्द्य च ।
चन्दनाक्षतमिश्रेण सर्वरत्नोदकेन च ॥ १२ ॥
पयसा तु ततः प्राज्ञो निशादौ परिपूरयेत् ।
तस्य कूपस्य चाभ्याशे शुचिर्भूत्वा समाहितः ॥ १३ ॥
भूमौ दर्भावकीर्णायां संविशेत् प्राक्शिरा बुधः ।

अयं मन्त्रः —

अस्मिन् वस्तुनि वर्धस्व धनधान्येन मेदिनि! ॥ १४ ॥
उत्तमं वीर्यमास्थाय नमस्तेऽस्तु शिवा भव ।
उपवासमुपक्रामेदेतं मन्त्रं जपंस्ततः ॥ १५ ॥
अह्न आदौ परीक्षेत तं कूपं स्थपतिर्बुधः ।
सावशेषं जलं दृष्ट्वा तद् ग्राह्यं सर्वसम्पदे ॥ १६ ॥
क्लिन्ने वस्तुविनाशाय शुष्के धान्यधनक्षयः ।
पूरिते तन्मृदा खाते समता मध्यमा मता ॥ १७ ॥
उत्तमा भूर्मृदाधिक्या हीना हीना मृदा मही ।
तन्मध्यावटसन्दृष्टप्रदक्षिणचरोदकाम् ॥ १८ ॥

---

१. 'स्तम्भस' क. पाठः. २. 'पितेन' ख. पाठः. ३. 'स्थि', ४. 'द्वा', ५. 'कम्' क. पाठः.

सुरभिप्रतिमां[1,2] भूमिं गृह्णीयात् सर्वसम्पदे ।

एवं यथोक्तविधिना विविधं विदित्वा
ग्रामाग्रहारपुरपत्तनखर्वटानि ।
स्थानीयखेटनिगमानि तथेतराणि
यः संविविक्षुरवनीग्रहणं विदध्यात् ॥ १९३ ॥

इति मयमते वस्तुशास्त्रे भूपरिग्रहो नाम
चतुर्थोऽध्यायः ।

अथ पञ्चमोऽध्यायः ।

सर्वेषामपि वास्तूनां मानेनैव विनिश्चयः ।
तस्मान्मानोपकरणं वक्ष्ये सङ्क्षेपतः क्रमात् ॥ १ ॥
परमाणुक्रमाद् वृद्धं मानाङ्गुलमिति स्मृतम् ।
परमाणुरिति प्रोक्तं योगिनां दृष्टिगोचरम् ॥ २ ॥
परमाणुभिरष्टाभी रथरेणुरुदाहृतः ।
रथरेणुश्च वालाग्रं लिक्षा[3]यूकायवास्तथा ॥ ३ ॥
क्रमशोऽष्टगुणैः प्रोक्तो यवाष्टगुणितोऽङ्गुलम्[4] ।
अङ्गुलं तु भवेन्मात्रं वितस्तिर्द्वादशाङ्गुलम् ॥ ४ ॥
तद्द्वयं हस्तमुद्दिष्टं तत् किष्क्विति मतं वरैः ।
पञ्चविंशतिमात्रं तु प्राजापत्यमिति स्मृतम् ॥ ५ ॥
षड्विंशतिर्धनुर्मुष्टिः सप्तविंशद्धनुर्ग्रहः ।
याने च शयने किष्कुः प्राजापत्यं विमानके ॥ ६ ॥

१. 'भिः', २. 'मामन्त्रं गृ', ३. 'ख्या' क. पाठः. ४. 'लि' ख. पाठः.

वास्तूनां तु धनुर्मुष्टिर्ग्रामादीनां धनुर्ग्रहः।
सर्वेषामपि वास्तूनां किष्कुरेवाथवा मतः॥ ७॥

रत्निश्चैवमरत्निश्च भुजो बाहुः करः स्मृतः।
हस्ताश्चतुर्धनुर्दण्डो यष्टिश्चैव प्रकीर्तितः॥ ८॥

दण्डेनाष्टगुणा रज्जुर्दण्डैर्ग्रामं च पत्तनम्।
नगरं निगमं खेटं वेश्मादीन्यपि मानयेत्॥ ९॥

गृहादीनां तु हस्तेन याने च शयने बुधैः।
वितस्तिना विधातव्यं क्षुद्राणामङ्गुलेन तु॥ १०॥

यवेनाल्पीयसां मानमेवं मानक्रमं विदुः।
मध्यमाङ्गुलिमध्यस्थपर्वमात्रायतं तु यत्॥ ११॥

कर्तुर्मात्राङ्गुलं प्रोक्तं यागादीनां प्रशस्यते।
देहलब्धाङ्गुलं यत्तदुपरिष्टाद् विधीयते॥ १२॥

एवमेवं विदित्वा तु स्थपतिर्मानयेद् दृढम्।
भवन्ति शिल्पिनो लोके चतुर्धा स्वस्वकर्मभिः॥ १३॥

स्थपतिः सूत्रग्राही च वर्धकिस्तक्षकस्तथा।
प्रसिद्धदेशसङ्कीर्णजातिजोऽभीष्टलक्षणः॥ १४॥

स्थपतिः स्थापनार्हः स्यात् सर्वशास्त्रविशारदः।
नहीनाङ्गोऽतिरिक्ताङ्गो धार्मिकस्तु दयापरः॥ १५॥

अमात्सर्योऽनसूयश्चातन्द्रितस्त्वभिजातवान्।
गणितज्ञः पुराणज्ञः सत्यवादी जितेन्द्रियः॥ १६॥

१, २. 'ष' क. पाठः.

चित्रज्ञः सर्वदेशज्ञश्चान्नदश्चाप्यलुब्धकः[1] ।
अरोगी चाप्रमादी च सप्तव्यसनवर्जितः ॥ १७ ॥

सुनामा दृढबुद्धिश्च[2] वास्तुविद्याब्धिपारगः ।
स्थपतेस्तस्य शिष्यो वा सूत्रग्राही सुतोऽथवा ॥ १८ ॥

स्थपत्याज्ञानुसारी च सर्वकर्मविशारदः ।
सूत्रदण्डप्रपातज्ञो मानोन्मानप्रमाणवित् ॥ १९ ॥

शैलदार्विष्टकादीनां सूत्रग्राहिवशात् तु (यत्?यः) ।
तक्षणात् स्थूलसूक्ष्माणां तक्षकः[3] स तु कीर्तितः ॥ २० ॥

मृत्कर्मज्ञो गुणी शक्तः सर्वकर्मस्वतन्त्रकः ।
तक्षकस्तक्षणेनास्मिन्नुपर्युपरि युक्तितः ॥ २१ ॥

वृद्धिकृद् वर्धकिः प्रोक्तः सूत्रग्राह्यनुगः सदा ।
कर्मिणो निपुणाः शुद्धा बलवन्तो दयापराः ॥ २२ ॥

गुरुभक्ताः सदा हृष्टाः स्थपत्याज्ञानुगाः सदा ।
तेषामेव स्थपत्याख्यो विश्वकर्मेति संस्मृतः ॥ २३ ॥

एभिर्विना हि सर्वेषां कर्म कर्तुं न शक्यते ।
तस्मादेतत् सदा पूज्यं स्थपत्यादिचतुष्टयम् ॥ २४ ॥

एभिः स्थपत्यादिभिरत्र लोके
विना ग्रहीतुं सुकृतं न शक्यम् ।
तैरेव सार्धं गुरुणाथ तस्माद्
भजन्ति मोक्षं भवतस्तु मर्त्त्याः ॥ २५ ॥

इति मयमते मानोपकरणं नाम
पञ्चमोऽध्यायः ।

---

१. 'सर्वज्ञः', २. 'बन्धुश्च', ३. 'कस्त्विति की' ख. पाठः

अथ षष्ठोऽध्यायः।

वक्ष्येऽहं दिक्परिच्छेदं शङ्कुनार्कोदये सति।
उत्तरायणमासे तु शुक्लपक्षे शुभोदये ॥ १ ॥
प्रशस्तपक्षनक्षत्रे विमले सूर्यमण्डले।
गृहीतवास्तुमध्ये तु समं कृत्वा भुवः स्थलम् ॥ २ ॥
जलेन दण्डमात्रेण समं तु चतुरश्रकम्।
तन्मध्ये स्थापयेच्छङ्कुं तन्मानमधुनोच्यते ॥ ३ ॥
अरत्निमात्रमायाममग्रमेकाङ्गुलं भवेत्।
मूलं पञ्चाङ्गुलं व्यासं सुवृत्तं निर्व्रणं वरम् ॥ ४ ॥
अष्टादशाङ्गुलं मध्यं कन्यसं द्वादशाङ्गुलम्।
आयामसदृशं नाहं मूलेऽग्रे तु नवाङ्गुलम् ॥ ५ ॥
दन्तं वै चन्दनं चैव खदिरः कदरः शमी।
शाकश्च तिन्दुकश्चैव शङ्कुवृक्षा उदीरिताः[1] ॥ ६ ॥
अन्यैः सारद्रुमैः प्रोक्तं तस्याग्रं चित्रवृत्तकम्।
शङ्कुं कृत्वा दिनादौ तु स्थापयेदात्तभूतले ॥ ७ ॥
शङ्कुद्विगुणमानेन तन्मध्ये मण्डलं लिखेत्।
पूर्वापराह्णयोश्छाया यदि तन्मण्डलान्तगा ॥ ८ ॥
तद्बिन्दुद्वयगं[2] सूत्रं पूर्वापरदिशीष्यते[3]।
बिन्दुद्वयान्तरभ्रान्तशफराननपुच्छगम् ॥ ९ ॥

---

१. 'इतीरि' ख. पाठः. २. 'द्वीजद्व' क. पाठः. ३. 'शि' ख. पाठः.

दक्षिणोत्तरगं सूत्रमेवं सूत्रद्वयं न्यसेत्।
उदगाद्यपरान्तानि पर्यन्तानि विनिक्षिपेत् ॥ १० ॥

सूत्राणि स्थपतिः प्राज्ञः प्रागुत्तरमुखानि च।
कन्यायां वृषभे राशावपच्छायात्र नास्ति हि ॥ ११ ॥

मेषे च मिथुने सिंहे तुलायां द्व्यङ्गुलं नयेत्।
कुलीरे वृश्चिके मत्स्ये शोधयेच्चतुरङ्गुलम् ॥ १२ ॥

धनुःकुम्भे षडङ्गुल्यं मकरेऽष्टाङ्गुलं तथा।
छायाया दक्षिणे वामे नीत्वा सूत्रं प्रसारयेत् ॥ १३ ॥

अष्टयष्ट्यायता रज्जुस्तालकेतकवल्कलैः।
कार्पासपट्टसूत्रैश्च दर्भैर्न्यग्रोधवल्कलैः ॥ १४ ॥

अङ्गुलाग्रसमस्थूला त्रिवर्तिर्ग्रन्थिवर्जिता।
देवद्विजमहीपानां शेषयोश्च द्विवर्त्तिका ॥ १५ ॥

खदिरः खादिरश्चैव मधूकः क्षीरिणी तथा।
खातशङ्कुद्रुमाः प्रोक्ता अन्यं वा सारदारुजम् ॥ १६ ॥

एकादशाङ्गुलाद्येकविंशन्मात्रं तु दैर्घ्यतः।
पूर्णमुष्टिस्तु नाहं स्यान्मूलं सूचीनिभं भवेत् ॥ १७ ॥

गृहीत्वा वामहस्तेन प्राङ्मुखो वाप्युदङ्मुखः।
दक्षिणेनाष्टलं गृह्य ताडयेदष्टभिः क्रमात् ॥ १८ ॥

प्रहारैः स्थपतिः प्राज्ञस्तच्छेङ्कुस्थापकाज्ञया।
प्रमाणसूत्रमित्युक्तं प्रमाणैर्निश्चितं हि यत् ॥ १९ ॥

---

१. 'कुर्यात् स्था' ख. पाठः.

तद्बहिः परितो भागे सूत्रं पर्यन्तमिष्यते।
गर्भसूत्रादिविन्यासत्सूत्रं देवपदोचितम् ॥ २० ॥
पदविन्याससूत्रं हि विन्यासः सूत्रमिष्यते ।
गृहाणां दक्षिणे गर्भस्तत्पार्श्वे सूत्रपातनम् ॥ २१ ॥
तत्सूत्राच्छङ्कुमानेन नीत्वा शङ्कुं निखानयेत्।
उपानं निष्क्रमार्थं वा भित्त्यर्थं वार्थं तद् भवेत् ॥ २२ ॥
नगरग्रामदुर्गेषु वाय्वीादी रज्जुपातनम्।
अवाच्याशाद्युदीच्यन्तं प्राक्प्रत्यग्गतसूत्रकम् ॥ २३ ॥
प्रतीच्याशादिपूर्वान्तं विसृजेद् दक्षिणोत्तरम् ।
ब्रह्मस्थानात् पूर्वगतं[४] तत् त्रिसूत्रं तदुच्यते ॥ २४ ॥
ततो धनं पश्चिमगं धान्यं दक्षिणगं ततः।
ब्रह्मस्थानादुत्तरगं सुखमित्यभिधीयते ॥ २५ ॥
सुख[५]प्रमाणं यत् सूत्रं तत्प्रमाणमिहोच्यते ।
एकहस्तं द्विहस्तं वा त्रिहस्तं परितोऽधिकम् ॥ २६ ॥
विमानं मण्डपव्यासात् खानयेत् तद्दलार्ध[६]कम् ॥ २६३ ॥

द्व्येकं नो नैकनेत्रे नयनगुणयुगं चाब्धिरुद्राक्षमक्षी[७]
नेत्रैकं नो न चन्द्रं नयननयनकं वह्निवेदाब्धिबाणं[९]म् ।

---

१. 'सूत्रं नि' क. पाठः. २. 'च', ३. 'स्त्वा' ४. 'तमत्रसु', ५. 'गृहप्र' ख. पाठः. ६. 'र्थे' क. पाठः. ७. 'क्षं' ख. पाठः. ८. 'स्वि' क. पाठः. ९. 'णाः' ख. पाठः.

षट्षट्सप्ताष्टकाष्टैर्मुनिरसरसकं भूतवेदाब्ध्येजाक्षं
नेत्रं मात्रं च मेषादिषु दशदशकेऽस्मिन् दिने त्यज्य युञ्ज्यात ॥
सैमीक्ष्य भानोर्गमनं सराशिकं
त्यजेत् पुरोक्ताङ्गुलिर्मन्त्रयुक्तितः ।
ततस्तु काष्ठादुपगृह्य तद्वशाद्
विसृज्य सूत्रं विदधीत चँ स्थलम् ॥ २८३ ॥

इति मयमते वस्तुशास्त्रे दिक्परिच्छेदो नाम

षष्ठोऽध्यायः ।

अथ सप्तमोऽध्यायः

वक्ष्येऽहं पदविन्यासं सर्ववस्तुसनातनम् ।
सकलं पेचकं पीठं महापीठमतः परम् ॥ १ ॥
उपपीठमुग्रपीठं (च ?) स्थण्डिलं नाम चण्डितम् ।
मण्डूकपदकं चैव पदं परमशायिकम् ॥ २ ॥
तथासनं च स्थानीयं देशीयोभयचण्डितम् ।
भद्रं महासनं पद्मगर्भं च त्रियुतं पदम् ॥ ३ ॥
व्रतभोगपदं चैव कर्णाष्टकपदं तथा ।
गणितं पादमित्युक्तं पदं सूर्यविशालकम् ॥ ४ ॥
सुसंहितपदं चैव सुप्रतीकान्तमेव च ।
विशालं विप्रगर्भं च विश्वेशं च ततः परम् ॥ ५ ॥

---

१. 'ब्धि' क. पाठः. २. 'नं' ख. पाठः. ३. 'त्या' क. पाठः.
४. 'उदीक्ष्य', ५. 'मात्रयु', ६. 'वस्त्वल', ७. 'त्येवं प' ख. पाठः.

तथा विपुलभोगं च पदं विप्रतिकान्तकम् ।
विशालाक्षपदं चैव विप्रभक्तिकसंज्ञकम् ॥ ६ ॥
पदं विश्वेशसारं च तथैवेश्वरकान्तकम् ।
इन्द्रकान्तपदं चैव द्वात्रिंशत् कथितानि वै ॥ ७ ॥
सकलं पदमेकं स्यात् पेचकं तु चतुष्पदम् ।
पीठं नवपदं चैव महापीठं द्विरष्टकम् ॥ ८ ॥
पञ्चविंशत्युपपीठं षट्षडेवोग्रपीठकम् ।
स्थण्डिलं सप्तसप्तांशं मण्डूकं चाष्टकाष्टकम् ॥ ९ ॥
परमशायिपदं[1] चैव नन्दनन्दपदं भवेत् ।
आसनं शतभागं[2] स्यादेकविंशच्छतं पदम् ॥ १० ॥
स्थानीयं स्याच्चतुश्चत्वारिंशच्छतपदाधिकम्[3] ।
देशीयं नवषष्ट्यंशं शतं चोभयचण्डितम् ॥ ११ ॥
षण्णवत्यधिकं चैव शतं भद्रं महासनम् ।
सपञ्चविंशद्[4] द्विशतं पद्मगर्भमिति स्मृतम् ॥ १२ ॥
षडाधिक्यं तु पञ्चाशद्विशतं त्रियुतं पदम् ।
द्विशतं सनवाशीति व्रतभोगमिति स्मृतम् ॥ १३ ॥
त्रिशतं चै[5] चतुर्विंशत् कर्णाष्टकपदं तथा ।
त्रिशतं चैकषष्ट्यंशं गणितं पादसंज्ञितम् ॥ १४ ॥
चतुःशतपदं सूर्यविशालं परिकीर्तितम् ।
सुसंहितपदं चैकचत्वारिंशच्चतुःशतम् ॥ १५ ॥

---

१. 'म शायिकं चै' ख. पाठः २. 'क्तं' क. पाठः. ३ 'न्वितम् ।',
४. 'द्वि च', ५. 'पद् चतुर्युक्तं क' ख. पाठः.

सैवेदाशीति[1]चत्वारः शतं सुप्रतिकान्तकम् ।
[2]नैवविंशत्पञ्चशतं विशालं पदमीरितम् ॥ १६ ॥

षट्सप्ततिः पञ्चशतं विप्रगर्भमिति स्मृतम् ।
विश्वेशं षट्शतं [3]पश्चात् पञ्चविंशत्पदं स्मृतम् ॥ १७ ॥

षट्सप्ततिः[4] षट्शतकं विपुलभोगमिति स्मृतम् ।
नवविंशतिकं सप्तशतं विप्रतिकान्तकम् ॥ १८ ॥

विशालाक्षपदं वेदाशीतिः सप्तशतां[5]धिकम् ।
सैकाष्टपञ्चयुक्तं चाष्टशतं विप्रभक्तिकम् ॥ १९ ॥

[6]विश्वेशसारमित्युक्तमेवं[7] नवशतं[8] पदम् ।
सैकषष्ट्यां[9] नवशतं पदमीश्वरकान्तकम् ॥ २० ॥

चतुर्विंशति[10]संयुक्तं सहस्रपदसंकुलम् ।
इन्द्रकान्तमिति प्रोक्तं तन्त्रविद्भिः पुरातनैः ॥ २१ ॥

आद्यं पदं सकलमेकपदं[11] यतीना-
मिष्टं हि विष्टरमहाशनवह्निकार्यम् ।
पित्र्यामरादियजनं गुरुपूजनं च
[12]भान्वार्कितोयशशिनामकसूत्रयुक्ते ॥ २२ ॥

---

१. 'कं चातुः श', २. 'सनन्दपञ्चवेदांशं पञ्चाशतविशालकम् ।', ३. 'पञ्च पञ्चकोष्ठसमन्वितम्', ४. 'तिसप्तशतं पदं वि', ५. 'तांश-कम् ।' ख. पाठः. ६. 'सएकचत्वाष्टपदं विप्रभक्तमिति स्मृतम् ।' क. पाठः. ७. 'तन्नव', ८. तारकम् ।'; ९. 'ष्ट्यधिकं नन्दशतमी' ख. पाठः. १०. 'शत्सहस्रं तु इन्द्रकान्तपदं स्मृतम् ।' क. पाठः. ११. 'मि' ख. पाठः. १२. 'त्रि' क. पाठः.

पैशाचभूतसविषग्रहरक्षकास्ते
पूज्या हि पेचकपदे चतुरं[1]शयुक्ते ।
तस्मिन् विधेयमधुना विधिना विधिज्ञैः
शैवं तु निष्कलमलं सकलं च युक्त्या ॥ २३ ॥

अथ पीठपदे नवभागयुते
दिशि दिश्यथ वेदचतुष्टयकम् ।
वि[2]दुरीशपदाद्युदकं दहनं
गगनं पवनं पृथिवी ह्यबहिः ॥ २४ ॥

षोडशांशं महापीठं पञ्चपञ्चामरान्वितम् ।
ईशो जयन्त आदित्यो भृशोऽग्निर्वितथो यमः ॥

भृङ्गश्च पितृसुग्रीवौ वरुणः शोषमारुतौ ।
मुख्यः सोमोऽदितिश्चेति बाह्यदेवाः प्रकीर्तिताः ॥ २६ ॥

आपवत्सार्यसावित्रा विवस्वानिन्द्रमित्रकौ ।
रुद्रजो भूधरश्चान्तर्मध्ये ब्रह्मा स्थितः प्रभुः ॥ २७ ॥

तत्पार्श्वयोर्द्वयोरेकभागेनैकेन वर्धनात् ।
उपपीठं भवेदत्र देवतास्तौ[3]ः पदे स्थिताः ॥ २८ ॥

तत्तत्पार्श्वद्वयोश्चैवमेकैकांशविवर्धनात् ।
इन्द्रकान्तपदं यावत् तावद् युञ्जीत बुद्धिमान् ॥

समानि यानि भो[4]गानि चतुःषष्टिवदा[5]चरेत् ।
अ[6]समान्यपि सर्वाणि चैकाशीतिप[7]दोक्तवत् ॥ ३० ॥

---

१. 'रज्जु' ख. पाठः. २. 'दिगीश' क. पाठः. ३. 'तास्तत्पदे' ४. 'गर्भाणि च', ५. 'दिष्यते ।', ६. 'अन्यान्यपि च स', ७. 'वदीरितम् ॥' ख. पाठः.

पदानामपि सर्वेषां[1] मण्डूकं चापि तत्परम् ।
चण्डितं सर्ववस्तूनामाहत्यं च यतस्ततः ॥ ३१ ॥
तस्मात् सङ्क्षिप्य तन्त्रेभ्यो वक्ष्येऽहमपि तद् द्वयम् ।
चतुःषष्टिपदे चैकाशीतौ सकलनिष्कले ॥ ३२ ॥
सूत्रे च पदमध्ये च ब्रह्माद्याः स्थापिताः सुराः ।
प्रागुदग्दिक्समारभ्यैवोच्यन्ते देवताः पृथक् ॥ ३३ ॥
ईशानश्चैव पर्जन्यो जयन्तश्च महेन्द्रकः ।
आदित्यः सत्यकश्चैव भृशश्चैवान्तरिक्षकः ॥ ३४ ॥
अग्निः पूषा च वितथो राक्षसश्च यमस्तथा ।
गन्धर्वो भृङ्गराजश्च मृषश्च पितृदेवताः ॥ ३५ ॥
दौवारिकश्च सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शोषरोगौ च वायुर्नागस्तथैव च ॥ ३६ ॥
मुख्यो भल्लाटकश्चैव सोमश्चैव मृगस्तथा ।
अदितिश्चोदितिश्चैव द्वात्रिंशद् बाह्यदेवताः ॥ ३७ ॥
आपश्चैवापवत्सश्चैवान्तः प्रागुत्तरे स्मृतौ ।
सविन्द्रश्चैव साविन्द्रश्चान्तः प्राग्दक्षिणे स्मृतौ[2] ॥
इन्द्रश्चैवेन्द्रराजश्च दक्षिणापरतः स्थितौ ।
रुद्रो रुद्रजयश्चैव पश्चिमोत्तरतो दिशि ॥ ३९ ॥
ब्रह्मा मध्ये स्थितः शम्भुस्तन्मुखस्थाश्चतुःसुराः ।
आर्यो विवस्वान् मित्रश्च भूधरश्चैव कीर्तिताः ॥ ४० ॥

१. 'ष', २. 'म' ख. पाठः.

चरकी च विदारी च पूतना पापराक्षसी ।
ईशानादि बहिः स्थाप्याश्चतुष्कोणे स्त्रियः स्मृताः ॥ ४१ ॥
नपदा बलिभोक्तारः शेषाणां पदमुच्यते ।
विंशत्सुत्रैः सन्धिभिः सप्तवेदैः
षट्षट्सङ्ख्याभिश्चतुष्कैश्च षट्कैः ।
युक्तैः शूलैर्वेदसङ्ख्याः सिराभिः
संयुक्तं स्यादष्टकेनैकमेतत् ॥ ४२३ ॥
चतुःषष्टिपदे मध्ये ब्रह्मणश्च चतुष्पदम् ॥ ४३ ॥
आर्यकादिचतुर्देवाः प्रागादित्रित्रिभागिनः ।
आपाद्यष्टामराः कोणेष्वर्धार्धपदभोगिनः ॥ ४४ ॥
महेन्द्रराक्षसाद्याश्च पुष्पभल्लाटकादयः ।
दिशि दिश्यथ चत्वारो देवा द्विपदभागिनः ॥ ४५ ॥
जयन्तश्चान्तरिक्षश्च वितथश्च मृगस्तथा ।
सुग्रीवो रोगमुख्यश्च दितिश्चैकैकभागिनः ॥ ४६ ॥
ईशाद्यष्टामराः शेषाः कोणेष्वर्धपदेश्वराः ।
एवं क्रमेण भुञ्जीरन् मण्डूके वास्तुदेवताः ॥ ४७ ॥
स्वस्वप्रदक्षिणवशात् पदभुक्तिक्रमं विदुः ।
ब्रह्माणं च निरीक्ष्यैते स्थिताः स्वस्वपदेऽमराः ॥ ४८ ॥
षड्वंशमेकहृदयं चतुर्मर्म चतुःसिरम् ।
मेदिन्यां वास्तुपुरुषं निकुब्जं प्राक्शिर(रो?रं) विदुः ॥ ४९ ॥

---

१. 'च', २. 'अर्कैः शू' क. पाठः. ३, ४. 'भो' ख. पाठः.

तस्योत्तमाङ्गं विज्ञेयमार्यको नाम देवता।
सविन्द्रो[1] दक्षिणभुजः साविन्द्रः[2] कक्षमुच्यते ॥ ५० ॥

आपश्चैवापवत्सश्च सकक्षो वामतो भुजः।
विवस्वान् दक्षिणं पार्श्वं वामपार्श्वे महीधरः॥ ५१ ॥

मध्ये ब्रह्ममयः कायो मित्रः पुंस्त्वं विधीयते ।
इन्द्रश्चैवेन्द्रराजश्च दक्षिणः पाद ईरितः॥ ५२ ॥

रुद्रो रुद्रजयो वामपादः शेते त्वधोमुखः।
वस्तुत्रिभागमध्ये तु वंशाः षट् प्रागुदङ्मुखाः ॥ ५३ ॥

वस्तुमध्ये तु मर्माणि ब्रह्मा हृदयमुच्यते ।
निष्कूटांशाः सिरा ज्ञेया इत्येष पुरुषः स्मृतः ॥ ५४ ॥

गृहे गृहे मनुष्याणां शुभाशुभकरः स्मृतः।
तस्याङ्गानि गृहाङ्गैश्च विद्वान् नैवोपपीडयेत॥ ५५॥

व्याधयस्तु यथासङ्ख्यं भर्तुरङ्गे तु संश्रिताः।
तस्मात् परिहरेद् विद्वान् पुरुषाङ्गं तु सर्वथा॥ ५६ ॥

चत्वारिंशच्च पञ्चैते देवतानां समुच्चयः।

अष्टाष्टांशे कस्य षस्तन्मुखाना-
मिष्टं गांशं व्यञ्जनं षोडशानाम् ।
अष्टानां कः षोडशानां खभागं
मण्डूकाख्ये स्थण्डिले तैतिलेषु॥ ५७ ॥

---

१. 'त्रो', २. 'त्रः' ख. पाठः

परमशायिपदे नवभागभाक्
कमलजो मुखतस्तु चतुःखुराः ।
रसपदा द्विपदा हि विदिक्स्थिता
बहिरथैकपदाः सकलामराः ॥ ५८३ ॥

इति मयमते वस्तुशास्त्रे पददेवताविन्यासो नाम
सप्तमोऽध्यायः ।

अथाष्टमोऽध्यायः ।

देवानां[1] स्वपदस्थानां बलिकर्म विधीयते ।
सामान्याहल्यमार्गेण ब्रह्मादीनां यथाक्रमम् ॥ १ ॥
गन्धमाल्यैश्च धूपेन पयसा मधुसर्पिषा ।
पायसौदनलाजैश्च ब्रह्मस्थानं समर्चयेत् ॥ २ ॥
आर्यके फलभक्ष्यं स्यान्माषान्नं च तिलानि च ।
विवस्वति विनिक्षिप्तं दधि दूर्वा च मित्रके ॥ ३ ॥
महीधरे भवेद् दुग्धमेवमन्तर्बलिः स्मृतः ।
पर्जन्यस्याज्यमैन्द्रस्य नवनीतं सपुष्पकम् ॥ ४ ॥
इन्द्रे[2] कोष्ठं च पुष्पं च मधु कन्दाश्च भास्करे ।
सत्यके मधुकं दद्याद्[3] भृशाय नवनीतकम् ॥ ५ ॥
माषं रजनिचूर्णं च गगनस्य बलिं ददेत्[4] ।
दुग्धाज्यं तगरं वह्नेः शिम्बान्नं[5] पूष्णि पायसम् ॥ ६ ॥

---

१. 'दवि' क. पाठः. २. 'न्द्र' ख. पाठः. ३. 'दैशा' क. पाठः. ४. 'यजेत्' ख. पाठः. ५. 'क', ६. 'खान्नं' क. पाठः.

क(क?ङ्क)न्नं वितथे शीधु राक्षसे बलिरिष्यते।
शिम्बान्नं कृसरं याम्ये गन्धर्वेऽखिलगन्धकम्॥ ७॥
भृङ्गराजेऽब्धिमत्स्यः स्यान्मृषे मत्स्यौदनं विदुः।
निर्ऋतौ तैलपिण्याकं बीजं दौवारिके बलिः॥ ८॥
सुग्रीवे मोदकं पुष्पदन्तके पुष्पतोयकम्।
वरुणे पायसं धान्यं शोणितेनासुरे बलिः॥ ९॥
सतिलं तण्डुलं शोषे रोगे स्याच्छुष्कमत्स्यकम्।
स्विन्नं हारिद्रकं वायौ नागे मद्यं च लाजकम्॥ १०॥
धौन्यचूर्णं हि मुख्यस्य दधि सर्पिश्च सम्मतम्।
गुलौदनं तु भल्लाटे सोमे दुग्धौदनं दँदेत्॥ ११॥
शुष्कमांसं मृगे दद्याद् देवमातरि मोदकम्।
उदितौ तिलभक्ष्येण क्षीरान्नं सर्पिरीशके॥ १२॥
लाजं धान्यं सविन्द्रेस्य साविन्द्रे गन्धतोयकम्।
बस्तमेदस्तथा मुद्गचूर्णमिन्द्रेन्द्रराजयोः॥ १३॥
रुद्रे रुद्रजये मांसं स्विन्नमापापवत्सयोः।
कुमुदं मत्स्यमांसं च शङ्खकच्छपमांसकम्॥ १४॥
मद्यमाज्यं चरक्यास्तु विदार्या लवणो बलिः।
पूतनायास्तिलं पिष्टमन्याया मुद्गसारकम्॥ १५॥
साधारणबलिः शुद्धभोजनं सघृतं दधि।
सर्वेषामपि देवानां गन्धादीनि दँदेत् क्रमात्॥ १६॥

१. 'ण्डान्नं बी' २. 'स्विन्नं हा', ३. 'रात्रिचू', ४. 'यजेत्', ५. 'त्र', ६. 'त्रे', ७. 'यजेत्' ख. पाठः.

कन्यका वाथ वेश्या वा बलिधारणयोग्यकाः ।
अङ्गन्यासकरन्यासैः पूतचेता यथाक्रमम् ॥ १७ ॥
ओङ्कारादिनमोन्तेन स्वस्वनामाभिधाय च[1] ।
दत्त्वा पूर्वं जलं पश्चात् साधारणबलिं ददेत् ॥ १८ ॥
तत्तद्योग्यबलिं पश्चाद् देयं तोयं तथा बुधैः ।
ग्रामादीनां तु मण्डूकपदे परमशायिके ॥ १९ ॥
सन्तर्प्य देवता ह्येवं पूर्वोक्तविधिना क्रमात् ।
विसर्जयेत् ततो देवान् विन्यासार्थं तु मन्त्रवत्[2] ॥ २० ॥
ब्रह्माणं बाह्यदेवांश्च तत्तदुक्तपदे न्यसेत् ।
देवालयविधानार्थं द्वारार्थं[3] ते प्रकीर्तिताः ॥ २१ ॥
शेषाश्च निष्पदाः सर्वे रक्षार्थं तु निवेशिताः ।
एवं ग्रामादिषु प्रोक्तं रहस्यमिदमीरितम् ॥ २२ ॥

कृतोपवासः स्थपतिः प्रभाते[4]
विशुद्धदेहोऽविकलं गृहीत्वा ।
विशेषसामान्यबलिं सुराणां
यथोक्तनीत्या विदधीत सम्यक् ॥ २३ ॥

इति मयमते वस्तुशास्त्रे बलिकर्मविधानो नाम
अष्टमोऽध्यायः ।

---

१. 'देत् । हृदयाय नमस्तेऽस्तु साधारणबलिं ददेत् । त', २. 'वि' ख. पाठः. ३. 'राजार्थं' क. पाठः. ४. 'प्रसन्नो वि' ख. पाठः.

अथ नवमोऽध्यायः ।

ग्रामादीनां मानं विन्यासं चापि वक्ष्यते विधिना ।
दण्डानां पञ्चशतं क्रोशं तद्विगुणमर्धगव्यूतम् ॥ १ ॥
गव्यूतं तद्विगुणं ह्यष्टसहस्रं तु योजनं विद्यात् ।
अष्टधनुश्चतुरश्रा काकणिका तच्चतुर्गुणं माषम् ॥ २ ॥
माषचतुर्वर्तनकं तत्पञ्चगुणं हि वाटिका कथिता ।
वाटिकया युगगुणिता ग्रामकुटुम्बावनिः श्रेष्ठा ॥ ३ ॥
एवं भूगतमानं दण्डैस्तेषां तु वक्ष्यते मानम् ।
ग्रामस्य शतसहस्रैर्दण्डैः पर्यन्तमानमिदमुक्तम् ॥ ४ ॥
विंशतिसहस्रदण्डात् तत्समवृद्ध्या तु पञ्चमानं स्यात् ।
ग्रामे विंशतिभागे कुटुम्बभूमिस्तदेकभागेन ॥ ५ ॥
दण्डैः पञ्चशतैर्यद्धीनं ग्रामस्य मानमिदम् ।
तस्मात् पञ्चशतद्ध्यां यावद् विंशत्सहस्रदण्डान्तम् ॥ ६ ॥
प्रोक्तं चत्वारिंशद्भेदं ग्रामस्य मानमिदम् ।
द्विसहस्रदण्डमानादिः(?) सार्धसहस्रं सहस्रदण्डं च ॥ ७ ॥
नवशतमथ सप्तशतं पञ्चशतं त्रिशतमिति च विस्तारम् ।
नगरस्य सहस्रादिद्विसहस्रान्तं च दण्डमानं स्यात् ॥ ८ ॥
नगरस्याष्टसहस्रैर्दण्डैः पर्यन्तमानमिदम् ।
द्विद्विसहस्रक्षयतो द्विसहस्रान्तं चतुर्विधं मानम् ॥ ९ ॥
ग्रामः खेटः खर्वटमथ दुर्गं नगरमिति च पञ्चविधम् ।
दण्डैस्तेषां मानं वक्ष्येऽहं त्रित्रिभेदभिन्नानाम् ॥ १० ॥

चतुरधिकषष्टिदण्डो ग्रामः स्याद्धीनहीनमिति कथितः ।
ग्रामस्य मध्यमस्य द्विगुणं त्रिगुणं तथोत्तमं प्रोक्तम् ॥
षट्पञ्चाशद्विशतं हीनं खेटं सविंशति त्रिशतम् ।
मध्यममुत्तममेवं सचतुरशीति त्रिशतदण्डम् ॥ १२ ॥
अष्टौ चत्वारिंशाच्चतुःशतं द्वादशं च पञ्चशतम् ।
षट्सप्ततिपञ्चदशं हीनं मध्योत्तमं च खर्वटकम् ॥ १३ ॥
चत्वारिंशत्षट्शतमधमं दुर्गं चतुःसप्तशतदण्डम् ।
मध्यममुत्तमदुर्गं सप्तशतं षष्टिरष्टौ हि ॥ १४ ॥
द्वात्रिंशदष्टशतकं नगरं षण्णवतिअष्टशतदण्डम् ।
षष्टिर्नवशतमधमं मध्यममुत्कृष्टमिति यथासङ्ख्यम् ॥
षोडशदण्डविवृद्ध्या प्रत्येकं नवविधं भवति ।
द्विगुणं त्रिपादमर्धं पादं तेषां मुखायतं विपुलात् ॥ १६ ॥
व्यासषडष्टांशैकं चतुरश्रं वा यथेष्टं स्यात् ।
तस्मिन् विपुलायामे दण्डैरोजैः प्रमाणमात्तव्यम् ॥ १७ ॥
शेषं वाटधरा(र्धं[1] ? र्थं) ग्रामादिषु सर्ववस्तुषु च ।
आयादिसंपदर्थं वृद्धिं हानिं च यष्टिभिः कुर्यात् ॥ १८ ॥
आयव्ययर्क्षयोन्यायुभिरथ तिथिभिश्च वारैश्च ।
यजमानवस्तुनामजन्मर्क्षेणाविरोधिकं यत्तु ॥ १९ ॥
तन्मानेन समेतं गृह्णीयात् सर्व[2]सम्पत्त्यै ।
व्यासायामसमूहे वसुनिधिगुणिते दिनेशधर्महृते ॥ २० ॥

---

१. 'स्थं' क. पाठः. २. 'वस्तुस' ख. पाठः.

आयव्ययमवशिष्टं रामघ्नेऽष्टापहृच्छेषम् ।
ध्वजधूम्रसिंहश्वावृषखरगजकाकाश्च योनिगणाः ॥ २१ ॥
अष्टौ योनय उदिता ध्वजहरिवृषहस्तिनः शुभदाः ।
पुनरपि वसुभिर्गुणिते त्रिनव(?)हान्या फलं वयः शिष्टम् ॥
नक्षत्रं परिणाहे त्रिंशद्याप्ते तिथिर्यमीशाहृते ।
वारं सूर्यमुखं स्याद् बुद्ध्वैवं सर्ववस्तु करणीयम् ॥ २३ ॥
आयाधिकमथ सुखदं व्ययमधिकं सर्वनाशं स्यात् ।
विपरीते तु विपत्त्यै तस्मात् सम्यक् परीक्ष्य कर्तव्यम् ॥
द्वादशसहस्रविप्रैर्यैश्चिष्ठितमुत्तमोत्तमं ग्रामम् ।
दशसाहस्रैर्मध्यममधमं स्यादष्टसाहस्रैः ॥ २५ ॥
सप्तसहस्रैर्विप्रैर्मध्यमोत्तममित्यभीष्टं स्यात् ।
षट्साहस्रैर्मध्यममधमं तु पञ्चसाहस्रैः ॥ २६ ॥
अधमोत्तमं तु चातुःसाहस्रैस्तु त्रिसाहस्रैः ।
अधमसमं द्विसहस्रैरधमाधममेव निर्दिष्टम् ॥ २७ ॥
साहस्रैर्द्विजसङ्घैर्नीचोत्तममाहुराचार्याः ।
सप्तशतैरधममध्यममिह पञ्चशतैस्तु नीचाल्पम् ॥ २८ ॥
साष्टशतं तु द्विगुणं त्रिगुणं वेदाधिकं तथाशीतिः ।
अष्टाष्टकपञ्चाशद् द्वात्रिंशच्च त्रिरष्टौ हि ॥ २९ ॥
द्वादशषोडशविप्रैर्दशभेदं क्षुद्रकं ग्रामम् ।
अन्यदशक्तानां चेद् दानं दशभूसुरान्तमेकादि ॥ ३० ॥

---

१. 'हस्तिका', २. 'शुभदं' ख. पाठः. ३. 'रधिष्ठि' क. पाठः.

एककुटुम्बिसमेतं कुटिकं स्या(त्त?)देकभोगमिति कथितम् ।
तस्य सुखालयमिष्टं शेषाणां दण्डकादीनि ॥ ३१ ॥

युग्मायुग्मे[1]विभागैर्द्विविधं स्यात् सर्ववस्तुविन्यासम् ।
युग्मे सूत्रपथं स्यादसमे पदमध्यमे च वीथी स्यात् ॥

अन्योन्यसङ्करश्चेदशुभं स्यात् सर्वजन्तूनाम् ।
दण्डकमपरं स्वस्तिकमित ऊर्ध्वं प्रस्तरं चैव ॥ ३३ ॥

पश्चात् प्रकीर्णकं स्यान्नन्द्यावर्तं परागमथ पद्मम् ।
स्याच्छ्रीप्रतिष्ठितेनैवाष्टविधं ग्राममुदिष्टम् ॥ ३४ ॥

सर्वेषां ग्रामाणां मङ्गलवीध्यावृता बहिस्त्वबहिः ।
ब्रह्मस्थानं ह्युद्यदितं तस्मिन् देवालयं तु वा पीठम् ॥

एकद्वित्रिचतुर्भिः पञ्चभिरपि कार्मुकैश्च मार्गततिः ।
प्राक्प्रत्यग्गतमार्गा ऋजुद[2]ण्डमहापथाख्यास्ते ॥ ३६ ॥

मध्यमयुक्ता वीथी ब्रह्माख्या सैव नाभिः स्यात् ।
द्वारसमेता वीथी राजाख्या च द्विपार्श्वतः क्षुद्रा ॥ ३७ ॥

सर्वाः कुट्टिमकाख्या मङ्गलवीथी त[3]थैव रथमा[4]र्गम् ।
तिर्यग्द्वारसमेता नाराचपथा इति ख्याता ॥ ३८ ॥

उत्तरदिङ्मुखमार्गाः क्षुद्रा[5]र्गलवामनाख्यपथाः ।
ग्रामावृता मङ्गलवीथिकाख्या पुरावृता या जनवीथिका स्यात् ।
तयोस्तु रथ्याभिहिताभिधा स्या[6]त् पुरातनैरन्यतमेष्वथैवम् ॥

---

१. 'ग्मे विन्यासे द्विवि', २. 'मा' ख. पाठः ३. 'सदेव', ४. 'र्गी' क. पाठः. ५. 'ख्या वामनार्गलव', ६. 'ना पु' ख. पाठः.

द्विजकुलपरिपूर्णं वस्तु यन्मङ्गलाख्यं
नृपवणिगभियुक्तं वस्तु यत्तत् पुरं स्यात्।
तदितरजनवासं ग्राममित्युच्यतेऽस्मिन्
मठमिति पठितं यत् तापसानां निवासम् ॥ ४०३ ॥
प्रागुदगग्रं मार्गं ककनीकृतदण्डवत्तु तन्मध्ये ॥ ४१ ॥
द्वारचतुष्टययुक्तं दण्डकमिति भण्यते मुनिभिः।
दण्डवदेका वीथी साप्येवं दण्डकं प्रोक्तम् ॥ ४२ ॥
नवपदयुक्ते ग्रामे परितो मार्गं पदस्य तस्य बहिः।
तस्मात् प्रागुदगग्रात् प्राग्वीथी दक्षिणाग्रा सा ॥ ४३ ॥
तस्मात् प्राग्दक्षिणतो दक्षिणवीथी प्रतीचिमुखा।
तस्मादवागपरतः पश्चिमवीथ्यग्रमुत्तरतः ॥ ४४ ॥
अपरोत्तरतस्तस्मादुत्तरवीथ्या मुखं प्राच्याम्।
एतत् स्वस्तिकमुदितं स्वस्त्याकृत्या चतुर्मार्गम् ॥ ४५ ॥
प्राक्प्रत्यग्गतमार्गैस्त्रिभिरुदगग्रैस्त्रिभिश्चतुर्भिरथो।
पञ्चभिरपि षट्सप्तभिरपि[2] युक्तं प्रस्तरं पञ्च ॥ ४६ ॥
प्रागग्रैस्तु चतुर्भिर्द्वादशशिवपङ्क्तिनन्दवसुमार्गैः।
उदगग्रैरभियुक्तं ह्येतत् प्रोक्तं प्रकीर्णकं पञ्च ॥ ४७ ॥
प्राक्प्रत्यग्गतमार्गैः पञ्चभिरुदगग्रैस्त्रयोदशभिः।
द्विःसप्तभिरथ तिथिभिः षोडशभिः सप्तदशभिरपि मार्गैः ॥
[1]युक्तं नन्द्यावर्तं दिक्षु चतुर्द्वारसंयुक्तम्।
नन्द्यावर्ताकृत्या बाह्ये द्वारैरबाह्यतो मार्गैः ॥ ४९ ॥

---

१. 'द्वरीकृ' क. पाठः २. 'भि', ३. 'उ' ख. पाठः.

युक्तानेकैर्युक्तं नन्द्यावर्ताभमिदमुदितम् ।
आद्यैरष्टादशभिर्द्वाविंशत्यङ्कैरुदग्वक्त्रैः ॥ ५० ॥
षड्भिः प्राङ्मुखमार्गैर्युक्तं ह्येतत् परागमिति कथितम् ।
प्राक्प्रत्यग्गतमार्गैः सप्तभिरुदगग्रैस्त्रिवेदशरैः ॥ ५१ ॥
षट्सप्तभिरपि[2] युक्तैर्विंशतिभिः पञ्चधा पद्मम् ।
अष्टभिरथ पूर्वाग्रैरुदगग्रैः साष्टविंशतिभिः ॥ ५२ ॥
आद्यैर्द्विः षोडशभिर्मार्गैरन्यैर्युतं यत्तु ।
तच्छ्रीप्रतिष्ठितं स्यादष्टविधं ग्रा[3]ममुद्दिष्टम् ॥ ५३ ॥
अथवा श्रीवत्सादिकमुप(नी ? ने)तव्यं तु विन्यासम् ।
सर्वेषां ग्रामाणां नाभिं न प्रोतयेन्मतिमान् ॥ ५४ ॥
ग्रामे वाथ गृहे वा दण्डच्छेदोऽपि नैव कर्तव्यः ।
सकलाद्यासनकान्तं विन्यासार्थं पदं बुधै[4]र्ग्राह्यम् ॥
क्षुद्रग्रामे मार्गाश्चत्वारश्चाष्ट मध्यमे ग्रामे ।
द्वादश षोडश मार्गा ग्रामेषूत्कृष्टकेषु मताः ॥ ५६ ॥
भल्लाटे च महेन्द्रे राक्षसपादे तु पुष्पदन्तपदे ।
द्वारायतनस्थानं जलमार्गाश्चापि चत्वारः ॥ ५७ ॥
वितथ[5]पदेऽथ जयन्ते सुग्रीवांशे च मुख्यदेवपदे ।
भृशपूषभृङ्गराजौ दौवारिकशोषनागदितिजलदाः ॥ ५८ ॥
स्थानमुपद्वाराणामष्टौ देवा इमे कथिताः ।
त्रिकरं पञ्चकरं तत् सप्तकरं द्वारविस्तारम् ॥ ५९ ॥

---

१. 'त्र्यंशकै', २. 'भि', ३. 'भेदमिति कथितम्', ४. 'भागेषु पु', ५. 'थे पदे ज' ख. पाठः. ६. 'ज' क. पाठः.

तारद्विगुणोत्सेधं चाध्यर्धं वाङ्घ्रिहीनं तत् ।
सर्वेषां ग्रामाणां परितः परिखा बहिश्च वप्राश्च ॥ ६० ॥
ग्रामादयोऽपि नद्या दक्षिणतीरे तदन्वितायामाः।
नवनवमुनिवसुभागे मध्ये ब्राह्मं ततः परं दैवम्॥ ६१॥
मानुषमथ पैशाचं क्रमशः सैङ्कल्प्य युक्त्या तु।
दैविकमानुषभागे विप्राणां स्याद् गृहश्रेणी ॥ ६२ ॥
कर्मोपजीविनां स्यात् पैशाचे तत्र वा द्विजावासम्।
तस्मिन् सुरगणभवनं क्रमशः प्रागादिषु स्थाप्यैम् ॥
एतस्याभ्यन्तरे विप्रदेवतास्थापनं भवेत्।
शिवहम्यञ्च ग्रामाणां संबाह्ये तु वा भवेत् (?)॥ ६४ ॥
भृङ्गराजांशके वापि पावके तु विनायकम् ।
ऐशांशे शिवहर्म्यं स्यात् सौम्ये वानान्तरेषु वा ॥ ६५ ॥
बाह्येऽस्य तु गृहश्रेणी मानेन विधिना कुरु ।
शैवानां परिवाराणां प्रोच्यमासमुच्यते (?) ॥ ६६ ॥
सूर्यपदे सौरं स्यादग्निपदे कालिकावेश्म।
भृशभागे विष्णुर्गृहं याम्यायां षण्मुखस्थानेम् ॥ ६७ ॥
भृशभागे मृगांशे तु नैर्ऋत्यां केशवालयम्।
सुग्रीवांशे गणाध्यक्षः पुष्पदन्तपदेऽपि वा ॥ ६८ ॥
आर्यकभवनं निर्ऋतौ वरुणे विष्णोर्विमानं स्यात् ।
स्थानकमासनशयनं धाम्न्येतस्मिन् क्रमेण चोर्ध्वतलात्॥

---

१. 'चार्धं', २. संलक्ष्य यु', ३. 'प्यम् ॥ सू', ४. 'पदं या' ख. पाठः, ५. 'नम् । आ' क. पाठः, ६. 'क्त' ख. पाठः.

अथवा मूलतलं घनमुपरितले स्थानकं प्रो[1]क्तम् ।
सुगतालयमथ सुगले भृङ्गनृपे चैव नृ[2]पधाम ॥ ७० ॥
मदिरालयमथ[3] वायौ मुख्ये कात्यायनीवासैः[4] ।
सोमे धनदगृहं वा मातॄणामालयं तत्र ॥ ७१ ॥
ईशे शङ्करभवनं पर्जन्यांशे जयन्ते वा ।
सोमे [5]धनदगृहं वा शोषपदे वा विधातव्यम् ॥ ७२ ॥
तत्र गजाननभवनं ह्यदितौ वा मातृकोष्ठं स्यात् ।
मध्ये विष्णोर्धिष्ण्यं तत्र सभामण्डपं प्रोक्तम् ॥ ७३ ॥
ब्रह्मस्थानैशाने वाग्नेय्यां वा सभास्थानम् ।
तदुदक्पश्चिमभागे हरि[6]सदनं दक्षिणे परतः ॥ ७४ ॥
क्रूरसमेतं कर्म प्रलयमथ पञ्च मध्ये तु ।
युग्मायुग्मपदे च ब्रह्मस्थानेऽष्टनवभागे ॥ ७५ ॥
व्यपनीयाजं भागं प्रागादिषु दिक्षु च क्रमशः ।
नलिनकभवनं स्वस्तिकनन्द्यावर्तौ [7]प्रलीनकं चैव ॥ ७६ ॥
यच्छ्रीप्रति[8]ष्ठिताख्यं चतुर्मुखहर्म्यं तु पद्मसमम् ।
विष्णुच्छन्दविमानं त्रितलादिद्वादशतलान्तम् ॥ ७७ ॥
बहिरप्येवं[9] सौधं ग्रामादिषु तत्र विज्ञेयम् ।
स्थितमासीनं शयनं यत्र यदिष्टं तु [10]तत्र तत् स्थाप्यम् ॥

---

१. 'वो', २. 'जिनधा', ३. 'भ्रे' ख. पाठः. ४. 'सम् ।' क. पाठः. ५. 'सोमगृ', ६. 'सभां द', ७. 'न', ८. 'द्वाख्यं' ख. पाठः. ९. 'वं सर्वग्रा' क. पाठः. १०. 'तत्' ख. पाठः.

उत्कृष्टमध्यमाधमनीचादिकं क्रमेणैवम् ।
भवनं ग्रामेषूदितमिति नीचं चोत्तमे न स्यात् ॥ ७९ ॥

क्षुद्रे क्षुद्रविमानं यद्यत्रैवोचितं विधातव्यम् ।
त्रिचतुष्पञ्चतलं तद्धीने हीने च सामान्यम् ॥ ८० ॥

ग्रामे वा नगरे वोत्कृष्टे देवालयं तु नीचं चेत् ।
नीचा भवन्ति पुरुषाः स्त्रियोऽपि दुःशीलतां यान्ति ॥

तस्मात् सममधिकं वा तत्सङ्ख्येवं प्रयोक्तव्या ।
हरिहरसदनं वास्तुकमन्यत् सर्वं यथेष्टं स्यात् ॥ ८२ ॥

चण्डेश्वरः कुमारो धनदः काली च पूतना चैव ।
कालीसुतश्च खड्गी चैते दौवारिकाः प्रोक्ताः ॥ ८३ ॥

प्राक्प्रत्यङ्मुखमैशं ग्रामादिषु तत्पराङ्मुखं शुभदम् ।
विष्णुगृहं सर्वमुखं ग्रामस्यान्तर्मुखं शुभदम् ॥ ८४ ॥

शेषं पूर्वाभिमुखं मातॄणामुत्तराभिमुखम् ।
प्रत्यग्द्वारं सौरं गेहारम्भात् पुरामरावासम् ॥ ८५ ॥

हृदये वंशस्थाने शूले सूत्रे च सन्धौ च ।
कर्णसिरायां षट्के नोक्तान्यमरालयादीनि ॥ ८६ ॥

गोशाला दक्षिणतश्चोत्तरदेशे तु पुष्पवाटी स्यात् ।
पूर्वद्वारोपान्ते पश्चिमतस्तापसावासम् ॥ ८७ ॥

---

१. 'द्रे वि' क. पाठः. २. 'या' ख. पाठः. ३. 'मातृमु' क. पाठः.
४. 'रे वापि प' ख. पाठः.

सर्वत्रैव जलाशयमिष्टं वापी च कूपं च ।
वैश्यानां दक्षिणतः परितः सदनं तु शूद्राणाम् ॥ ८८ ॥
प्राच्यां वाप्युत्तरतो गेहं कुर्यात् कुलालानाम् ।
तत्रैव नापितानामन्यत्कर्मोपयुक्तानाम् ॥ ८९ ॥
मत्स्योपजीविनां स्याद् वासं वायव्यदेशे तु ।
पश्चिमदेशे मांसैरुपवृत्तीनां निवासः स्यात् ॥ ९० ॥
तैलोपजीविनां चैवोत्तरदेशे गृहश्रेणिः ।
धनुभिस्त्रिपञ्चसप्तभिरथ नवभिर्गृहावधिः प्रोक्तः ॥ ९१ ॥
दण्डाभ्यामथ तस्मादायामं वर्धयेत् क्रमशः ।
व्यासद्विगुणावधिकं यावद् दैर्घ्यं ग्रहीतव्यम् ॥ ९२ ॥
तत्रैव हस्तमानैर्गेहं कुर्याद् यथाविधिना ।
रुचकैः स्वस्तिकमथवा नन्द्यावर्तं च सर्वतोभद्रम् ॥
स्याद् वर्धमानमेषामाकृत्या तच्चतुर्गृहं प्रोक्तम् ।
दण्डकशालालाङ्गलमथवा शूर्पं यथेष्टं स्यात् ॥ ९४ ॥
ग्रामात् किञ्चिद्दूरे पावकदेशेऽथवा वायौ ।
वासः स्यात् स्थपतीनां शेषाणां तत्र कर्तव्यम् ॥ ९५ ॥
तस्मात् किञ्चिद्दूरे रजकादीनां निवासः स्यात् ।
चण्डालकुटीराणि पूर्वीयां क्रोशमात्रे तु ॥ ९६ ॥
चण्डालयोषितस्तास्ताम्रायःसीसभूषणाः सर्वाः ।
पूर्वाह्णे मलमोक्षक्रियोचितां ग्राममावेश्यं ॥ ९७ ॥

---

१. 'श्यादीनां', २. 'च', ३. 'कं', ४. 'तैश्च स', ५. 'त', ६. 'श्याः ॥' ख. पाठः.

प्रागुत्तरदिशि दण्डैः पञ्चशतैः स्याच्छ्वावासम् ।
शेषाणामपि तत्तद्दूरे देशे श्मशानं स्यात् ॥ ९८ ॥

चण्डालचर्मकारश्मशानतोयाशयापयानं च ।
देवगृहविश्वकोष्ठग्रामावृतदेशमार्गपरिवृत्तिः ॥ ९९ ॥

व्यसनं ग्रामविनाशो नृपभङ्गो भवति मरणं च ।
देवालयान्तरापणशून्यत्वं शोध्यसञ्चयं चापि ॥ १०० ॥

मार्गेऽशुद्धक्षेपणमीदृग् ग्रामस्य शून्यतादायि ॥ १००½ ॥
ग्रामादीनां च सर्वेषां गर्भविन्यासमुच्यते ॥ १०१ ॥

सगर्भे सर्वसम्पत्त्यै विगर्भे सर्वनाशनम् ।
तस्मात् सर्वप्रयत्नेन गर्भं सम्यग् विनिक्षिपेत् ॥ १०२ ॥

मृत्कन्दधान्यसल्लोहधातुरत्नेन्द्रनीलकैः ।
पणेन गर्भद्रव्याणि निर्दोषाण्येव सङ्गृहेत् ॥ १०३ ॥

सलिलापूरिते श्वभ्रे मृदादीनि न्यसेद् बुधः ।
धान्योपरि निधातव्यं ताम्रभाजनमभ्रमम् ॥ १०४ ॥

ताम्रभाजनविस्तारं पञ्चधा परिकीर्त्तितम् ।
रविद्वादशपङ्क्त्यष्टचतुरङ्गुलमानतैः ॥ १०५ ॥

उन्नतं तावदेवं स्याद् वृत्तं स्याच्चतुरश्रकम् ।
सपञ्चपञ्चकोष्ठं वा नवकोष्ठकमेव वा ॥ १०६ ॥

उपपीठपदे देवास्तस्मिन् पात्रे तु सम्मताः ।
रजतेन वृषः सूर्ये वज्री हाटकनिर्मितः ॥ १०७ ॥

---

१. 'च्छि' ख. पाठः. २. 'क' क. पाठ.. ३. 'गृह्यताम् ॥', ४. 'तम् ॥', ५. 'वा चतु', ६. 'र्यो' ख. पाठः.

यमे तु यमराजश्च[1] शुल्बेनायसवारणः ।
[2]हैमः सिंहस्तु रूप्येण वरुणे सजलाधिपैः[3] ॥ १०८ ॥
वाजी श्वेतमयः सोमे राजतो द्विजराजकः ।
ईशे वैक्रन्तमनले त्रपु सीसं तु नैर्ऋते ॥ १०९ ॥
स्वर्णं[4] समीरणे जातिहिङ्गुल्यं तु जयन्तके ।
हरितालं भृशे भागे वितथे तु मनःशिला ॥ ११० ॥
माक्षिकं भृङ्गराजे स्याद् राजावर्त्तं सुकन्धरे ।
गैरिकं शोषभागे तु गणमुख्येऽञ्जनं भवेत् ॥ १११ ॥
अदितौ दरदं विद्यादेवमेव न्यसेत् क्रमात् ।
चतुष्पदे च लोकेशाः स्थाप्याश्चाभ्यन्तरावनाः ॥ ११२ ॥
षड्भिः पञ्चचतुस्त्रिद्विमात्रे विम्बोदयं भवेत् ।
तदर्धं वाहनोत्सेधं स्थानकासनमेव वा ॥ ११३ ॥
मुक्तापवत्से मरिचौ विद्रुमं सवितर्यथ ।
पुष्यरागं च वैडूर्यं विवस्वति विनिक्षिपेत् ॥ ११४ ॥
वज्रमिन्द्रजये विद्यादिन्द्रनीलं तु मित्रके ।
रुद्रराजे महानीलं मरतकं तु महीधरे ॥ ११५ ॥
मध्यमे पद्मरागं तु विन्यसेद् गर्भभाजने ।
रत्नानि धातवश्चैव स्वस्वविस्तारभाजने ॥ ११६ ॥
तद्देवस्थानभावज्ञैरानीतानि[5] निधापयेत् ।
हेमायस्ताम्ररूप्यैश्च स्वस्तिकानि चतुर्दिशि ॥ ११७ ॥

---

१. 'स्य' ख. पाठः. २. 'हेमसिंहं तु रू', ३. 'पम् ॥' क. पाठः.
४. 'फणं स', ५. 'स्तानि तानि विभास्यताम् ।' ख. पाठः.

ब्रह्मस्थानाद् बहिश्चानि पूर्वादौ स्थापयेत क्रमात् ।
स्वर्णेन शालिं रूप्येण व्रीहिं चायसकोद्रवम् ॥ ११८ ॥
त्रपुकेङ्कु सीसमाषं तिलं वैक्रुन्तकल्पितम् ।
मुद्गं चायोमयं ताम्रं कुलत्थमिति लोहजान् ॥ ११९ ॥
भाजनाय बलिं दत्त्वा पश्चात् सर्वं निधापयेत ।
अङ्गुलाधिकविस्तीर्णमायामं द्वादशाङ्गुलम् ॥ १२० ॥
पञ्चाङ्गुलेन वृद्धिः स्यादा द्वात्रिंशत्प्रमाणतः ।
खादिरं चेन्द्रकीलं स्यात् तस्याग्रं[2] चित्रवृत्तकम् ॥ १२१ ॥
भाजनोपरि तत स्थाप्यं गर्भन्यासविचक्षणैः ।
स्थानीये द्रोणमुखे खर्वटे[3] प्रतिनागरे ॥ १२२ ॥
ग्रामे च निगमे खेटे पत्तने कोत्मकोलके ।
ब्रह्मण्यार्यार्कभागेऽपि[4] विवस्वति यमे तथा ॥ १२३ ॥
मित्रे च वरुणे चैव सोमे च पृथिवीधरे ।
द्वारदक्षिणदेशे वा ह्येतेषां गर्भ इष्यते ॥ १२४ ॥
पुष्पदन्ते च भल्लाटे महेन्द्रे च गृहक्षते ।
विष्णुस्थाने श्रियः स्थाने स्कन्दस्थानेऽथवा पुनः ॥ १२५ ॥
स्थापयेद् ग्रामरक्षार्थं सर्वकामाभिवृद्धये ।
गर्भमादौ विनिक्षिप्य बिम्बं तदुपरि न्यसेत्[5] ॥ १२६ ॥
शिलेष्टकचिते खाते पुरुषाञ्जलिमात्रके ।
अनुक्तानां च सर्वेषामजभागादिषु न्यसेत्[6] ॥ १२७ ॥

---

१. 'स', २. 'च', ३. 'खर्वाटे', ४. 'तु', ५. 'त् ॥ अनु',
६. 'त् ॥ शिलेष्टकाचिन्तखान्तपुरुषाञ्जलिमात्रके । सुर' ख. पाठः.

सुरक्षं[1] तु यथागर्भं स्थपतिः स्थापयेत् स्थिरम्[2]।
अत्रानुक्तं तु तत् सर्वं द्रष्टव्यं गर्भलक्षणे ॥ १२८ ॥

एवं प्रोक्ता भूमितिर्देवतानां
वर्णानां चाप्यत्र जात्यन्तराणाम्।
ग्रामादीनां मानविन्यासमार्गं
सालङ्कारं चारु संक्षिप्य तन्त्रात्[3] ॥ १२९ ॥

(सक्ता ? दद्या)न्नृपः स्थपतिकादिचतुष्टयेभ्यो
मानादिकर्मनिपुणेभ्य इडां च गां च।
नित्यं यथा जगति वित्तमनेकवस्तू-
न्याचन्द्रतारमधिवासभुवं मुदा सः ॥ १३० ॥

इति मयमते वस्तुशास्त्रे ग्रामविन्यासो नाम
नवमोऽध्यायः।

अथ दशमोऽध्यायः।

नगरादीनां मानं विन्यासं च क्रमादहं वक्ष्ये।
आद्यं धनुषां त्रिशतं तस्माच्छतदण्डवर्धनादुपरि ॥ १ ॥
साष्टकसप्ततिभेदाश्चाष्टसहस्रान्तकं यावत्।
नगराणां विपुलं हि प्रोक्तं पूर्वोक्तमानेन ॥ २ ॥
शतदण्डादिर्दिशर्द्धर्या[4] त्रिःसप्तत्रिशतदण्डान्तम्।
क्षुद्राणामिदमुदितं नगराणामेव सर्वेषाम् ॥ ३ ॥

---

१. 'क्ष्यं', २. 'क्रमात् ॥ अ', ३. 'त् ॥ इति ग्रामवि',
४. 'शतर्ध्या' ख. पाठः.

उत्कृष्टपुरपरिधिर्नृपतेर्यष्टिद्विरष्टसाहस्रैः ।
चातुःसहस्रकान्तं पञ्चशतोनाद्धि[1] पञ्चपञ्चधा मानम् ॥
त्रिशतादिचतुःशतकं यावद् वृद्ध्या तु विंशतिभिः ।
षड्विधमुक्तं खेटं श्रेष्ठे मध्ये परे विपुलम् ॥ ५ ॥
तस्मात् त्रिरष्टवृद्ध्या द्रोणमुखे पञ्चधा मानम् ।
(स ?)षण्णवतिचतुःशतकं यावत् तावत्तु विस्तारम् ॥ ६ ॥
द्विशतादि चतुःशतकं यावत् पञ्चाशदभिवृद्ध्या ।
पञ्चप्रमाणमेवं[2] खर्वटविस्तार उद्दिष्टः[3] ॥ ७ ॥
द्विशतादिपङ्क्तिवृद्ध्या चत्वारिंशत्त्रिशतदण्डं स्यात् ।
यावन्निगमे विपुलाः प्रोक्तास्त्रिःपञ्चभेदाश्च ॥ ८ ॥
शतदण्डे शतवृद्ध्या पञ्चशतं यावदुद्दिष्टम् ।
स्यात् कोत्मकोलकानां विपुलं पञ्चैव भेदेन ॥ ९ ॥
तावन्मानं प्रोक्तं पुरविपुले सूरिभिः प्राज्ञैः ।
यावत् पञ्चशतान्तं द्विशतादारभ्य सप्तधा मानम् ॥
पञ्चाशद्धनुवृद्ध्या विपुलं कथितं विडम्बस्य ।
प्रागुपदिष्टं मानं ह्येतन्मानं तु वैतेषाम् ॥ ११ ॥
द्विगुणं त्रिपादमर्धं पादं तेषां मुखायतं विपुलात् ।
विपुले तु षडष्टांशे भागेनैकेन वायतं पुरतः[5] ॥ १२ ॥

---

१. 'द्धि पञ्चधा' ख. पाठः. २. 'मुदितं ख' क. पाठः. ३. 'ष्टः । स्या' ख. पाठः. ४. 'तं प्रार' क. पाठः. ५. 'तः ॥ ज्येष्ठे ज्येष्ठायतकं मध्ये मध्यं तथाधमे नीचम् । च' ख. पाठः.

चतुरश्रमायताश्रं वृत्तं वृत्तायतं च पुनः ।
स्याद् गोलवृत्तमेषां वप्राकारास्तु पञ्चैव ॥ १३ ॥

पङ्क्त्यष्टसप्तपञ्चकचतुरंशैस्तत् कृते[2] विपुले ।
मुनिरसशरयुगशिखिभिर्भागैर्वप्रावधिः प्रोक्तः ॥ १४ ॥

द्वित्रिचतुर्हस्तं स्याद् विपुलं सालस्य तुङ्गे तु ।
सप्तदशैकादशभिर्हस्तैरग्रं त्र्यंशोनम् ॥ १५ ॥

परितः परिखा बाह्येऽबाह्ये देवालयादीनि ।
पेचकभागाद्यासन्नभागान्तं चण्डितं प्रोक्तम् ॥ १६ ॥

मूत्रादीन्यथ विषमस्थानानि[5] च वर्जयेन्मतिमान् ।
प्रागुदगग्रं मार्गं तत्र यथेष्टं न्यसेद् विधिना ॥ १७ ॥

दण्डादिसप्तदण्डं यावद् दण्डार्धवृद्ध्या तु ।
मार्गविशालाश्चैते त्रयोदशभेदाः समुद्दिष्टाः ॥ १८ ॥

राष्ट्रस्य मध्यभागे सज्जनबहुले नदीसमीपे च ।
नगरं केवलमथवा राजगृहोपेतराजधानी वा ॥ १९ ॥

दिक्षु चतुर्द्वारयुतं गोपुरयुक्तं तु सालाढ्यम् ।
क्रयविक्रयकैर्युक्तं सर्वजनावाससङ्कीर्णम् ॥ २० ॥

सर्वसुरालयसहितं नगरमिदं केवलं प्रोक्तम् ।
प्रत्यगुदग्दिशि गहनां परितः साला बहिः सपांसुचया ॥

---

१. 'प्राः कथितास्तु', २. 'तं' क. पाठः. ३. 'नवैका', ४. 'नकान्तं', ५. 'नि व' ख. पाठः. ६. 'ण्डान्तं या' क. पाठः. ७. 'गहनयुता', ८. 'हिस्तु पांसुयुता ॥' ख. पाठः.

परितः परिखा बाह्ये शिबिरयुतानेकमुखरक्षा ।
पूर्वायां दक्षिणतश्चाभिमुखा राजबलयुक्ता ॥ २२ ॥
उन्नतगोपुरयुक्ता नानाविधमालिकोपेता ।
सर्वसुरालयसहिता नानागणिकान्विता बहूद्याना ॥
हस्त्यश्वरथपदातिबहुमुख्या सर्वजनयुक्ता ।
द्वारोपद्वारै[1]र्युताभ्यन्तरतोऽनेकजनवा[2]सा ॥ २४ ॥
या नृपवेश्म[3]समेता सा [4]कथिता राजधानीति ।
काननवनदेशे वा सर्वजनावाससङ्कीर्णम् ॥ २५ ॥
क्रयविक्रयकैर्युक्तं पुरमुदितं यत् तदेव नगरमिति ।
शूद्रैरधिष्ठितं यन्नद्यचलावेष्टितं तु तत् खेटम् ॥ २६ ॥
परितः पर्वतयुक्तं खर्वटकं सर्वजनसहितम् ।
खर्वटखेटकमध्ये यज्जनता[5]ढ्यं जनस्थानकुब्जम् ॥ २७ ॥
द्वीपान्तरागतवस्तुभिरभियुक्तं सर्वजनसहितम् ।
क्रयविक्रयकैर्युक्तं रत्नधनक्षौ[6]मगन्धवस्त्वाढ्यम् ॥ २८ ॥
सागरवेलाभ्याशे तदनुगतायामि पत्तनं प्रोक्तम् ।
परनृपदेशसमीपे युद्धारम्भक्रियोपेतम् ॥ २९ ॥
सेनासेनापतियुतमिदमुदितं शिबिरमिति च [7]चरैः ।
सर्वजनैः सङ्कीर्णं नृपभवनयुतं तदेव तथा ॥ ३० ॥
बहुरक्षोपेतं यत् सेनामुखमुच्यते तज्ज्ञैः ।
नद्यद्रिपार्श्वयुक्तं नृपभवनयुतं सबहुरक्षम् ॥ ३१ ॥

---

१. 'राभ्य', २. 'ला', ३. 'श्य', ४. 'राजधानिका कथिता ।', ५. 'पासं तु तत् कु', ६. 'मवस्त्राढ्यम् ।', ७. 'प' ख. पाठः.

यन्नृपतिस्थापितकं तत् स्थानीयं समुद्दिष्टम् ।
नद्यब्धिदक्षिणादक्षिणभाग् वणिगादिसंयुक्तम् ॥३२॥

सर्वजनो[१]वासं यद् द्रोणमुखं प्रो[२]क्तमाचार्यैः ।
ग्रामसमी[३]पे जनतालयमिदमुदि[४]तं विडम्बमिति ॥ ३३ ॥

वनमध्ये जनवासं यत् कोत्मकोलकं प्रोक्तम् ।
चातुर्व[५]र्ण्यसमेतं सर्वजनावाससङ्कीर्णम् ॥ ३४ ॥

बहुकर्मकारयुक्तं यै[६]न्निगमं तत् समुद्दिष्टम् ।
नद्यद्रिवनसमेतं बहुजनयुं[७]क्तं सनृपवासम् ॥ ३५ ॥

एतत् स्कन्धावारं तत्पार्श्वे चेरिका प्रोक्ता ।
गिरिव[८]र्नजलपङ्केरिणदैवतमिश्राणि सप्त दुर्गाणि ॥ ३६ ॥

गिरिमध्यं गिरिपार्श्वे गिरिशिखरं पार्वतं दुर्गम् ।
अजलं तरुवनगहनं वनदुर्गं तदुभयं तुं[१०] मिश्रं स्यात् ॥

दैवं तु सहजदुर्गं पङ्कयुतं पङ्कदुर्गं स्यात् ।
नद्यब्धिपरिवृतं यज्जलदुर्गं निर्व[९]नोदमिरिणं स्यात् ॥३८॥

अक्षयजलान्नशस्त्रं ह्यतिविपुलोत्तुङ्गघनसालम् ।
सर्वं हि दुर्गजालं[११] सप्राकारं त्वै[१२]नेकमुखरक्षम् ॥ ३९ ॥

---

१. 'नैः सङ्कीर्णं द्रो', २. द्रोणयुङ्नदितम् ।', ३. 'पजनाल', ४. 'तं तद् वि', ५. 'र्णसीमान्तं स', ६. 'निगमं' ख. पाठः. ७. 'वासं हि सनृप', ८. 'नजनज' क. पाठः. ९. 'निर्जलत', १०. 'च' ख. पाठः. ११. 'तं' क. पाठः. १२. 'सपारेघमु' ख. पाठः,

बहिरुदकं[1] रहितवनं छिन्नपथं[2] दुष्प्रवेशं च ।
गोपुरमण्डपयुक्तं सोपानच्छिन्नमच्छिन्नम्[3][4] ॥ ४० ॥
द्विकवाटचतुष्परिघार्गलहस्तोन्नतेन्द्रकीलयुतम्[5] ।
सस्थूणमध्यमालयमिण्ठकसहितं सगूढसोपानम् ॥ ४१ ॥
द्वाराणि मण्डपसभाशालाकाराणि कार्याणि ।
द्वादश सालाकाराश्चतुरं[6][7] वृत्तं तदायतं च पुनः ॥ ४२ ॥
चक्रं[8] वृत्तं कौक्कुटमिह कुम्भं नागवृत्तं च ।
मग्नचतुरं त्रिकोणमष्टाश्रं नेमिखण्डं च ॥ ४३ ॥
प्राकाराश्चेष्टकया द्वादशहस्तोच्छ्रिताहीनाः ।
उत्सेधार्धविशाला मूले भित्तिः ससञ्चारा ॥ ४४ ॥
सर्वस्याभ्यन्तरतः पांसुचयोपर्यनेकयन्त्रयुतम् ।
परितः परिखोपेतं पांसुचये संहताट्टालम्[9] ॥ ४५ ॥
परितः शिबिरोपेतं नानाजनवाससङ्कीर्णम् ।
नृपभवनसमोपेतं हस्त्यश्वरथपदातिबहुमुख्यम् ॥ ४६ ॥
धान्यैस्तैलैः[10] क्षारैः सलवणभैषज्यगन्धविषम् ।
लोहाङ्गारस्नायुविषाणवेण्विन्धनैर्युक्तम् ॥ ४७ ॥
तृणचर्मकीरयुक्तं[11] सैवल्कलं[12] सारदारुयुतम् ।
दुर्गं दुर्गममुक्तं दुर्लङ्घ्यं दुरवगाहं च ॥ ४८ ॥

---

१. 'करहितवनच्छन्न' ख. पाठः. २. ३. ४. 'च्छि', ५. 'षद्वर्ग',
६. 'शा', ७. 'रश्रं वृत्तगायतं च पुरम्' क. पाठः. ८. नन्द्यावर्तं कौ',
९. 'युक्तमट्टा' १०. 'न्यस्नेहक्षारं स', ११. 'शाक्यु' ख. पाठः.
१२. 'वल्कैः सा' क. पाठः.

रक्षार्थं च जयार्थं द्वारिभिरभेद्यं च दुर्गमिष्टं स्यात् ।
इन्द्रश्च वासुदेवो गुहो जयन्तश्च वैश्रवणः ॥ ४९ ॥
अश्विन्यौ श्रीमदिरे शिवश्च दुर्गा सरस्वती चेति ।
प्राकारान्तर्दिव्या दुर्गनिवेशे च विज्ञेयाः ॥ ५० ॥
एवं दुर्गविधानं सम्यक् प्रोक्तं पुरातनैर्मुनिभिः ।
सर्वेषां विन्यासं संक्षेपाद् वक्ष्यते क्रमशः ॥ ५१ ॥
प्राक्प्रत्यग्गतमार्गा द्वादश दश वाष्ट षट्चतुर्युगलम् ।
तावदुदीची[1]नास्ते तत्रैवायुग्मसङ्ख्या वा[2] ॥ ५२ ॥
एकादशनवसप्तकपञ्चगुणा[3] वै[4]कमार्गा[5] वा ।
युग्मायुग्मपदेषु द्व्येकत्रिभिरंशकैरजांशाः स्युः ॥ ५३ ॥
नगरादीनामेवं मार्गाण्युदितानि सर्वेषाम् ।
दण्डवदेका वीथी तद्दण्डकमित्यभीष्टं स्यात् ॥ ५४ ॥
उत्तरदिङ्मुखमेकं तन्मध्ये संप्रयुक्तं चेत् ।
कर्तरिदण्डकमुदितं प्राचीनौ[6] कुट्टिमौ तर्हि ॥ ५५ ॥
तद् बाहुदण्डकं स्याद् दिक्षु चतुर्द्वारसंयुक्तम् ।
बहुकुट्टिमसंयुक्तं मध्ये[7] वीथ्या द्विपार्श्वे तु ॥ ५६ ॥
शेषं पूर्ववदिष्टं कुटिकामुखदण्डकं प्रोक्तम् ।
प्राचीनोदीचीनैर्मार्गैस्त्रिभिरेव संयुक्तम् ॥ ५७ ॥
तत् कलकाबन्धदण्डकमिति तज्ज्ञैः समुद्दिष्टम् ।
प्राङ्मुखवीथ्यास्तिस्रश्चोत्तरमार्गास्त्रयश्चैव ॥ ५८ ॥

---

१. 'चेवास्ते', २. 'या' क. पाठः ३. 'णो' ख. पाठः, ४. 'चै', ५. 'गैं' क. पाठः. ६. 'नौ तौ कु', ७. 'ध्यं' ख. पाठः.

एकैकान्तरितास्ते कुट्टिममार्गास्त्वनेकाश्च।
वेदीभद्रकमुदितं नगरादीनामिदं शस्तम्॥ ५९॥
स्वस्तिकमुदितं ग्रामे यथा तथा स्वस्तिकं विद्यात्।
प्रागुत्तरमुखमार्गाः षट्षडभीष्टास्तु तद्वाह्ये॥ ६०॥
प्रागिव मार्गोपेतं वीथिपदं स्वस्तिकं चैवं।
प्राचीनोदीचीनाश्चत्वारश्चैव मार्गाः स्युः॥ ६१॥
ब्रह्मावृतपथमेकं कुट्टिममार्गास्त्रयः प्राच्याम्।
एतद् भद्रकमुदितं नाम्ना नगरादिविन्यासम्॥ ६२॥
प्राङ्मुखमार्गाः पञ्चैवोत्तरमार्गास्तथैव स्युः।
बहुकुट्टिमसंयुक्तं भद्रमुखं नाम वस्तु स्यात्॥ ६३॥
प्राचीनास्तु षडेवैवोत्तरवक्रास्तथा मार्गाः।
यद् बहुकुट्टिमयुक्तं तद्वस्तु[2] च भद्रकल्याणम्॥ ६४॥
पूर्वापरमुखमार्गाः सप्तैवोदङ्[3]मुखाश्च तथा।
शेषं प्रागिव सर्वं विन्यासं तन्महाभद्रम्॥ ६५॥

अष्टौ पूर्वमुखास्ते मार्गाश्चाष्टावुदग्वक्राः।
द्वादशमार्गोपेतं बह्वर्गलकुट्टिमैर्युक्तम्॥ ६६॥
यत् तद् वस्तुसुभद्रं नाम्ना विन्यासमुद्दिष्टम्।
नवनवमार्गाश्चैते प्राचीनाश्चाप्युदीचीनाः॥ ६७॥

द्वारोपद्वारयुतं कुट्टिममार्गार्गलैर्युक्तम्।
राजगृहोपेतं यन्नगरं नाम्ना जयाङ्गं स्यात्॥ ६८॥

---

१. 'तत्।', २. 'स्तु भ', ३. 'दक् तथावक्राः। शे' ख. पाठः.

प्राचीना दश मार्गाश्चोत्तरमार्गास्तथैव स्युः ।
नृपमन्दिरसंयुक्तं युक्त्यानेकार्गलोपेतम् ॥ ६९ ॥

बहुकुट्टिमसंयुक्तं विजयं नाम्ना वरैः प्रोक्तम् ।
प्राचीनास्त्वेकादश मार्गा रुद्रा उदीचीनाः ॥ ७० ॥

ब्रह्मांशादपरांशो[1] यद्भीष्टं तत्र नृपवासम् ।
तन्मुखतोऽदभ्रमहाङ्गणकं स्यादिष्टभागे तु ॥ ७१ ॥

तत्रान्तः पुरवासं शेषं सर्वं समुन्नेयम् ।
तत्प्रागु[2]द्गतमार्गा सा कथिता राजवीथीति ॥ ७२ ॥

तस्या द्विपार्श्वयोः स्यात् सैश्वर्याणां[3] तु मालिकापङ्क्तिः ।
तत्पार्श्वयोर्निवासो वणिजां स्यात् तस्य दक्षिणतः ॥ ७३ ॥

स्यात् तन्तुवायवासं ह्युत्तरतश्चक्रिणां वासम् ।
तत्तज्जात्यन्तरगृहमर्थे तत्सामीप्यतः कुर्यात् ॥ ७४ ॥

शेषं प्रागिव सर्वं योग्यं तत् सर्वतोभद्रम् ।
एवं षोडश भेदा ह्युदिताश्चाद्यैर्मुनीन्द्रैस्तु ॥ ७५ ॥

मार्गच्छेदं नेष्टं पदमध्ये चत्वरं न स्यात् ।
शेषं युक्त्यानुक्तं सम्यग् योज्यं नृपेच्छया तज्ज्ञैः ॥

क्षुद्राणामपि चैषां मध्यानां चापि सर्वेषाम् ।
तत्र कुटुम्बावलिकं वक्ष्येऽहं चान्तरापणकम् ॥ ७७ ॥

परितो रथपथयुक्तं मध्ये वणिजां गृहश्रेणी ।
तद्दक्षिणतः पार्श्वे गेहं स्यात् तन्तुवायानाम् ॥ ७८ ॥

---

१. 'शे', २. 'ग्दिग्गतमार्गा सा राजवीथिका कथिता ॥', ३. 'णां मा' ख. पाठः. ४. 'भ सामी', ५. 'दान्युदितान्याद्यै' क. पाठः.

उत्तरतस्तद्वासावलिकं स्याच्चक्रिकाणां तु ।
कर्मोपजीविनां स्याद् वासं रथपथ्यनेकानाम् ॥ ७९ ॥

ब्रह्मावृतपथमेकं तत्रान्तरापणं कार्यम् ।
ताम्बूलादि फलं च प्रोक्तं सारान्वितं द्रव्यम् ॥ ८० ॥

ईशानादिमहेन्द्रद्वारान्तं चान्तरापणकम् ।
तत्रैव मत्स्यमांसं शुष्कं शाकं च विज्ञेयम् ॥ ८१ ॥

महेन्द्राद्यग्न्यन्तं भक्ष्यं भोज्यं च निर्दिष्टम् ।
अग्न्यादि[1]क्षतगृहपर्यन्तं तत्र भाण्डानि[2] ॥ ८२ ॥

तस्मान्निर्ऋतिपदान्तं कंसादिकमत्र विज्ञेयम् ।
स्यात् पुष्पदन्तभागान्तं पितृभागादि वस्त्रं स्यात् ॥ ८३ ॥

तस्मात समीरणान्तं तण्डुलैं[4]धान्यादिकं च कटम् ।
स्याद् भल्लाटपदान्तं वाय्वादि[5] कं वस्त्रकादीनाम् (?) ॥

तत्रैव लावणादिद्रव्यं तैलादि[6]कं ज्ञेयम् ।
तस्मादीशपदान्तं गन्धं पुष्पादिकं विहितम् ॥ ८५ ॥

एवं नवान्तरापणमुदि[7]तं तत्परितस्तु मध्ये[8] ।
अभ्यन्तरगतमार्गेष्वथ रत्नं हाटकं वस्त्रम् ॥ ८६ ॥

---

१. 'दिगृहक्षतप', २. 'दि' क. पाठः. ३. 'ण्डाणि ॥' ख. पाठः. ४. 'लमथ धान्यकं च कटकम् ।', ५. 'दि व' ख. पाठः. ६. 'दिभैषज्यम् ॥', ७. 'तं परि', ८. 'ध्ये तु ॥',

माञ्जिष्ठं तु[1] मरीचं पिप्पलकं चापि हारिद्रम् ।
मधुघृततैलादिकमथ भैषज्यं सर्वतः कार्यम् ॥ ८७ ॥
आर्यपदे च विवस्वति मित्रे पृथिवीधरे च पदे ।
शास्ता दुर्गा गजमुखलक्ष्म्यौ[2] चात्रैव विज्ञेयाः ॥ ८८ ॥
देवालयमथ[3] परितो ग्रामे यथा तथा विहितम् ।
परितः सर्वजनालयमुदितं किञ्चित् ततो दूरे ॥ ८९ ॥
नगराद् द्विशतं दण्डं नीत्वा प्राच्यां तु वा[4]ग्नेय्याम् ।
चण्डालकुटीराणि तत्रैव तु कोलिकानां तु[5] ॥ ९० ॥
अस्मिन् सर्वमनुक्तं ग्रामे[6] तु यथा तथा विहितम् ।
पत्तनमृजुवीथियुतं नैवं[7] स्यादन्तरापणं तत्र ॥ ९१ ॥
शेषाणामपि तत्तद्योग्यवशात् तत्र विज्ञेयम् ॥ ९१½ ॥

स्थानीयदुर्गपुरपत्तनकोत्मकोल-
द्रोणामुखानि निगमं च तथैव खेटम् ।
ग्रामं च खर्वटमितीह दशैव[8] युक्त्या-
धिष्ठानकानि कथितानि पुरातनार्यैः ॥ ९२½ ॥
एवं प्रोक्तं भूमिदेवादिकानां
वर्णानां चाप्यत्र जात्यन्तराणाम् ।
ग्रामादीनां मानविन्यासमार्गं
सालङ्कारं चारु संक्षिप्य तन्त्रात् ॥ ९३½ ॥

---

१. 'च', २. 'क्ष्म्यश्चात्रै', ३. 'तः', ४. 'चा', ५. 'च', ६. 'मे य', ७. 'वान्त', ८. 'दमशैव', ९. 'चात्र वि' ख. पाठः

(प्रे ? द)त्तान्नृपः स्थपतिकादिचतुष्टयेभ्यो
मानादिकर्मनिपुणेभ्य इडां च गाश्च ।
नित्यं यथा जगति वित्तमनेकवस्तू-
न्याचन्द्रतारमधिवासभुवं मुदा सः ॥ ९४ ॥

इति मयमते वस्तुशास्त्रे नगरविधानो नाम
दशमोऽध्यायः ।

अथैकादशोऽध्यायः ।

भूमिलम्भविधानं तु वक्ष्ये संक्षेपतः क्रमात् ।
चतुरश्रमायताश्रं वर्तुलं च तदायतम् ॥ १ ॥

अष्टाश्रं च षडश्रं च द्व्यश्रवृत्तं तथैव च ।
एतद् विन्यासभेदं स्यात् क्षयवृद्धिविधानतः ॥ २ ॥

भूमिलम्भमिति प्रोक्तं त्रिचतुर्हस्तमानतः ।
द्विद्विहस्तविवृद्ध्यैकं भूमेर्मानं चतुष्टयम् ॥ ३ ॥

पञ्चषड्ढस्तमारभ्य द्विद्विहस्तविवर्धनात् ।
द्वितले तु चतुर्मानं रुद्रभानुकरान्तकम् ॥ ४ ॥

सप्ताष्टहस्तमारभ्य द्विद्विहस्तविवर्धनात् ।
पञ्चदशविकारान्तं त्रितले पञ्चमानकम् ॥ ५ ॥

---

१. 'य' ख. पाठः. २. 'स्समाच' क. पाठः. ३. 'पि', ४. 'तु' ख. पाठः. ५. 'दाश्रयम्' क. पाठः. ६. 'कम् ॥' ख. पाठः.

नवपङ्क्तिकराद् यावत् पक्षषोडशहस्तकम् ।
चतुष्पञ्चतलं प्रोक्तं चतुर्मानं सनातनम् ॥ ६ ॥
एकहस्तं द्विहस्तं वा क्षुद्रमेकतलं स्मृतम् ।
युग्मायुग्मकरैर्मानैर्हस्तार्धोनसमन्वितैः ॥ ७ ॥
केचिद् वदन्ति देवानां मानुषाणां विमानके ।
विस्तारे सप्तषट्पञ्चचतुस्त्र्यंशेऽधिकं त्रिभिः ॥ ८ ॥
शान्तिकं पौष्टिकं जयदमद्भुतं सार्वकामिकम् ।
उच्छ्रायं द्विगुणं पादार्धाधिकं चापि सम्मतम् ॥
पञ्चदशकरव्यासाद्धीनं क्षुद्रविमानकम् ।
सप्ताष्टाधिकपङ्क्त्यादि द्विद्विहस्तविवर्धनात् ॥ १० ॥
आसप्ततेश्चतुर्भूम्यादीनि त्रीणि मतानि च ।
सप्तविंशतिभेदानि द्वादशान्तान्यनुक्रमात् ॥ ११ ॥
त्रिचतुर्विंशतिरत्नेर्यावच्छतकरान्तकम् ।
त्रित्रिहस्तविवृद्ध्या तु त्रिनवोत्सेधमिष्यते ॥ १२ ॥
एवमुत्कृष्टमानेषु श्रेष्ठमध्याधमं भवेत् ।
त्रिचतुष्पङ्क्तिहस्तादि द्विद्विहस्तविवर्धनात् ॥ १३ ॥
पञ्चषट्षष्टिहस्तान्तं सङ्ख्यया पूर्वसंस्कृतिः ।
चतुस्तलविमानादि द्वादशान्तं विधीयते ॥ १४ ॥
सप्ताष्टपङ्क्तेरारभ्य त्रित्रिहस्तविवर्धनात् ।
पञ्चषण्णवतिर्यावदुक्तं प्रागिव सङ्ख्यया ॥ १५ ॥

---

१. 'म'. २. 'र्धे' ख. पाठः. ३. 'मुन्नतैः ॥' क. पाठः.
४. 'च्छ्रूयं द्विगुणपादार्धादधि' ख. पाठः. ५. 'सदशाष्टादशादि' क. पाठः.
६. 'तु', ७. 'वत् ततः ।', ८. 'हतरा', ९. 'द्विद्विह' ख. पाठः.

श्रेष्ठमध्यकनिष्ठं स्यादेवं मध्यक्रमेषु च[1] ।
नवपङ्क्तिकरात् पञ्चषट्पञ्चाशत्करान्तकम् ॥ १६ ॥

द्विद्विहस्तविवृद्ध्या तु चतुर्विंशतिसंख्यया ।
पञ्चादिद्वादशान्तानां हर्म्याणां विपुलं क्रमात्[2] ॥ १७ ॥

सप्ताष्टनवभूमानां[3] धाम्नामुक्तप्रमाणतः ।
युञ्ज्याद् द्वादशभूम्यन्तं विमानं मानविद्वरः[4] ॥ १८ ॥

द्विःषट्त्रयोदशांक्षमन्तषोडशक्ष्मं[5] यथाक्रमम् ।
षट्षट्षट्सप्तपञ्चाशद्धस्तव्यासैः शिवोदितम् ॥ १९ ॥

विस्तारं[6] स्तम्भतो बाह्ये जन्मात् स्थूप्यन्तमुन्नतम् ।
केचिदाशिखरान्तं तु प्रवदान्ति तदुन्नतम्[7] ॥ २० ॥

महतामुच्छ्रयो हस्तैरुद्देशः समुदाहृतः ।
तत्तद्व्यासे तु सप्तांशे निर्देशोच्चं त्रियंशकैः ॥ २१ ॥

विस्तारद्विगुणोत्सेधं[8] युक्त्याल्पेषु प्रयोजयेत् ।
देवानां सार्वभौमानामाद्वादशतलं विदुः ॥ २२ ॥

रक्षोगन्धर्वयक्षाणामेकादशतलं मतम् ।
विप्राणां नवभौमं स्याद् दशभौममथापि वा ॥ २३ ॥

युवराजस्य राज्ञश्च पञ्चमस्यैव सप्तभूः ।
तदाद्येकादशतलं षण्णां वै चक्रवर्तिनाम् ॥ २४ ॥

त्रिभूमं[9] च चतुर्भूमं[10] वणिजां शूद्रजन्मनाम् ।
राज्ञां पञ्चतलं वापि मतं पट्टभृतां तु तत् ॥ २५ ॥

---

१. 'वा', २. 'मतम्'॥, ३. 'द्वदशहस्तादित्रित्रिहस्तविवर्धनात् । षट्सप्ताशीतिहस्तान्तमुत्सेधं पूर्ववन्नयेत् । श्रेष्ठमध्यकनिष्ठानि प्रोक्तान्यल्पक्रमे क्रमात् । सप्ताष्टनव', ४. 'वद्वरम्॥' ५. 'शाक्षं च षोडशत्रयथाक्रम्' ख. पाठः. ६. 'रस्त' क. पाठः. ७. 'दुत्तमम्', ८. 'षेतं यु' ख. पाठः. ९. 'भौ', १०. 'भौं' क. पाठः.

शतहस्तसमुत्सेधात् सप्तत्या रत्निविस्तरात् ।
नेष्यतेऽधिकमानं तु सर्वथा तद्विचक्षणैः ॥ २६ ॥

क्षुद्राल्पमध्यमवरादिविमानकानां
व्यामिश्रहस्तकयुजां विपुलोच्चभेदम् ।
युक्त्या यथोदितमजाद्यमरेश्वराणां
नृणां तथैव कथितं हि मया पुराणैः ॥ २७ ॥

इति मयमते वस्तुशास्त्रे मूलम्भविधानो नाम
एकादशोऽध्यायः ।

अथ द्वादशोऽध्यायः ।

तैतिलानां द्विजातीनां वैर्णानां हर्म्यके गृहे ।
गर्भन्यासविधिः सम्यक् संक्षेपाद् वक्ष्यतेऽधुना ॥ १ ॥
सर्वद्रव्यैस्तु सम्पन्नं गर्भं तत् सम्पदां पदम् ।
द्रव्यहीनमसम्पन्नं गर्भं सर्वविपत्करम् ॥ २ ॥
तस्मात् सर्वप्रयत्नेन गर्भं सम्यग् विनिक्षिपेत् ।
गर्भश्वभ्रस्य गाम्भीर्यं स्वाधिष्ठानोन्नतैः समम् ॥ ३ ॥
चतुरश्रसमं कुर्यात् गर्तमिष्टकयाश्मना ।
आपूर्य सलिलं तस्य मूले सर्वमृदं क्षिपेत् ॥ ४ ॥
निम्नगाहृदसस्याद्रिपैङ्क्तिके कुलिरावटे ।
हलस्थलाब्धिगोश्रृङ्गेहस्तिदन्तेषु मृत्तिकां ॥ ५ ॥

---

१. 'च', २. 'हर्म्याणां', ३. 'वल्मीक' ख. पाठः.
४. 'ल' क. पाठः. ५. 'ङ्गे', ६. 'काः' ख. पाठः.

तदूर्ध्वे तस्य मध्ये तु पद्मकन्दं न्यसेत् पुनः ।
पूर्वे चोत्पलकन्दं च दक्षिणे कौमुदं क्षिपेत् ॥ ६ ॥

सौगन्धि पश्चिमे विद्यात् काकलोहमुदग्दिशि ।
धान्यान्यष्टौ तदूर्ध्वे तु शालिर्व्रीहिश्च कोद्रवः ॥ ७ ॥

कङ्कु मुद्गं च माषं च कुलत्थं च तिलं तथा ।
प्रादक्षिण्येन शाल्यादीनीशानादिषु विन्यसेत् ॥ ८ ॥

तस्योपरि निधातव्यं मञ्जूषं ताम्रनिर्मितम् ।
त्रिचतुर्मात्रविस्ताराद् द्विद्व्यङ्गुलविवर्धनात् ॥ ९ ॥

पञ्चषड्विंशमात्रान्तं मानं द्वादश भाजने ।
समोच्चं वाष्टषट्पञ्चभागोनं वा तदुच्छ्रयम् ॥ १० ॥

एकादिद्वादशान्तानां हर्म्याणामुदितं क्रमात् ।
गृहीतोच्चत्रिभागैकं पादालम्बिविधानकम् ॥ ११ ॥

तत्तद्धर्म्याङ्घ्रिविष्कम्भसमं वाष्टांशहीनकम् ।
त्रिपादं वा विशालं तत् फेलायाः प्रागिवोच्छ्रयम् ॥ १२ ॥

त्रिवर्गमण्डपाकारं वृत्तं वा चतुरश्रकम् ।
पञ्चविंशतिकोष्ठं वा नवकोष्ठकमेव वा ॥ १३ ॥

फेलोच्चार्धत्रिभागैकं कोष्ठभित्त्युच्छ्रयं भवेत् ।
तद्भित्तिघनतां कुर्याद् यवैर्द्वित्रिचतुष्टयैः ॥ १४ ॥

उपपीठपदे देवाः पञ्चविंशति सम्मताः ।
श्वभ्रोर्ध्वभूतलं सर्वं गन्धैः पुष्पैश्च दीपकैः ॥ १५ ॥

---

१. 'ध्वें' ख. पाठः. २. 'ष्ठ' क. पाठः. ३. 'धान्योप', ४. 'वि-स्तारं पञ्चषड्विंशदङ्गुलान्तं हि भा', ५. 'मानं', ६. 'त् । त', ७. 'च्छ्रि-तम्', ८. 'म् ॥ गृहीतोच्चत्रिभागैकं पादालम्बिविधानकम् । त्रि' ख. पाठः. ९. 'तम् ॥' क. पाठः. १०. 'न्ध' ख. पाठः.

वासयित्वा तु पूर्वेद्युः पञ्चगव्यैस्तु भाजनम् ।
प्रक्षाल्य सूत्रैरावेष्ट्य शुद्धे[1]शाल्यास्तरे शुभे ॥ १६ ॥
स्थण्डिले चण्डितं कृत्वा मण्डूकं वाथ तत्परम् ।
विन्यस्य देवान् ब्रह्मादीन् श्वेततण्डुलधारया ॥ १७ ॥
आराध्य गन्धपुष्पाद्यैर्भुवनाधिपतिं जपेत् ।
स्थपतिः कलशान् न्यस्य सर्वान् वस्त्रविभूषितान् ॥
सुगन्धोदकसम्पूर्णान् गन्धपुष्पसमर्चितान् ।
निष्कलङ्कानसुषिरान् पञ्चपञ्चैव सूत्रितान्[2] ॥ १९ ॥
तस्य प्रदक्षिणे[3] गन्धशालिस्थण्डिलै[4]र्मण्डले[5] ।
आराध्य गन्धपुष्पाद्यैर्बलिं दत्त्वा यथाविधि ॥ २० ॥
भाजनाय ततः पात्रं वेष्टयेच्छ्वेतवाससा ।
श्वेतवस्त्रास्तरस्योर्ध्वे न्यसेद् दर्भास्तरे शुचिः ॥ २१ ॥
पीत्वा शुद्धं पयो रात्रावुपोष्याधिवसेत् ततः ।
स्थपतिः शास्त्रवित् प्राज्ञः सूत्रग्राह्यादिसेवितः ॥ २२ ॥
धान्यादीन्यर्थे[6] वस्तूनि भाजनाभ्यन्तरे न्यसेत् ।
हेमराजतशुल्वैश्च शालिव्रीहिकुलत्थकान् ॥ २३ ॥
त्रपुणा कङ्कु सीसेन माषो मुद्गोऽयसायसा ।
कोद्रवं च तिलं भाव्यं वैक्रन्ते[8]न प्रयत्नतः ॥ २४ ॥
ईशादिषु न्यसेदेतान्ये[9]ष्टदिक्षु यथाक्रमम् ।
जयन्ते जातिहिङ्गुल्यं हरितालं भृशे मतम् ॥ २५ ॥

---

१. 'भाद्दे भास्करे शु', २. 'का', ३. 'णे शा', ४. 'लं', ५. 'लेऽपिच ।', ६. 'त्र' ख. पाठः. ७. 'कम् ॥' क. पाठः. ८. 'ते', ९. 'न' ख. पाठः.

मनःशिला च वितथे भृङ्गराजे तु माक्षिकम् ।
राजावर्त्तं तु सुग्रीवे शोषे गैरिकमीरितम् ॥ २६ ॥
अञ्जनं गणमुख्ये स्यादुदितौ दरदं विदुः ।
मध्यमे पद्मरागं तु मरीचौ विद्रुमं मतम् ॥ २७ ॥
सविन्द्रे पुष्यरागं तु वैडूर्यं स्याद् विवस्वति ।
वज्रमिन्द्रजये विद्यादिन्द्रनीलं तु मित्रके ॥ २८ ॥
रुद्रराजे महानीलं मरकतं तु महीधरे ।
मुक्तापवत्से मध्यादिपूर्वेण क्रमशो न्यसेत् ॥ २९ ॥
विष्णुक्रान्ता त्रिशूलों श्रीः सहाँ दूर्वा च भृङ्गकम् ।
अपामार्गैकपत्राब्जमीशादिष्वौषधं न्यसेत् ॥ ३० ॥
चन्दनागरुकर्पूरलवङ्गैलालताफलम् ।
तक्कोलेनाष्टगन्धांस्तु जयन्तादिषु विन्यसेत् ॥ ३१ ॥
स्वस्तिकानि चतुर्दिक्षु हेमायस्ताम्ररूप्यकैः ।
सर्वेषामपि सामान्यमेतच्चिह्नैस्तु वक्ष्यते ॥ ३२ ॥
कपालशूलखट्वाङ्गं परशुं वृषभं तथा ।
पिनाकं हरिणं पाशं हैमं पूर्वादिषु न्यसेत् ॥ ३३ ॥
कार्तस्वरमयं चाष्टमङ्गलं तत्र पूर्ववत् ।
दर्पणं पूर्णकुम्भं च वृषभं युग्मचामरम् ॥ ३४ ॥
श्रीवत्सं स्वस्तिकं शङ्खं दीपं देवाष्टमङ्गलम् ।
स्थापकस्यानुशिष्यस्तान् स्थपतिः क्रमशो न्यसेत् ॥ ३५ ॥

---

१. 'ष', २. 'द' ३. 'त्रे', ४. 'वौंक्तक', ५. 'ली' ख. पाठः.
६. 'भा' क. पाठः. ७. 'व', ८. 'चा' ख. पाठः.

आच्छाद्य भाजनं शुभ्रं[२] पिधानेन तु निश्चलम् ।
तमेवाराध्य गन्धाद्यैः स्नापयेत्[३] कलशोदकैः ॥ ३६ ॥

विप्रस्वाध्यायघोषैश्च शङ्खभेर्यादिनिःस्वनैः ।
कल्याणजयघोषैश्च स्थपतिः स्थापकेन[४] तु ॥ ३७ ॥

पुष्पकुण्डलहारादिकटकैरङ्गुलीयकैः ।
पञ्चाङ्गभूषणैर्हेमनिर्मितैश्च विभूषणैः ॥ ३८ ॥

हेमयज्ञोपवीतस्तु नववस्त्रोत्तरीयकः ।
श्वेतानुलेपनश्चैव सितपुष्पशिराः शुचिः ॥ ३९ ॥

ध्यात्वा धरातलं सर्वं दिग्द्विपेन्द्रसमन्वितम् ।
ससागरं सशैलेन्द्रमनन्तस्योपरि स्थितम् ॥ ४० ॥

सृष्टिस्थितिलयाधारं भुवनाधिपतिं जपेत्[८] ।
ब्रह्मादीनां च देवानां देवीनां द्वारदक्षिणे ॥ ४१ ॥

स्तम्भमूले यथायोगं गर्ते गर्भं निधापयेत् ।
होमस्तम्भे प्रतिस्तम्भे पादुकाच्च प्रतेरधः ॥ ४२ ॥

तस्मादत्युन्नतं निम्नं गर्भं सम्पद्विनाशकृत् ।
चतुरश्रीकृता सारवृक्षपाषाणनिर्मिता ॥ ४३ ॥

पात्रद्विगुणविस्तारा पञ्चाङ्गुलघनान्विता ।
प्रतिमाफलका या सा स्थाप्या तद्भाजनोपरि ॥ ४४ ॥

तदूर्ध्वे स्थापयेत् स्तम्भं[११] संश्लिष्टचतुरिष्टकम् ।
सरत्नौषधिभिर्युक्तं वस्त्रपुष्पादिशोभितम् ॥ ४५ ॥

---

१. 'श्च' क. पाठः. २. 'परिधाने तु' ख. पाठः. ३. 'स्था' क. पाठः. ४. 'काशाया ॥', ५. 'स्तु', ६. 'ग्विप्रेन्द्र', ७. 'मायुतम् ।', ८. 'पन् ।', ९. 'तु योगे वा ग', १०. 'नब।', ११. 'कु' ख. पाठः.

ईशगर्भमिदं प्रोक्तमन्येषां तु प्रवक्ष्यते।
विष्णुधिष्ण्ये च गर्भं[1] स्याद्धैमं चक्रं तु मध्यमे॥ ४६॥
शङ्खकार्मुकदण्डे[2] च रुक्ममायसनन्दकम्।
धनुः शङ्खं च वामे तु खड्गं दण्डं च दक्षिणे॥ ४७॥
प्रमुखे[3] वैनतेयं च स्थापयेद्धेमनिर्मितम्।
यज्ञोपवीतमोङ्कारं स्वस्तिकाग्निं[4] च हेमजम्॥ ४८॥
पद्मं[5] कमण्डलुं चाक्षसूत्रदर्भाश्च ताम्रजाः।
ब्रह्मासनपदे[6] मध्येऽम्बुरुहं[7] स्थाप्यमेव च॥ ४९॥
तस्मान्मध्ये[8] तदोङ्कारं यज्ञसूत्रावृतं तु येत्[9]।
स्वस्तिकानि चतुर्दिक्षु वामे स्थाप्यं कमण्डलु॥ ५०॥
कुशाक्षमालां वामे तु पुरे तीक्ष्णानलं क्षिपेत्।
ब्रह्मगर्भमिदं प्रोक्तं ब्रह्मस्थाने प्रतिष्ठितम्॥ ५१॥
स्वस्तिकं चाक्षमालां च शक्तिं चक्रं च कुक्कुटम्।
मयूरं चैव सौवर्णमयसा शक्तिमध्यमे॥ ५२॥
वामे च कुक्कुटं दद्याद् दक्षिणे च मयूरकम्।
अक्षसूत्रं पुरे[10] स्थाप्यं गर्भं षण्मुखसद्मनि॥ ५३॥
अम्बुजं चाङ्कुशं पाशं सिंहं सवितृधामके।
वज्रेभं नन्दकं चक्रं[11] चामरं धाम्नि वज्रिणः॥ ५४॥

---

१. 'म' क. पाठः. २. 'ण्डैश्च रु', ३. 'प्राङ्मुखे', ४. 'ग्न्यं', ५. 'द्मकं मण्डलं चा', ६. 'ह्मस्थानगते म', ७. 'ध्यं पुरुषं स्था', ८. 'स्मि', ९. 'त' ख. पाठः. १०. 'रः', ११. 'चित्रं चा' क. पाठः.

जाम्बूनदमयं मेषं शक्तिं पावकधामनि ।
अयसा महिषं पाशं हेमजं यमधामनि ॥ ५५ ॥

अयसा नन्दकं गर्भे निर्ऋतेस्तु विमानके ।
वरुणे मकरं पाशं लोहैजं हेमजं तथा ॥ ५६ ॥

वायोः कृष्णमृगं हैमं व्यालं तारापतेः क्षिपेत् ।
नरवाहे नरः प्रोक्तो मकरो मदनालये ॥ ५७ ॥

टङ्कं दन्ताक्षमाला च विघ्नेशावासगर्भके ।
ओङ्कारं वक्रदण्डं च सौवर्णं चार्यकस्य तु ॥ ५८ ॥

अश्वत्थं करकं सिंहं छैत्रं स्वर्णेन कारयेत् ।
अश्वत्थः पुरतः स्थाप्यश्छत्रं तस्योपरि स्थितम् ॥ ५९ ॥

कुण्डिकापरभागे तु केसरीँ दक्षिणे भैवेत् ।
सौगते धामके गर्भे श्रीवत्साशोकसिंहकम् ॥ ६० ॥

कमण्डल्वक्षमाला च शिखिपिञ्छं तु हेमजम् ।
त्रिच्छत्रं करकं तालवृन्तं रुक्ममयं भवेत् ॥ ६१ ॥

वृक्षैस्तु पुरतः स्थाप्यश्छत्रं तस्योपरि स्थितम् ।
पिञ्छं दक्षिणभागेऽक्षमाला वामे तु कुण्डिका ॥ ६२ ॥

श्रीरूॅपं मध्यमे स्थाप्यं केसरीं तत्र विन्यसेत् ।
अपरे करकं तालवृन्तं गर्भो जिनालये ॥ ६३ ॥

शुकं चक्रं च हैमं तु सिंहं शङ्खं च राजतम् ।
मृगं ताम्रमयं चैव कृष्णलोहेन नन्दकम् ॥ ६४ ॥

---

१. 'हितं हे' क. पाठः. २. 'चक्रं ख', ३. 'री', ४. 'न्यसेत् ।' क. पाठः. ५. 'ब' क. पाठः. ६. 'पुरं म' ख. पाठः.

एवं दुर्गाविमाने तु गर्भं कुर्याद् विचक्षणैः।
खट्वाङ्गं नन्दकं शक्तिं क्षेत्रपालस्य हेमजम्॥ ६५ ॥

पद्मं लक्ष्म्याः सरस्वत्या ओङ्कारं च त्रिवर्णकम् ।
ध्वाङ्क्षकेतूत्पलं हैमं ज्येष्ठाकोष्ठस्य गर्भके ॥ ६६ ॥

कपालशूलघण्टाभिः प्रेतान् कालीगृहे न्यसेत्।
हंसोक्षशिखिताक्ष्यांश्च सिंहेभप्रेतरूपकान् ॥ ६७ ॥

जाम्बूनदमयान् मातृकोष्ठकेषु निधापयेत्।
पद्माक्षसूत्रकं दीपं[3] रोहिणीगृहगर्भके ॥ ६८ ॥

दर्पणं चाक्षमालां च पार्वतीभवने विदुः।
पद्माक्षसूत्रकं पूर्णकुम्भं मोहिनिधामनि ॥ ६९ ॥

[4]चित्रध्वजपताकाश्च सचिह्नैः सह वाहनैः ।
अनुक्तानां च देवानां देवीनां गर्भमिष्यते ॥ ७० ॥

द्विजातीनां तु वर्णानां जातिगर्भो विधीयते ।
करकं दण्डकाष्ठं च शुल्बं हेममयं भवेत् ॥ ७१ ॥

यज्ञोपवीतं यज्ञाग्निं यज्ञभाण्डं[6] च राजतम् ।
यज्ञोपवीतमध्यस्थं यज्ञभाण्डं च दक्षिणे॥ ७२॥

वामे तु करकं काष्ठमनलं पुरतो भवेत् ।
विप्रगर्भमिदं प्रोक्तं स्वस्तिकानि चतुर्दिशि ॥ ७३ ॥

मध्ये हेममयं चक्रं वामे शङ्खं च राजतम् ।
कार्मुकं ताम्रजं वामे दण्डो रुक्मेण दक्षिणे ॥ ७४ ॥

---

१. 'णः । कपालशू', २. 'तु विधीयते ।' ख. पाठः. ३. 'प्यं' क. पाठः. ४. 'छ', ५. 'न्त', ६. 'ण्डानि', ७. 'प्र' ख. पाठः.

खड्गं चायसमेव स्याच्चतुर्नागाश्चतुर्दिशि ।
हैममायसकं ताम्रं राजतं क्रमशो न्यसेत् ॥ ७५ ॥
मध्ये श्रीरूपकं हैमं स्वस्तिकानि चतुर्दिशि ।
छत्रध्वजेपताकाश्च दण्डं वै शासनात्मकम् ॥ ७६ ॥
राजद्वारे भवेद् गर्भमन्येषां तु यथार्हकम् ।
वार्ष्णेयकानां गर्भं चेद् विजयद्वारदक्षिणे ॥ ७७ ॥
अयसा हलजिह्वां च शङ्खं[2] ताम्रकुलीरकम् ।
पञ्चायुधं सीसमार्षं (हयौ ? यं) वृषगजौ हरिम् ॥ ७८ ॥
अर्काग्निवरुणेन्दूनां स्थाने सम्यङ् निवेशयेत् ।
चत्वारो धेनुकाः[3] श्वेतनिर्मिताश्च चतुर्दिशि ॥ ७९ ॥
गोपुङ्गवं[4] च पुरतो वैश्यानां प्रविधीयते ।
बीजपात्रं[5] हलं हैमं[6] ताम्रजं युगमिष्यते ॥ ८० ॥
रजतेन पशुं[7] विद्याच्चतुर्दिक्षु विनिक्षिपेत् ।
मध्ये गोपुङ्गवं चैव तन्निरीक्ष्य युगं पुनः ॥ ८१ ॥
हलं दक्षिणभागे तु वामांशे बीजपात्रकम् ।
बीजं हिरण्मयं शूद्रगर्भे वैश्ये च सम्मतम् ॥ ८२ ॥
गृहाणां गृहगर्भं च जातिगर्भं विमिश्रितम्[8] ।
अनेकभूमियुक्तानि यानि वासगृहाणि च ॥ ८३ ॥

---

१. 'ज + + । खट्वाङ्गं नन्दकं शुक्तिः क्षेत्रपालस्य हेमजम् । पद्मं लक्ष्म्याः सरस्वत्या ओङ्कारं चक्रवर्णकम् ॥ ध्वाङ्क्षे केतूत्पलं हैमं ज्येष्ठाकोष्ठस्य गर्भके । + + पताका' ख. पाठः. २. 'ङ्खुस्ताम्र' क. पाठः. ३. 'काश्चैव नि', ४. 'वी', ५. 'द्वि', ६. 'स्वर्णं ता', ७. 'शून् वि' ख. पाठः. ८. 'निःसृतम्' क. पाठः.

पुष्पदन्ते च भल्लाटे महेन्द्रे च गृहक्षते ।
दक्षिणे नेत्रभित्तौ तु सौम्यादौ तु चतुर्गृहे ॥ ८४ ॥

द्वारि[1] प्रदाक्षिणे स्तम्भे योगे वापि विधीयते ।
स्थाली तदुपधानं च दार्विकं तण्डुलं खजम् ॥ ८५ ॥

गलक्यं दन्तकाष्ठाग्निं कृष्णं लोहं महानसे ।
दक्षिणे भवने गर्भः कुम्भः शाल्युदपूरितः ॥ ८६॥

धनसद्मानि गर्भस्तु[2] सार्गलं कुश्चितं भवेत् ।
पर्यङ्क[3]दीपशयनं गर्भे विघात् सुखालये ॥ ८७ ॥

येन यत् कर्म निष्पाद्यं तेन तद्गृहगर्भकम् ।
यानि यस्य स्वचिह्नानि तानि तस्य निधापयेत् ॥ ८८ ॥

सभाप्रपामण्डपेषु कर्ण[4]पादे प्रदक्षिणे ।
द्वितीयस्तम्भके द्वारदक्षिणाङ्घ्रौ तु वाँ[5] न्यसेत् ॥ ८९ ॥

अयोमयगजो गर्भः कृष्णलोहेन कोद्रवः ।
लक्ष्मीं सरस्वतीं हेमां पात्रमध्ये तु विन्यसेत् ॥ ९० ॥

गर्भौ नाट्यसभायां चे[6] प्रक्षिपेत् कुटिकामुखे ।
मण्डितस्तम्भमूले वाप्युभयोरपि चेष्यते ॥ ९१ ॥

आतोद्यानि च सर्वाणि सर्वलोहमयानि च ।
श्रीवत्सं पङ्कजं पूर्णकुम्भं हेमजमिष्यते ॥ ९२ ॥

---

१. 'र', २. 'र्भं तु स्याद् गलं', ३. 'ङ्क' ख. पाठः.
४. 'र्म' क. पाठः. ५. 'वि', ६. 'चेत् प्र' ख. पाठः.

हेमगर्भसभागर्भो[1] द्वारस्तम्भे विधीयते ।
पूर्वोक्तैकर्णपादे[2][3] वा गर्भस्थानं तु तस्य वै ॥ ९३ ॥
तुलाभाराभिषेकार्थे मण्डपे वाथ तद् भवेत् ।
पाषण्ड्याश्रमिणां वासे तत्तच्चिह्नं तु गर्भकम् ॥ ९४ ॥
जात्यन्तराणां सर्वेषां तत्तच्चिह्नं प्रयोजयेत् ।
गृहिणी गर्भिणी कर्तुर्यदि गर्भं न निक्षिपेत् ॥ ९५ ॥
रत्नानि धातवश्चैव स्वल्पविस्तारभाजने ।
तद्दैवस्थानभावज्ञैर्न्यस्तव्यानीह[4][5] तानि वै ॥ ९६ ॥
द्वारप्रदक्षिणे स्थाने स्वामिस्थानस्य दक्षिणे ।
अभ्यन्तरमुखं गर्भं वस्तुमध्यं बहिर्मुखम् ॥ ९७ ॥
इदं मन्त्रं समुच्चार्य प्राङ्मुखो वाप्युदङ्मुखः ।
पूर्वोक्तविधिना सम्यक् स्थापयेत स्थपतिः क्रमात् ॥ ९८ ॥

अयं मन्त्रः—"स्वरदेवताभ्यो मन्त्रेभ्यः स्वाहा[6]। सर्वरत्नाधिपतये स्वाहा। उत्तमप्रजापतये सत्यवादिने नमः। श्रियै नमः। सरस्वत्यै नमः[7]। वैवस्वताय नमः। वज्रपाणये नमः। अभिनवसर्वविघ्नप्रशमनाय नमः। नमो वह्नये स्वाहा॥"

वापीकूपतटाके तु दीर्घिकासेतुबन्धने ।
मत्स्यमण्डूककुलिरं सर्पं वै शिंशुमारकम् ॥ ९९ ॥
हेमजं तदुदग्भागे पूर्वायां दिशि वाथवा ।
पुरुषाञ्जलिमात्रे तु श्वभ्रे पात्रं निधापयेत् ॥ १०० ॥

---

१. 'हिरण्यग', २ 'क्ते' ख. पाठः. ३. 'र्वे', ४. 'दे', ५. 'स्तानि तानि विधास्यताम् ।', ६. 'हा । ओं नमः प्र' क. पाठः. ७. 'मः । वज्र' ख. पाठः.

सुमुहूर्ते सुलग्ने च होराकरणसंयुते ।
रात्रौ गर्भमहन्येव स्थापयेच्चतुरिष्टकम्[1] ॥ १०१ ॥
यद्यत् स्थानं तु गर्भस्य तत्रस्था[2] प्रथमेष्टका ।
मृत्कन्दधान्यसल्लोहधातुरत्नौषधैः सह ॥ १०२ ॥
गन्धद्रव्यैश्च बीजैश्च विधेया प्रथमेष्टका ।
शैले शिलामयी प्रोक्ता चैष्टके चेष्टकाः शुभाः ॥ १०३ ॥
गर्भभाजनविस्तारा विस्तारद्विगुणायता ।
विपुलार्धघना[3] सर्वहर्म्यके चतुरिष्टका ॥ १०४ ॥
अष्टौ द्वादश वा ग्राह्या मध्यमे तु महत्तरे ।
ऋजुदीर्घाङ्गुलिन्यासा समसङ्ख्या हि पुंस्त्वभाक् ॥ १०५ ॥
स्त्रीत्वभागोजसंङ्ख्या सा वक्ररेखं नपुंसकम् ।
सुस्निग्धाः समदग्धाश्च सुस्वना[4]स्ताः सुशोभनाः ॥ १०६ ॥
पुंस्त्रीनपुंसके हर्म्ये योजयेत् ता यथाक्रमम् ।
यथा जाता पुरा तत्र स्थापनीया तथा भवेत् ॥ १०७ ॥
शिला दोषविनिर्मुक्ता बिन्दुरेखादिवर्जिता ।
आदावेव तु कर्तव्या झषाले प्रथमेष्टका ॥ १०८ ॥
निखाताङ्घ्रौ विमाने तु न्यस्तव्या गर्भमूर्धनि ।
तत्पूर्वदक्षिणे पूर्वं त्रिकोणेषु प्रदक्षिणम् ॥ १०९ ॥
देवादीनां द्विजातीनां स्थापयेत् स्थपतिः क्रमात् ।
केचिच्छ्वभ्रस्य गम्भीरे पञ्चद्व्यंशावसानके ॥ ११० ॥

---

१. 'काः ।' क. पाठः. २. 'धान्विता ॥', ३. 'नाश्चतुरिष्टकाः । सर्वहर्म्यके ॥', ४. 'रा' ख. पाठः.

इष्टकादिचिते खाते वदन्ति प्रथमेष्टकाम् ।
पूर्ववद् वरवेषाढ्यो युक्त्या तत्र निधापयेत् ॥ १११ ॥

रूपाण्यैप्यौषधानि द्युतिमणिकनकाद्यष्टलोहानि धातून्
पात्रे न्यस्याञ्जनादीन् शुभयुतदिनपक्षर्क्षहोरामुहूर्ते ।
मृत्कन्दान्यष्टधान्यानि च निशि मतिमान् श्वभ्रमूले निधाय
क्षिप्त्वा पात्राय युक्त्या बलिमथ सलिले स्थापयेद् गर्भमादौ ।

अमरनरविमानद्वारयोगाङ्घ्रिमूले
विधिवदविकलाङ्गं गर्भमादौ निधाय ।
तदुपरि विधिनास्मिन् योगमाङ्घ्रिं च पूर्वं
सकलविभवयुक्तं स्थापयेद् गर्भमूर्ध्नि ॥ ११३ ॥

पञ्चपञ्चकलशोदकपूतौ श्वेतचन्दननवाम्बरयुक्तौ ।
सर्वमङ्गलविचित्रतरौ तौ स्थापयेत् स्थपतिरङ्घ्रिकयोगौ ॥

इति मयमते वस्तुशास्त्रे गर्भविन्यासो नाम
द्वादशोऽध्यायः ।

अथ त्रयोदशोऽध्यायः ।

अधिष्ठानस्य चाधस्तादुपपीठं प्रयोजयेत् ।
रक्षार्थमुन्नतार्थं च शोभार्थं तत् प्रवक्ष्यते ॥ १ ॥

समं त्रिपादमर्धं वा पञ्चांशद्व्यंशमेव वा ।
सपादं वाथ सार्धं वा पादोनद्विगुणं तु वा ॥ २ ॥

---

१. 'ण्येवौष' ख. पाठः. २. 'रत्नमा' क. पाठः.

द्विगुणं वा प्रकर्तव्यमात्ताधिष्ठानतुङ्गतः ।
उत्सेधे[1] दशभागे तु ऐकेनैकेन[2] वर्धनात् ॥ ३ ॥
पञ्चांशान्तमधिष्ठानजन्माद् बाह्ये तु निर्गमम् ।
दण्डं वा सार्धदण्डं वा द्विदण्डं वा त्रिदण्डकम् ॥ ४ ॥
अधिष्ठानजगत्या वा समं तत्पादबाह्यकम् ।
वेदिभद्रं[3] प्रतिभद्रं[4] सुभद्रं च त्रिधा मतम् ॥ ५ ॥
उच्छ्र्ये भानुभागे तु द्व्यंशेनोपानमीरितम्[5] ।
पद्ममंशं[6] तदूर्ध्वेऽर्धे क्षेपणं पञ्चभागिकम् ॥ ६ ॥
ग्रीवँमर्धेन कम्पं स्याद् भागैकेनाम्बुजं भवेत् ।
शेषांशं वाजनं कम्पमष्टाङ्गमुपपीठकम् ॥ ७ ॥
षडङ्गं वा विधातव्यमूर्ध्वाधस्ताद् विनाम्बुजम् ।
वेदिभद्रं[9] द्विधा प्रोक्तं सर्वहर्म्येषु योग्यकम् ॥ ८ ॥
अश्विनीपुंद्विकैकांशैः भानुभागाङ्गकांशकैः ।
त्र्यंशैकांशकभागैस्तु द्वाभ्यामंशेन योजयेत् ॥ ९ ॥
जन्मतो[11] वाजनान्तं[12] तु तुङ्गे त्रिनवभागके[13] ।
पादुकं पङ्कजं कम्पं कण्ठमुत्तरमम्बुजम् ॥ १० ॥
कपोतपालिकान्तादि प्रतिवाजनमुच्यते ।
प्रतिभद्रमिदं नाम्ना सर्वालङ्कारसंयुतम् ॥ ११ ॥

---

१. 'ध', २. 'भागेनै', ३. 'दी', ४. 'ती', ५. 'दी' ख. पाठः. ६. 'शे' क. पाठः. ७. 'वामध्येन', ८. 'कं', ९. 'दी', १०. 'न्द्र-नवांशैस्तु भानुभागांशकांशकैः। त्रियंशैकांशभा', ११. 'नो', १२. 'न्त-स्थतुङ्गे', १३. 'गि' ख. पाठः.

युग्मेशाक्षांशकांशैस्तु द्व्येकाष्टांशांशकांशकैः ।
त्र्यंशैकेनांशकैर्द्वाभ्यामेकेनात्रैव योजयेत् ॥ १२ ॥

पादुकं पङ्कजं चैवमालिङ्गान्तरितं तथा ।
प्रत्यूर्ध्वे वाजनं कण्ठमुत्तराब्जकपोतकम् ॥ १३ ॥

आलिङ्गान्तरितं चोर्ध्वे प्रतिश्चैवोर्ध्ववाजनम् ।
द्विविधं प्रतिभद्रं स्यादेकभागाधिकं ततः ॥ १४ ॥

त्रिःसप्तांशे तदुत्सेधे द्वाभ्यां जन्म तथाम्बुजम् ।
अर्धेन कण्ठमर्धेन पद्मद्व्यंशेन वाजनम् ॥ १५ ॥
अर्धेनाब्जं तथा कम्पं कण्ठम[2]ष्टांशमीरितम् ।
अंशेनोत्तरमर्धेन पद्मं गोपानकं त्रिभिः ॥ १६ ॥

भागार्धमूर्ध्वकम्पं स्यादेतन्नाम्ना सुभद्रकम् ।
जन्म द्व्यंशं त्रियंशेन पद्ममंशेन कन्धरम् ॥ १७॥

द्वाभ्यां वाजनमेकेन कम्पमष्टांशकैर्गलम् ।
अंशेन कम्पकं द्वाभ्यां वाजनं कम्पमंशकम् ॥ १८ ॥

सुभद्रं द्विविधं प्रोक्तं सर्वालङ्कारसंयुतम् ।
[3]सिंहेभमकरैर्व्यालैर्भूतैः पत्रैरलङ्कृतम् ॥ १९ ॥

प्रतिवक्त्रं झषा[4]ढ्यं स्याद् वालेनारूढमस्तकम् ।
अर्पितानर्[5]पिते हर्म्ये सर्वत्र परिकल्पयेत् ॥ २० ॥

अङ्गमङ्गं प्रति प्रांशैर्वृद्धि[6]र्हानिस्तथोच्यते ।
तथा मसूरकाणां तु युञ्जीयादुपपीठके ॥ २१ ॥

---

१. 'शकां', २. 'ष्टाङ्गमी', क. पाठः, ३. 'हैश्च म', ४. 'स्यं', ५. 'ता', ६. 'नि यथोचितम् ।' ख. पाठः.

आत्ताधिष्ठानतुङ्गाद् द्विगुणमथ समं सार्धमर्धं त्रिपादं
पञ्चांशद्यंशकं वानलसमभजिते ह्येकमात्रोपपीठम् ।
सैप्रत्यङ्गं समं चेत् तदपि च महता वाजनेनोपयुक्तं
सर्वस्निग्धान्यधस्ताद् दृढतरमतिना योजितव्यं बलार्थम् ॥

इति मयमते वस्तुशास्त्रे उपपीठविधानो नाम

त्रयोदशोऽध्यायः ।

अथ चतुर्दशोऽध्यायः ।

तैतिलानां द्विजातीनां वर्णानां गृहकर्माणि ।
तद्योग्यं द्विविधं वस्तु जाङ्गलानूपभेदतः ॥ १ ॥
घनशर्करया युक्तमत्यन्तं खनने खरम् ।
सितांशुतनुतोयाढ्यं जाङ्गलं भूतलं भवेत् ॥ २ ॥
खननं क्रियमाणस्य वस्तुनश्च बलं यथा ।
रूढोत्पलकुशेर्वादिसंयुक्तं तनुवालुकम् ॥ ३ ॥
अनूपमिति विख्यातं खात्वैवां जलदर्शनात् ।
इष्टकोपलमृद्भिश्च वालुकैरपि चिक्कणैः ॥ ४ ॥
शर्कराभिः क्रमाच्छ्वभ्रं निश्छिद्रं पूरयेत् स्थिरम् ।
घनीकृत्येभपादैश्च काष्ठखण्डैर्बृहत्तरैः ॥ ५ ॥

---

१. 'प', २. 'सं' क. पाठः. ३. 'मन्तात्', ४. 'भ्य' ख. पाठः. ५. 'तं चोदयार्थम्' क. पाठः. ६. 'पलकशेषादि' ख. पाठः. ७. 'ब', ८. 'नम् । ' क. पाठः. ९. 'श्वा', १०. 'तु', ११. 'च्छिखैः ॥' ख. पाठः.

तत्खाते सलिलेनैव पूरितेऽक्षयता शुभा ।
समत्वं सलिलेनैव साधयित्वा विचक्षणः ॥ ६ ॥

गर्भं प्रक्षिप्य तं नी(त्वा होमं ? त्वोपानं) तत्र निधापयेत् ।
स्तम्भद्वित्रिगुणव्यासं तदर्धबहलान्वितम् ॥ ७ ॥

उपानोपरि पद्मं चोपोपानं च तदूर्ध्वतः ।
यथाशोभांशमानेन कुर्यात् तत्र विचक्षणः ॥ ८ ॥

उन्नतां प्रकृतिं भूमिं कृत्वा हस्तप्रमाणतः ।
घनीकृत्य तदूर्ध्वस्थ(उ?मु)पानं जन्म चोच्यते ॥ ९ ॥

[1]तदूर्ध्वस्थमधिष्ठानं सोपपीठं तु केवलम् ।
सस्तम्भं वा सकुड्यं वा जङ्घावर्गं तदूर्ध्वगम् ॥ १० ॥

भूमिदेश इति ख्याता कपोतोर्ध्वगता प्रतिः ।
प्रासादादीनि वास्तूनि चाधितिष्ठन्ति यद्धि तत् ॥

अधिष्ठानं तदुन्मानं जातिभूमिवशाद् द्विधा ।
तैतिलानां चतुर्हस्तं त्रिहस्तार्धं द्विजन्मनाम् ॥ १२ ॥

नृपाणां त्रिकरं सार्धद्विहस्तं यौवराजकम् ।
द्विहस्तं वणिजामेकहस्तं शूद्रस्य कीर्त्यते[2] ॥ १३ ॥

एतज्जातिवशाद् भूमिवशादत्रैव कथ्यते
दण्डात् षण्मात्रहान्या तु द्वादशाद्यात् त्रिभूमिकात् ॥

---

१. 'तद्वदूर्ध्वम', २. 'र्तितम् ॥' ख. पाठः.

त्रितलस्योत्तमस्येष्टं पादेनोनं द्विहस्तकम् ।
क्षुद्राणामनया नीत्या विधातव्यं विचक्षणैः[2] ॥ १५ ॥

तत्तत्पादोदयार्धेन षडष्टांशोनमानतः ।
अधिष्ठानस्य चोत्सेधं वास्तुवस्तुनि भूवशात् ॥ १६ ॥

यदुपानस्य निष्क्रान्तं तत् त्र्यंशेर्न विभाजयेत् ।
त्यक्त्वैकांशं बहिस्तत्र जगतीं कारयेद् बुधः ॥ १७ ॥

तद्वत् कुमुदपट्टं च तद्वत कण्ठस्य वेशनम् ।
आत्तोत्सेधांशमानं तु भागमानेन वक्ष्यते ॥ १८ ॥

अष्टसप्तशशिबन्धभागिकश्चन्द्रबन्धशशिभागिकैः क्रमात् ।
वप्रेकं कुमुदकम्पकन्धरं कम्पवाजनमधोर्ध्वकम्पकम् ॥

पादबन्धमुदितं तदुच्छ्रये
भानुभिर्द्विगुणितांशके कृते ।
देवविप्रनृपवैश्यशूद्रके-
ष्वेवमुक्तमृषिभिः पुरातनैः ॥ २० ॥

चन्द्रदृक्शशिशिवांशकै रसैर्धातुभिश्च समभागिकैः क्रमात् ।
वाजनं प्रतिमुखं त्रियश्रकं हंक् च वृत्तकुमुदं तु वप्रकम् ॥

---

१. 'क्त' क. पाठः. २. 'णैः ॥ मसूरकोन्नतं पञ्चहस्ते द्वात्रिंशदङ्गुलम् । त्रिंशदङ्गुलमूलं वा द्विद्व्यङ्गुलविवर्धनात् ॥ अष्टत्रिंशतिमात्रोच्चं त्रयोदशविशालिनः । षडादीनां तु पञ्चानामेकत्रिंशतिमात्रकः ॥ नवत्रिंशतिमात्रोच्चं चतुर्दशकरस्य तु । त्रिचतुर्हस्तयोर्धाम्नोस्तत्नीत्यैव विचक्षणः । आर्त्तोत्सेधांशमानेन वाधिष्ठानोच्छ्रयं विदुः ॥ कैश्चित् तेन प्रकारेण विधातव्यं विचक्षणैः । त', ३. 'त्र', ४. 'न भा', ५. 'क्र', ६. 'धृ' ख. पाठः.

त्रिःषडंशसमभागिके तले नागवक्त्रसदृशं प्रतिद्वयम् ।
देवविप्रनृपमन्दिरेषु तद्योग्यकं ह्युरगबन्धकं भवेत् ॥

अंशाध्यर्धार्धभागैर्मुनिरसशशिभिश्चन्द्रदृक्चैव भागैः
क्षुद्रोपानाब्जकम्पं जगतिकुमुदकं धारया युक्तमूर्ध्वे ।
आलिङ्गान्तादिकं तत्प्रतिमुखमथ तद्वाजनं पद्मयुक्तं
त्रिःसप्तांशे तलोच्चे करिहरिमकरव्यालरूपादि भूष्यम् ॥ २३ ॥

प्रतिक्रमं तत् सुरमन्दिरोचितं
विचित्रितं पत्रलतादिरूपकैः ।
द्विजन्मभूमीश्वरयोर्मतं गृहे
इभप्रभं पुष्टिकरं जयावहम् ॥ २४ ॥

एकद्ध्येकेन षड्भिः शशिशिवशशिभिर्बन्धचन्द्रैकभागै-
र्द्व्यंशैकेनांशनेत्रैः शिवशशिसमभागोनजन्माब्जकं च ।
वप्रं पद्मं गलाब्जं कुमुदमुपरि पद्मं च कम्पं गलं तत्
कम्पं पद्मं च पट्टीकमलमुपरि(त?क)म्पं च षड्विंशदंशे ॥

पद्मकेसरमेतदुदाहृतं कम्पवाजनपङ्कजकैर्युतम् ।
कुम्भवप्रयुतं च सकन्धरं शम्भुधामनि तत् प्रविधीयते ॥२६॥

भागेष्वेकार्धकार्धैस्तदुपरि चतुरंशैस्तथार्धांशकार्धै-
र्द्व्यर्धांशार्धद्विभागैस्तदुपरि च तथार्धांशकार्धेन जन्मम् ।
वप्रं कञ्जं गलानं तदुपरि कुमुदं पङ्कजं कम्पकण्ठं
कम्पं पद्मं महावाजनमुपरिदलं कम्पकं कण्ठजाढ्यम् ॥

पुष्पपुष्कलमेतदुदाहृतं कल्पितं नवपङ्क्तिभिरुच्छ्रये ।
शिल्पिभिः प्रसरैरपि पूजितामूर्ध्वमध्यममुखे विमानके ॥२८॥

द्वाभ्यामेकेन सप्तांशकशशि(शि)त्रवेदैकचन्द्राग्निभागै-
रेकेनैकेन वेदैः शिवशशिनयनैकेन मोहामराब्जम् ।
हृत्पद्मं कैरवाब्जं गलधरगलकम्पं दलं तत्कपोतं
द्विलिङ्गान्तादिकं तत् प्रतिमुखमथ तद्वाजनं पङ्कजाढ्यम् ॥

श्रीबन्धं स्यादेतदुच्चे चतुर्वस्वंशे कुर्याच्छान्तधीर्वर्धकिस्तत् ।
देवेशानां मन्दिरेष्वेवमुक्तं श्रीसौभाग्यारोग्यभोग्यं ददाति ॥

तुङ्गे षड्विंशदंशे खुरमथ जगतीकैरवं कम्पकण्ठं
कम्पं पद्मं कपोतं तदुपरि च तथा निम्नमन्तादिवक्त्रम् ।
कम्पं भागेन षड्भिः शरशशिगुणचन्द्रैकबन्धांशकांशै-
र्द्वाभ्यामेकेन कुर्यादमरनरपतेर्मन्दिरे मञ्चबन्धम् ॥ ३१ ॥

आलिङ्गयुक्तमथ चान्तरितप्रतीभ्यां
तद्वाजनेन च[1] वियुक्तकमेतदेव ।
श्रीकान्तनामकमसूरकमष्टकोणं
वृत्तं तु वा कुमुदमम्बरमार्गिणां तत् ॥ ३२ ॥

एकद्व्येकर्तुवेदैः शशिनयनशिवद्व्येकदृक्चन्द्रसार्धा-
र्धांशैर्जन्माब्जकम्पं जगतिकुमुदकं कम्पकण्ठं च कम्पम् ।
पद्मं पट्टं च कण्ठं तदुपरि च तथा वाजनाब्जं च पट्टं
श्रेणीबन्धं सुराणामुदितमिदमलं तुङ्गषड्विंशदंशे ॥ ३३ ॥

---

१. 'क' ख. पाठः.

सार्धार्धेष्वंशकांशैर्गुणशशिशिवचन्द्रांह्रिकैकेन जन्म-
क्षुद्रं पद्मं धृगब्जं कुमुदमुपरि पद्मं तथालिङ्गमूर्ध्वे ।
आलिङ्गान्तः प्रतिर्वाजनमथ मतिमान् योजयेत् त्रिःषडंशे
तुङ्गे देवेश्वराणामिदमुदितमगारेऽनघं पद्मबन्धम् ॥ ३४ ॥

द्व्येकैकांशैः शरांशैर्युगशशिशिवदृक्चन्द्रशैवाश्विनीभि-
र्भागेनोपानकैञ्जं तदुपरि च तथा कम्पवप्रं च कुम्भम् ।
पद्मं पट्टं च कण्ठं तदुपरि च तथा कम्पपद्मं च पट्टी-
पट्टं तद्वप्रबन्धं तदपि च सहितं सह्निकैर्विंशदंशैः ॥ ३५ ॥

तदेव वृत्तं कुमुदं तु वाजने कपोतयुक्तं हि कपोतबन्धकम् ।
तदेव वेदैः प्रतिवाजनं प्रतिस्त्रिकाश्रयुक्तं प्रतिबन्धमुच्यते ॥

एकद्व्येकाग्निभागैः शशियुगलशिवद्व्येकचन्द्रेशदृग्भि-
श्चन्द्रैकैकाक्षिचन्द्रैः खुरकमलमथो कम्पकण्ठं च कम्पम् ।
पद्मं पट्टाब्जनिम्नं कमलमुपरि कुम्भं दलं निम्नमन्ताद्-
या स्याच्चोर्ध्वे प्रतिर्वाजनमथ कलशाख्येन भागास्त्रिरष्टौ ॥

एतानि भेदैस्तु चतुर्दशैव प्रोक्तानि तज्ज्ञैस्तु मसूरकाणि ।
सर्वाणि नास्यङ्घ्रियुतानि युक्त्या दृढीकृताङ्गानि मयोदितानि ॥

भागेनार्धत्रिपादाङ्घ्रिभिरथ युगलाध्यर्धचन्द्रार्धपादै-
र्मात्रैर्वृद्धिश्च हानिर्दृढतरमतिना योजितव्या बलार्थम् ।
शोभार्थं भागमङ्गप्रतिवरसमनीचाल्पहर्म्ये तलाना-
मेवं प्रोक्तं यमीन्द्रैरविकलमतिभिस्तन्त्रविद्भिः पुराणैः ॥

---

१. 'न्द्रांह्रिकै', २. 'घनं प', ३. 'काब्जं त', ४. 'प्रत्यकु' क. पाठः.

अधिष्ठानोत्तरान्तस्थो झषालस्तम्भ उच्यते ।
तद्व्यासादर्कभागा(द्यु?द्यं) षड्भागोनाग्रविस्तरः ॥ ११ ॥
मूलभूस्तम्भतुङ्गस्य द्वादशाद्याः षडंश(नु?यु)क् ।
ऊर्ध्वोर्ध्वस्तम्भतुङ्गं स्यादेवं तद्विस्तरक्रमः ॥ १२ ॥
अग्राकारं युगाश्रं तु कुम्भमण्डिसमन्वितम् ।
ब्रह्मकान्तं तदष्टाश्रं विष्णुकान्तमिहोच्यते ॥ १३ ॥
षडश्रमिन्द्रकान्तं स्यात् सौम्यं तत् षोडशाश्रकम् ।
कर्णमात्रेण तन्मूले चतुरश्रमितोर्ध्व(रः?तः)॥ १४॥
अष्टाश्रं वा द्विरष्टाश्रवृत्तं पूर्वाश्रमीरितम् ।
कुम्भमण्डियुतं वापि रुद्रकान्तं सुवृत्तकम् ॥ १५ ॥
विस्तारद्विगुणं मध्येऽष्टाश्रयुक्तं युगाश्रकम् ।
वियुक्तं कुम्भमण्डिभ्यां मध्येऽष्टाश्रं तदुच्यते ॥ १६॥
चतुरष्टाश्रवृत्ताभं रुद्रच्छन्दसमांशतः ।
दण्डाध्यर्धे द्विदण्डेनोत्तुङ्गद्विगुणविस्तृतम् ॥ १७॥
पद्मासनं तु कर्तव्यं मूले पद्मासनं भवेत् ।
यथेष्टाकृतिसंयुक्तमूर्ध्वतो वा समण्डितम् ॥ १८॥
चक्रवाकाकृतिव्यातं मूले पद्मासनान्वितम् ।
सभद्रं मध्यभागे तु भद्रकं तद् द्विमण्डितम् ॥ १९ ॥
व्यालेभसिंहभूतादिमण्डितं यत्तु मूलतः ।
यथेष्टाकृतिसंयुक्तं तत्तन्नाम्ना समीरितम् ॥ २० ॥
आत्तमेव तदायामे शुण्डुभेदसमन्वितम् ।
युक्तं तत् कुम्भमण्डिभ्यां शुण्डुपादमिति स्मृतम् ॥

मुक्तोत्करणकर्माङ्गं पिण्डिपादं तदेव हि ।
कर्णायामेन चाग्रे तु चतुरश्रसमन्वितम् ॥ २२ ॥
तदधस्त्वर्धदण्डेन पद्मं वस्वश्रसंयुतम् ।
तदधस्तु विकाराश्रं दण्डेनाब्जं तु पूर्ववत् ॥ २३ ॥
तदधो दण्डमानेन मध्यपट्टं युगाश्रकम् ।
पद्मं च षोडशाश्रं च पूर्ववत् परिकल्पयेत् ॥ २४ ॥
मूले शेषं युगाश्रं स्याच्चित्रखण्डं तदुच्यते ।
तदेवाष्टाश्रकं मध्यपट्टं श्रीखण्डमुच्यते ॥ २५ ॥
मध्यपट्टं कलाश्रं चेच्छ्रीवज्रस्तम्भमुच्यते ।
अग्राकारं युगाश्रं स्यात् त्रिपट्टक्षेपणान्वितम् ॥ २६ ॥
क्षेपणस्तम्भमित्युक्तं पट्टं पत्राद्धिशोभितम् ।
ऊर्ध्वाधस्ताच्छिखामानं त्रिचतुर्भागमेव वा ॥ २७ ॥
सर्वे पोतिकया युक्ता नानारूपैर्विचित्रिताः ।
पादाग्रविपुलं यत्तु तद् दण्डमिति कथ्यते ॥ २८ ॥
सर्वा(भ्य?ण्य)ङ्गानि हर्म्याणां मानयेद् दण्डमानतः ।
सपादं सार्धपादोनद्विगुणं द्विगुणोन्नतम् ॥ २९ ॥
श्रीकरं चन्द्रकान्तं च सौमुख्यं प्रियदर्शनम् ।
यथाक्रमेण नामानि कलशानां भवन्ति हि ॥ ३० ॥
पोतिकाखण्डमध्यं च कुम्भं स्कन्धं च पद्मकम् ।
मालास्थानं क्रमेणैव स्तम्भाग्रात् परिकल्पयेत् ॥ ३१ ॥
कुम्भोच्छ्रये नवांशे द्वग्भागेन चतुरंशकैः ।
कमलं कण्ठमंशेन भागेनास्यं प्रकीर्तितम् ॥ ३२ ॥

मसूरकमधिष्ठानं वस्त्वाधारं धरातलम्।
तलं कुट्टिममाद्यङ्गं पर्यायवचनानि हि ॥ ४० ॥
यावज्जगतिनिष्क्रान्तं तावत् कुमुदनिर्गमम्।
अम्बुजानां तु सर्वेषामुत्सेधसमनिर्गमम् ॥ ४१ ॥
दलाग्रतीव्रमुत्सेधात् पादं पादार्धमेव वा।
वेत्राणामपि सर्वेषां चतुर्भागैकनिर्गमम् ॥ ४२ ॥
तत्समं वा त्रिपादं वा महावाजननिर्गमम्।
एवं तीव्रकमं प्रोक्तं शोभाबलवशात् तु वा ॥ ४३ ॥
प्रवेशनिर्गमं कुर्यात् सर्वाङ्गानां मसूरके।
प्रतिच्छेदं न कर्तव्यं सर्वत्रैवं विचक्षणैः ॥ ४४ ॥
द्वारार्थं यत् प्रतिच्छेदं सम्पद्द्वारं च नेत्यलम्।
पादबन्धमधिष्ठानं छेदनीयं यथोचितम् ॥ ४५ ॥
जन्मादिपञ्चवर्गे तु तत्तत्तुङ्गावसानके।
सपट्टिकाङ्गेऽधिष्ठानेऽप्यन्यस्मिन्नेवमूह्यताम् ॥ ४६ ॥
यद् यत्रैवोचितं प्राज्ञस्तत् तत्रैव प्रयोजयेत् ॥ ४६½ ॥

स्तम्भोच्चार्धं त्रा मसूरोच्चमानं
तत् षट्सप्ताष्टांशकं भागहीनम्।
वस्त्वाधारोच्चं भवेत् सर्ववस्तु-
ष्वेवं पूर्वं शम्भुना सम्यगुक्तम् ॥ ४७½ ॥

इति मयमते वस्तुशास्त्रे अधिष्ठानविधानो नाम

चतुर्दशोऽध्यायः।

अथ पञ्चदशोऽध्यायः।

पादायामं सविस्तारमाकारं भूषणादिकम् ।
लक्षणान्तरतः सम्यग् वक्ष्ये संक्षेपतः क्रमात् ॥ १ ॥

स्थाणुः स्थूणश्च पादश्च जङ्घा च चरणोऽङ्घ्रिकः ।
स्तम्भश्च तलिपः कम्पः पर्यायवचनानि हि ॥ २ ॥

स(ते? वित)स्त्यष्टहस्तोच्चं द्वादशक्ष्माद्यपादकम् ।
तत्तद्वितस्तिहीनेन त्रिकरं चान्त्यभूमिके ॥ ३ ॥

आत्तोत्सेधांशमानेन पादोच्चं वा विधीयते ।
आत्ताधिष्ठानतुङ्गस्य द्विगुणं पादतुङ्गकम् ॥ ४ ॥

द्विगुणादधिकोत्सेधः स्तम्भः प्रोक्तः स्वयंभुवा ।
अष्टविंशतिमात्रैस्तु मूलभूस्तम्भविस्तृतम् ॥ ५ ॥

तत्तद्द्व्यङ्गुलभिन्नेन षण्मात्रं चान्त्यभूमिके ।
पादोच्चे पङ्क्तिनन्दाष्टभागेंऽशं पादविस्तृतम् ॥ ६ ॥

तदर्धं वा त्रिभागोनं चतुर्भागोनमेव वा ।
कुड्यस्तम्भस्य विस्तारस्तेन द्वित्रिचतुर्गुणः ॥ ७ ॥

पञ्चषड्गुण एवं स्याद् भित्तिविष्कम्भ इष्यते ।
जन्मो(र्धे?र्ध्वे) स्तम्भविक्षेपहोमाः स्तम्भविधौ विदुः ॥ ८ ॥

प्रतिस्तम्भः प्रतेरूर्ध्वे चोत्तराधो हितायतिः ।
जन्मो(र्धे?र्ध्वे) स्तम्भनिक्षेपः स्तम्भायामस्त्रिभागभाक् ॥ ९ ॥

गाम्भीर्यमवटं कृत्वा तदुपज्ञत(लं) कुरु ।
पादुकाद्युत्तरान्तस्थो निखातस्तम्भ इष्यते ॥ १० ॥

दारुस्तम्भविशालं वा सार्धं द्वित्रिगुणं तु वा ।
शिलास्तम्भविशालं स्याद् देवानां नैव मानवे ॥ ५५ ॥
इष्टकाश्मद्रुमैः सर्वैः स्तम्भाः प्रोक्ताश्चिरन्तनैः ।
युग्मायुग्मं तु देवानामयुग्मं तु नृणां मतम् ॥ ५६ ॥
अन्तःस्तम्भं बहिःस्तम्भमाजुसूत्रं यथा भवेत् ।
गृहाणां भित्तिमध्ये तु शालानां तु तथा भवेत् ॥ ५७ ॥
प्रासादानां तु पाद्बाह्ये पान्मध्ये शयनासने ।
उपानादिशिरः केचित् केचित् स्तूप्यन्तमुन्नतम् ॥ ५८ ॥
मुनयः प्रवदन्त्युच्चं प्रासादे सार्वदेशिके ।
पाद्बाह्ये पादमध्ये वा सभामण्डपयोर्मतम् ॥ ५९ ॥
अन्तर्बहिश्च मध्ये तु सालानां मानसूत्रकम् ।
युञ्जीयादेवमेवं तु सर्वेषां सम्पदां पदम् ॥ ६० ॥
विपरीते विपत्त्यै स्यादिति शास्त्रविनिश्चयः ।
स्तम्भोत्तरादिकाङ्गानां द्रव्यं द्रुमोपलेष्टकाः ॥ ६१ ॥
स्निग्धसारमहासारा ह्यवृद्धास्तरुणेतराः ।
अवक्रा निर्व्रणाः सर्वे ग्रहीतव्या महीरुहाः ॥ ६२ ॥
पुण्याद्रिवनतीर्थस्था दर्शनीया मनोरमाः ।
सर्वसम्पत्समृद्ध्यर्थो भवेयुस्ते न संशयः ॥ ६३ ॥
पुरुषः खदिरः सालो मधूकः स्तम्बकस्तथा ।
शिंशापार्जुनाजकर्णौ क्षीरिणी पद्मचन्दनौ ॥ ६४ ॥
पिशितो धन्वनः पिण्डी सिंहो राजादनः शमी ।
तिलकश्च द्रुमाश्चैते स्तम्भवृक्षाः समीरिताः ॥ ६५ ॥

निम्बासनशि(री)षाश्च एकः कालश्च कट्फलः ।
(कि ? ति)मिसो लिकुचश्चैव पनसः सप्तपर्णकः ॥ ६६ ॥
भौमा चैव गवाक्षी चेत्यादयश्चोर्ध्वभूरुहाः ।
एकवर्णाः स्थिराः स्निग्धाः सुखसंस्पर्शनान्विताः ॥ ६७ ॥
प्राचीनाश्चाप्युदीचीना भूमग्नाः शुभदाः शिलाः ।
स्त्रीलिङ्गाश्चापि पुल्लिङ्गा निर्दोषाश्च नपुंसकाः ॥ ६८ ॥
सुघनाः समदग्धाश्च सुस्वराश्चेष्टकाः शुभाः ।
स्त्रीलिङ्गाश्चापि पुल्लिङ्गा भिन्नच्छिद्रादिवर्जिताः ॥ ६९ ॥
एतैरेवंविधैर्द्रव्यैः कृतं वस्तु समृद्धये ।
धर्मार्थकामसौख्यानां भवेदेवेति निश्चितम् ॥ ७० ॥
न देवतालयान्तस्थाः प्रहता वा न विद्युता ।
न दावानलसंलीढा न भूतालयमध्यगाः ॥ ७१ ॥
न महापथसंरूढा न तु ग्रामसमुद्भवाः ।
न घटाम्बुभिरासिक्ता न पक्षिमृगसेविताः ॥ ७२ ॥
न वायुना न मातङ्गैर्भग्ना नैव गतासवः ।
न चण्डालजनाकीर्णा न सर्वजनसेविताः ॥ ७३ ॥
नान्योन्यवलिता भग्ना न वल्मीकसमाश्रिताः ।
न लतालिङ्गिता गाढा न सिराकोटरावृताः ॥ ७४ ॥
नाङ्कुरावृतसर्वाङ्गा न भृशं कीटदूषिताः ।
नाकालफलिनो ग्राह्या न श्मशानसमीपगाः ॥ ७५ ॥
सभाचैत्यसमीपस्था देवादीनां न भूरुहाः ।
वापीकूपतटाकादिवस्तुष्वपि च संभवाः ॥ ७६ ॥

भागेन पद्ममर्धेन वृत्तमर्धेन हीरकौ ।
हीरौ पादसमव्यासौ तत्कर्णेनास्यविस्तृतम् ॥ ३३ ॥
तत्कर्णं कुम्भविस्तारं तत्कर्णं फलकायतम् ।
अथवा फलकायामं चतुर्दण्डं त्रिदण्डकम् ॥ ३४ ॥
सार्धत्रिदण्डमायाममुत्सेधाख्यं त्रिदण्डकम् ।
तदुत्सेधे त्रिभागे तु भागेनोत्सन्धिरिष्यते ॥ ३५ ॥
भागेन वेत्रसंशेन पद्मं पाल्याभमिष्यते ।
नागवक्त्रसमाकारमा वेत्रात् पादरूपवत् ॥ ३६ ॥
पादविस्तारविस्तारं धृकण्ठं वीरकाण्डकम् ।
सर्वेषामपि पादानां वीरकाण्डं युगाश्रकम् ॥ ३७ ॥
तदुत्सेधत्रिपादोनदण्डो(ण्डोत्थं) स्कन्धमिष्यते ।
तदधस्तु तदर्धेन पद्मं पत्रविचित्रितम् ॥ ३८ ॥
मालास्थानमधस्तस्माद् दण्डमानसमुन्नतिः ।
पादविस्तारविस्तारा पोतिका तत्समोदया ॥ ३९ ॥
पञ्चदण्डसमायामा श्रेष्ठार्धोच्चा कनिष्ठिका ।
आयता सा त्रिदण्डेन चतुर्दण्डेन (दिर्घका?) ॥ ४० ॥
त्रिभागोना त्रिपादोच्चा मध्यमा पोतिका भवेत् ।
पूर्वोक्तं तत् समण्डीनां सकुम्भा(नां) चतुर्गुणम् ॥ ४१ ॥
त्रिगुणं केवलानां तु पादानां प्रविधीयते ।
सर्वेषामपि पादानां यथेष्टायतमीरितम् ॥ ४२ ॥
तदुच्चत्रिचतुर्भागोच्चा वा स्वाग्रे तु पट्टिका ।
अर्धं त्रिद्यंशम(ङ्घ्रूरुाङ्घ्र्यु)नं छायामानं विधीयते ॥

त्रिभागं वा चतुर्भागं तरङ्गस्थानमिष्यते ।
सक्षुद्रक्षेपणं मध्यपट्टं पत्रविचित्रितम् ॥ ४४ ॥
समास्तुरङ्गाश्चान्योन्यहीनाः सर्वत्र सम्मताः ।
अग्रनिष्क्राममर्धं वा त्रिभागं वा स्वतारतः ॥ ४५ ॥
मुष्टिबन्धोपरिक्षिप्तव्यालसंहृतिरूपवत् ।
रक्तबन्धक्रियावल्ली चित्रा वा ग्रन्थपट्टिका ॥ ४६ ॥
सनालीकं समतलं सनाटकमथापि वा ।
भूतेभमकरैर्व्यालसंयुक्तं चाग्रमण्डनम् ॥ ४७ ॥
पार्श्वयोः पोतिकामध्ये पट्टं पादविशालवत् ।
नानाचित्रैर्विचित्रा वा सा प्रोक्ता चित्रपोतिका ॥ ४८ ॥
पत्रैर्विचित्रिता पत्रपोतिकेति प्रकीर्तिता ।
महार्णवतरङ्गाभतरङ्गाभा तरङ्गिणी ॥ ४९ ॥
चतुःषडष्टपङ्क्त्यर्कसङ्ख्या वा स्युस्तरङ्गकाः ।
बहवोऽपि समाश्चैते चान्योन्याः (स्याद्दः?स्युर्व)राः क्रमात् ॥
पादमर्धं त्रिपादं वा भित्तेः स्तम्भस्य निर्गतम् ।
चतुरष्टाश्रवृत्तानां यथाक्रममिति स्मृतम् ॥ ५१ ॥
द्विहस्ताद्या चतुर्हस्तात् स्तम्भान्तरमिति स्मृतम् ।
षडङ्गुलविवृद्ध्या तु नवभेदं प्रकीर्तितम् ॥ ५२ ॥
गृहीतांशवशेनापि यथायुक्त्या प्रयोजयेत् ।
स्तम्भस्तम्भान्तरं सर्वं प्रासादे सार्वदेशिके ॥ ५३ ॥
विषमस्तम्भभागं तु वास्तुवस्तुविनाशनम् ।
सायतं चापि तत्सर्वं तन्नाम्नैव प्रपद्यते ॥ ५४ ॥

विनष्टवस्तुसञ्जातद्रव्यं सर्वविपत्करम्।
तस्मात् सर्वप्रयत्नेन शुद्धं द्रव्यं प्रगृह्यताम्॥ ७७॥
शिला देवालये ग्राह्या द्विजावनिपयोर्मताः।
पाषण्डिनां च कर्तव्या न कुर्याद् वैश्यशूद्रयोः॥ ७८॥
कर्तव्यं यदि तद् वास्तु धर्मकामार्थनाशकृत्।
एकद्रव्यकृतं शुद्धं मिश्रं द्विद्रव्यनिर्मितम्॥ ७९॥
त्रिद्रव्यसंयुतं यत्तु तत् सङ्कीर्णमुदाहृतम्।
पूर्वोदितानां वासेषु कर्तव्यं सम्पदां पदम्॥ ८०॥
सर्वद्वारिकनक्षत्रे शुभपक्षमुहूर्तके।
गच्छेदरण्यं द्रव्यार्थी कृतकौतुकमङ्गलः॥ ८१॥
निमित्तैः शकुनैर्योग्यैः सह मङ्गलशब्दकैः।
गन्धैः पुष्पैश्च धूपैश्च मांसेन कृसरेण च॥ ८२॥
पायसौदनमत्स्यैश्च भक्षैश्चापि पृथग्विधैः।
अर्चयेदीप्सितान् सर्वान् वृक्षांश्च वनदेवताः॥ ८३॥
भूतक्रूरबलिं दत्त्वा कर्मयोग्यद्रुमं (वरैः? हरेत्)।
मूलाग्रादार्जवं वृत्तं शाखानेकसमन्वितम्॥ ८४॥
तत्तु पुंस्त्वं भवेन्मूले स्थूलं स्त्रीत्वं कृशाग्रकम्।
स्थूलाग्रं कृशमूलं तु षण्डमेतदुदीरितम्॥ ८५॥
मुहूर्तस्तम्भमुद्दिश्य पुंभूरुह उदीरितः।
सर्वेष्वङ्गेषु वस्तूनां पुंस्त्रीषण्डं प्रकीर्तितम्॥ ८६॥
पूर्वाशायां द्रुमस्यास्य स्वपेद् दर्भान्तरे शुचिः।
स्वप्रदक्षिणपार्श्वे तु संस्थाप्य परशुं सुधीः॥ ८७॥

पीत्वा शुद्धं पयो रात्राववराभिमुखोऽपरः।
स्थपतिर्वरवेषाढ्यो मन्त्रयेत् सपरश्वथः॥ ८८ ॥

अयं मन्त्रः —

अपक्रामन्तु भूतानि देवताश्च सगुह्यकाः।
युष्मभ्यं तु बलं भूयः सोमो दिशतु पादपाः!॥ ८९ ॥
शिवमस्तु महीपुत्रा! देवताश्च सगुह्यकाः!।
कर्मैतत् साधयिष्यामि क्रियतां वासपर्ययः॥ ९० ॥

एवमुक्त्वा नमस्कृत्य पादपेभ्यो नमः शुचिः।
दुग्धतैलघृतैः सम्यक् सन्तेज्य परशोर्मुखम्॥ ९१ ॥
उपक्रामेत् तु तं छेत्तुं यथाकामं वनस्पतिम्।
मूले हस्तं व्यपोह्योर्ध्वे त्रिश्छित्वा तत्र लक्षयेत्॥ ९२ ॥
वारिस्रावो विवृद्ध्यर्थः क्षीरं पुत्रविवर्धनम्।
शोणितं स्वामिनं हन्याद् वर्जयेत् तं प्रयत्नतः॥ ९३ ॥
पतने सिंहशार्दूलहस्तिशब्दाः सुशोभनाः।
रुदितं हसितं क्रोशं कूजितं निन्दितं वरैः॥ ९४ ॥
पातयेदुत्तराग्रं तु पूर्वाग्रं वा वनस्पतिम्।
ते दिशौ शुभदे स्यातामन्याशासु विपत्तये॥ ९५॥
सालाश्मर्यंजकर्णीनामूर्ध्वे तु पतनं शुभम्।
मूले पृष्ठागमे बन्धुप्रेष्ययोश्च विनाशनम्॥ ९६ ॥
निर्गमत्स्थितिमद् भूत्वा वृक्षान्तरनिपातने।
शिरःसङ्गेन नाशः स्यान्मूलसङ्गे श्रमो भवेत्॥ ९७ ॥

शरीरभङ्गं कर्तॄणां नाशमग्रेऽप्यपत्यहृत्।
अन्योन्यपतनं पूज्यं छेद्यं चोभयतः समम्॥ ९८॥
चतुरश्रमृजुं कृत्वा मुहूर्तस्तम्भसङ्ग्रहे।
सितपट्टेन सञ्छाद्य स्यन्दने न्यस्य वेशयेत्॥ ९९॥
देवद्विजमहीपानां विशां वै शकटेन तु।
शूद्रस्य पुरुषस्कन्धेनानीयात् तु विचक्षणः॥ १००॥
सर्वेन्द्रकीला एवं स्युः प्रापणीयाः प्रयत्नतः।
अन्येषामपि कुप्यानां वेशने त्वग्रमग्रतः॥ १०१॥
पार्श्वयोः शाययित्वा तु शकटे न्यस्य वेशयेत्।
प्रशस्ते द्वारि प्रग्राह्य स्थपत्यनुगतद्रुमम्॥ १०२॥
कर्ममण्डपके न्यस्य वालुकोपरि शाययेत्।
प्रागग्रं चोत्तराग्रं वाप्याशुष्कं रक्षयेत् पुनः॥ १०३॥
परावृत्तं न कर्तव्यमाषण्मासं तु स द्रुमः।
मुहूर्तस्तम्भो देवानां द्विजातीनां यथाक्रमम्॥ १०४॥
कार्तमालश्च खदिरः खादिरश्च मधूककः।
राजादनो यथासङ्ख्यं विस्तारायाममुच्यते॥ १०५॥
भानुरुद्रदशद्वारवितस्त्यायामसंयुताः।
तत्सङ्ख्याङ्गुलिविस्तीर्णाः पङ्क्त्यंशोनाग्रविस्तराः॥ १०६॥
भूतसार्धचतुर्वेदगुणतालनिखातकाः।
भूमिभूमिवशादुक्तं स्तम्भोच्चं विपुलं तु वा॥ १०७॥
झपालाङ्घ्रौ तु सर्वत्र निखातं परिवर्जयेत्।
अश्वत्थोदुम्बरश्चैव प्लक्षश्च वटवृक्षकः॥ १०८॥

सप्तपर्णश्च बिल्वश्च पलाशः कुटचस्तथा ।
पीलुः श्लेष्मातकी लोध्रः कदम्बः पारिजातकः ॥ १०९ ॥
शिरीषः कोविदारश्च तिन्त्रिणीको महाद्रुमः ।
शिलीन्ध्रः सर्पमारश्च शल्मली सरलस्तथा ॥ ११० ॥
किंशुकश्चारिमेदश्चाभयाक्षामलकद्रुमाः ।
कपित्थः कण्टकश्चैव पुत्रजीवश्च डुण्डुकाः ॥ १११ ॥
कारस्करः करञ्जश्च वरणश्चाश्वमारकः ।
बदरो वकुलः पिण्डी पद्मकस्तिलकस्तथा ॥ ११२ ॥
पाटल्यगरुकर्पूरावग्राह्यौ गृहकर्मणि ।
देवयोग्या इमे सर्वे मानुषाणामनर्थदाः ॥ ११३ ॥
तस्मात् सर्वप्रयत्नेन गृह्णीयान्न नरालये ।
ऊषरं पाण्डुरं कृष्णचिक्कणं ताम्रपुल्लकम् ॥ ११४ ॥
मृदश्चतस्रस्तास्वेव गृह्णीयात् ताम्रपुल्लकम् ।
अशर्कराश्ममूलास्थिलोष्टं सतनुवालुकम् ॥ ११५ ॥
एकवर्णं सुखस्पर्शमिष्टं लोष्टेष्टकादिषु ।
मृत्खण्डं पूरयेदग्रे जानुदघ्ने जले ततः ॥ ११६ ॥
आलोड्य मर्दयेत् पद्भ्यां चत्वारिंशत् पुनः पुनः ।
क्षीरद्रुमकदम्बाम्राभयाक्षत्वग्जलैरपि ॥ ११७ ॥
त्रिफलाम्बुभिरासिक्त्वा मर्दयेन्मासमात्रकम् ।
चतुष्पञ्चषडष्टाभिर्मात्रैस्तद्द्विगुणायताः ॥ ११८ ॥
व्यासार्धार्धत्रिभागैकतीव्रा मध्ये परेऽपरे ।
इष्टका बहुशः शोष्याः समदग्धाः पुनश्च ताः ॥ ११९ ॥

एकद्वित्रिचतुर्मासमतीत्यैव विचक्षणः ।
जले प्रक्षिप्य यत्नेन जलादुद्धृत्य तत् पुनः॥ १२० ॥
निरार्द्रास्ताः प्रयोक्तव्या इष्टका इष्टकर्मणि॥ १२०३॥

एवं द्रुमेष्टकशिला विधिना गृहीत्वा
कुर्वन्तु वस्तु विहिता हि वराः समृद्ध्यै ।
यन्निन्दितं त्वपरवस्त्ववशिष्टमाद्यै-
र्द्रव्यं विनष्टभवनप्रभवं विपत्त्यै ॥ १२१३ ॥

स्तम्भायामं तारमाकारभेदं
सालङ्कारं भूषणं च क्रमेण ।
युक्त्या युक्तं सम्पदामास्पदं तत्
प्रोक्तं नृणां तैतिलानां मयेह ॥ १२२३ ॥

इति मयमते वस्तुशास्त्रे पादप्रमाणद्रव्यपरिग्रहो नाम

पञ्चदशोऽध्यायः ।

अथ षोडशोऽध्यायः ।

उत्तरादिवृतेरन्तं प्रस्तारावयवं क्रमात् ।
वक्ष्ये संक्षिप्य सर्वेषां हर्म्याणामथ योग्यकम् ॥ १ ॥
उत्तरं त्रिविधं पादविस्तारं तत्समोद्गमम् ।
त्रिपादोदयमध्योच्चं विस्तारं पादतः समम् ॥ २ ॥
खण्डोत्तरं पत्रबन्धं रूपोत्तरमिति त्रिधा ।
त्रिपादं वा त्रिभागोनमर्धं वा कर्णनिर्गमम् ॥ ३ ॥

स्वस्तिकं वर्धमानं च नन्द्यावर्तसमाकृतिः ।
सर्वतोभद्रवृत्तिर्वा प्रत्युत्तरनिवेशनम् ॥ ४ ॥
त्रिभागैकं चतुर्भागं वाजनं निर्गमोद्गमम् ।
चतुरश्रं सपर्णाग्रं तदूर्ध्वे मुष्टिबन्धनम् ॥ ५ ॥
तुलाच्छेदेन वा कुर्यात् पृथग्वा वाजनोपरि ।
स्तम्भार्धविपुलं स्वार्धं तीव्रं पट्टाम्बुजक्रियम् ॥ ६ ॥
सनालिकमधस्तात् तु वाजनाद् दण्डनिर्गमम् ।
मूलाग्रयोः शिखोपेता तदूर्ध्वे तु प्रमालिका ॥ ७ ॥
स्तम्भव्याससमोच्चा वा त्रिचतुर्भागतीव्रका ।
कुम्भमण्डियुताग्रा च हस्तिमुण्डकसन्निभा ॥ ८ ॥
दण्डिकासमनिष्क्रान्ता तदूर्ध्वे दण्डिका भवेत् ।
स्तम्भार्धविपुला स्वार्धतीव्रा नीव्रार्धनिष्क्रमा ॥ ९ ॥
मुष्टिबन्धसमाकारश्चतुरश्रा यथा तथा ।
यथेष्टविपुलोत्तुङ्गं तत्तुङ्गसमवेशनम् ॥ १० ॥
वलयं स्यात् तदूर्ध्वे तु गोपानं वा तदूर्ध्वतः ।
मुष्टिबन्धविशालोच्चा पट्टिकाक्षेपणाम्बुजा ॥ ११ ॥
छित्त्वार्पितावशिष्टा तु दण्डिकोपरि पट्टिका ।
तस्यां छित्त्वा तु तन्मानं गोपानं चार्पयेद् बुधः ॥ १२ ॥
उत्तरान्तावलम्बं वा यथायुक्ति यथारुचि ।
वाजनोर्ध्वे तुलोर्ध्वे वा गोपानं योजयेद् बुधः ॥ १३ ॥
तुलान्तरसमं गोपानान्तरं प्रविधीयते ।
गोपानदण्डिकोर्ध्वे चेद् वाजनान्तावलम्बनम् ॥ १४ ॥

दण्डार्धविपुलं स्वार्धं तीव्रं गोपानमूर्ध्वतः ।
कम्पं समान्तरं कुर्याद् वलयच्छिद्रमन्तरे ॥ १५ ॥
दण्डिकावाजनान्तस्थं कायपादं यथांशकम् ।
पादविस्तारमर्धार्धनिष्कान्तं साग्रपट्टिकम् ॥ १६ ॥
पादानामन्तरं छाद्यं फलकैः सारदारुजैः ।
अष्टांशबहलं छन्नफलकाच्छाद्यमूर्ध्वतः ॥ १७ ॥
गोपानस्योपरिष्टात्तुच्छादयेल्लोहलोष्टकैः ।
कपो(ल ? त)पालिकोत्सेधनिष्कान्तं द्वित्रिदण्डकम् ॥१८॥
एकहस्तं द्विहस्तं वा क्षुद्रे महति मन्दिरे ।
यथाशोभं यथाचित्रं कपोते कर्णपालिका ॥ १९ ॥
तथा मध्यस्थिता वापि सौधे शैले समाहिता ।
विधेया वाजनस्योर्ध्वे भूतहंसादिकाव(लम् ? लिः) ॥ २० ॥
दण्डोच्चा वा त्रिपादोच्चा वाजनं पूर्ववद् भवेत् ।
कपोतालम्बनं तत् स्याद् दण्डार्धं वा(थ) दण्डकम् ॥ २१ ॥
अध्यर्धादित्रिदण्डान्तं कपोतोच्चविनिर्गतम् ।
वसन्तकं वा निद्रा वा त्रिधे(वा ? या) वाजनोपरि ॥ २२ ॥
त्रिपादोच्चा तदूर्ध्वं स्यात् कपोतोच्चं तु पूर्ववत् ।
एवं स्याद् दृढकल्प्यं तच्छिलयेष्टकमात्रकैः ॥ २३ ॥
यथाप्रयोगं स्थैर्यं तु तथा योज्यं विचक्षणैः ।
कपोतोच्चत्रिभागं वा पादं वा क्षुद्रनिष्कृतिः ॥
कपोते नासिका क्षुद्रे नीव्रो(र्ध्वे) स्थितकर्णिका ।
सपाददण्डा वाध्यर्धं द्विदण्डं विस्तृता स्मृता ॥ २५ ॥

सिंहश्रोत्रशिखालिङ्गं पट्टिकान्तस्य पट्टिका ।
विधेया स्वस्तिकाकृत्या नासिकोर्ध्वे तु नासिका ॥ २६ ॥
कुक्षिमानं यथामानं यथाशोभनमेव वा ।
प्रतिवाजनकस्योर्ध्वे नेष्यते नासिकोच्छ्रयम् ॥ २७ ॥
आलिङ्गं पादपादोच्चं पादात् पादविनिर्गतम् ।
तस्मादन्तरितं चोर्ध्वे निष्क्रान्तावेशनक्रियम् ॥ २८ ॥
त्रिपट्टाग्रं हि पादोच्चं पादे पादान्तरे स्थितम् ।
दण्डं त्रिपादमर्धं वा प्रत्युत्सेधं तदूर्ध्वतः ॥ २९ ॥
स्वोच्चत्रिपादनिष्क्रान्ता प्रतिरर्धेन वा तथा ।
दण्डः सपादः सार्धो वा प्रतिवक्त्रं विनिर्गमः ॥ ३० ॥
तावदूर्ध्वोद्गतिस्तस्याः प्रागुक्तविधिना स्थिता ।
सव्याला वा ससिंहेभा ऋज्वी वा स्यात् प्रतेः कृतिः ॥
तदुच्चत्रिचतुर्भागं वाजनं निर्गमोद्गमम् ।
समकरं चित्रखण्डं नागवक्त्रमिति त्रिधा ॥ ३२ ॥
नागवक्त्रं नागफणं स्वस्त्याकृतिशिरःक्रियम् ।
तैतिलानां द्विजादीनां भवेत् समकरा प्रतिः ॥ ३३ ॥
चतुरश्रं तु खण्डाग्रं मकरं चित्रखण्डकम् ।
नृपाणां वणिजां शूद्रजन्मनामर्धचन्द्रकम् ॥ ३४ ॥
हस्तिरूपं भवेन्मुण्डं प्र(त्ता?ल)ग्रं चित्रसन्निभम् ।
ककरं कर्कटं बन्धमन्यदप्येवमूह्यताम् ॥ ३५ ॥
वाजनोर्ध्वे वलीकोर्ध्वे तुलां सम्यङ् निवेशयेत् ।
दण्डोच्चं वा त्रिपादोच्चमर्धतारसमान्वितम् ॥ ३६ ॥

त्रिचतुष्पञ्चदण्डेन दीर्घं तत् साग्रनालिकम् ।
सव्यालाग्रं सम्भृताग्रं पार्श्वाङ्गस्थतरङ्गवत् । ३७ ॥
वलीकं स्याद् वलीकोर्ध्वे कर्तव्या वर्णपट्टिका ।
दण्डार्धार्धविशालोच्चा निश्छिद्रं स्यात् तदन्तरे ॥
फलकैश्च तदूर्ध्वे तु दण्डोत्सेधा तुला स्थिरा ।
त्रिपादविस्तृता न्यस्ता प्रवेशानुगता शुभा ॥ ३९ ॥
तुलाविस्तारतारोच्चा जयन्ती स्यात् तुलोपरि ।
अर्धदण्डेन तत्रोच्चा जयन्त्यूर्ध्वेऽनुमार्गकम् ॥ ४० ॥
तदूर्ध्वे फलका पादपादषड्भागतीव्रकाः ।
इष्टकाचूर्णसङ्घातप्रस्तरस्तम्भविस्तरम् ॥ ४१ ॥
करालमुद्गिगुल्मासकल्कचिक्कणकर्मवान् ।
उत्तरं वाजनं चैव तत्पार्श्वानुगतं भवेत् ॥ ४२ ॥
तुला द्वारानुयाता हि जयन्ती तिर्यगागता ।
अनुमार्गं तदूर्ध्वे तु द्वारस्यानुगतं शुभम् ॥ ४३ ॥
द्वारतिर्यग्गता वाथ तुला देवनृपेशयोः ।
त्रिदण्डं वा द्विदण्डं वा स्याद् वलीकतुलान्तरम् ॥ ४४ ॥
द्विदण्डं सार्धमध्यर्धं जयन्त्यन्तरमिष्यते ।
दण्डान्तरमनुमार्गं निश्छिद्रं स्यात् तदूर्ध्वतः ॥ ४५ ॥
अथ चित्रविकल्पाङ्गा विधेया प्रस्तरक्रिया ।
क्षुद्राणां तु तुलादीनि यथा स्थैर्यं तथाचरेत् ॥ ४६ ॥
विरूपं वा सरूपं वा सर्वमङ्गं प्रयोजयेत् ।
तुलाद्रव्योपरिष्टात् तु फलकाच्छादनं तु वा ॥ ४७ ॥

इष्टका(भिः) पिधातव्या शेषं पूर्ववदाचरेत् ।

पङ्क्त्यष्टभागविकलं हि मसूरकोच्चा-
न्मञ्चोन्नतं मतम(घो?धो) तलिपार्धकं वा ।
यावद् बलं विपुलसुन्दरतां समेति
तावद् विधेयमधुना विधिना विधिज्ञैः ॥ ४८ ॥

मधुघृतदधिदुग्धं माषयूषं च चर्म
कदलिफलगुलं च त्रैफलं नालिकेरम् ।
क्रमवशमनुभागैर्वर्धितं लब्धचूर्ण
शतमथ कृतमस्य द्वैगुणं शर्करास्तु ॥ ४९ ॥

हस्तस्तम्भतुलादिकान् नरगृहे युञ्ज्यादयुग्मं यथा
युग्मायुग्मकसङ्ख्यया सुरगृहे युञ्जीत हस्तादिकान् ।
मध्ये द्वारमनिन्दितं सुरमहीदेवक्षितीशालये
शेषाणामुपमध्यमेव विहितं तत् सम्पदामास्पदम् ॥

प्रतेरुपरि वेदिः स्यात् सार्धद्वित्र्यङ्घ्रिणोदयम् ॥ ५१ ॥
द्वौ षट् चत्वारि कम्पानि पादपादघनानि च ।
पद्मशैवलपत्रादिचित्राङ्गा वेदिका मताः ॥ ५२ ॥
कम्पाधस्तात् प्रयोज्या हि स्तम्भास्तत्रैव युक्तितः ।
ऊर्ध्वाधः कम्पवत् पद्मपट्टिकं चाग्रबन्धनम् ॥ ५३ ॥
वेदिकोपरि (लो?यो)ज्यानि जालकानि विचक्षणैः ।
त्यक्त्वा भित्त्यङ्घ्रिमध्यं तु चतुर्दण्डान्तविस्तृतम् ॥ ५४ ॥
द्विदण्डादिनिजव्यासद्विगुणं तुङ्गमीरितम् ।
सार्धमङ्घ्र्यूनकं वोच्चं त्यक्त्वा मध्याङ्घ्रिरन्ध्रकम् ॥ ५५ ॥

युग्मायुग्माङ्घ्रिभिः कम्पैर्युक्तं तुङ्गे च वैपुले।
गवाक्षं कुञ्जराक्षं च नन्द्यावर्तमृजुक्रियम्॥ ५६॥
पुष्पखण्डं सकर्णं च योजितव्यं यथोचितम्।
दीर्घाश्रं कर्णकच्छिद्रं तद् गवाक्षमिति स्मृतम्॥ ५७॥
युग्माश्रं कर्ण(ग ? क)च्छिद्रं कुञ्जराक्षमिति स्मृतम्।
पञ्चसूत्रमयच्छिद्रं प्रदक्षिणवशात् कृतम्॥ ५८॥
नन्द्यावर्ताकृतिवशान्नन्द्यावर्तमिति स्मृतम्।
स्तम्भतिर्यग्गतं कम्पमृजुत्वात् तदृजुक्रियम्॥ ५९॥
पुष्पखण्डं सकर्णं च नन्द्यावर्तं तथोच्यते।
भित्तिमध्याद् बहिस्तस्य स्तम्भयोगं कवाटयुक्॥ ६०॥
कवाटयुगलं वैकं घाटनोद्घाटनक्षमम्।
पादवर्गे भवेद् ग्रीवावर्गे वातायनस्थितिः॥ ६१॥
गुलिकाजालकं धामविन्यासाकृतिरन्ध्रकम्।
स्वस्तिकं वर्धमानं च सर्वतोभद्रसन्निभम्॥ ६२॥
द्रुमोपलेष्टकाद्रव्यैर्युक्त्या युञ्जीत बुद्धिमान्।
जालकं फालकं कुड्यमैष्टकं च त्रिधा मतम्॥ ६३॥
जालकं जालकैर्युक्तमिष्टकामयमैष्टकम्।
फालकं फलकोपेतं भित्तिमध्येऽङ्घ्रिसंयुतम्॥ ६४॥
भित्तिबन्धनमूर्ध्वाधःपद्मसङ्घट्टपट्टिकम्।
पादपादषडष्टांशबहला फलका भवेत्॥ ६५॥
शिबिकाकुड्यवद् वाथ सर्वत्र फलकामयम्।
एतत् तु फलकाकुड्यं यत्तु यत्र यथोचितम्॥ ६६॥

तदेव तत्र योज्यं स्याद् वस्तुविद्याविचक्षणैः ॥ ६६ ॥

एवं प्रोक्तं प्रस्तरं वेदिकाङ्गं
युक्त्या तज्ज्ञैर्जालकं च त्रिकुड्यम् ।
नैवच्छेद्या वेदिका जालकार्थं
न प्रत्यङ्गं सर्वतश्छेदनीयम् ॥ ६७ ॥

इति मयमते वस्तुशास्त्रे प्रस्तरकरणं नाम
षोडशोऽध्यायः ।

अथ सप्तदशोऽध्यायः ।

पार्श्वगस्थितशयितद्रव्याणां सन्धिरुच्यते ।
एकस्मिन् वस्तुनि द्रव्यैर्बहुभिश्च निघट्टनात् ॥ १ ॥
दुर्बलत्वाद् द्रुमाग्राणामबले बलवर्धनात् ।
सन्धिकर्म प्रशस्तं स्यात् सजातीयैर्वरद्रुमैः ॥ २ ॥
मल्ललीलं तथा ब्रह्मराजं वै वेणुपर्वकम् ।
पूकपर्वं देवसन्धिर्दण्डिका षड्विधाः स्मृताः ॥ ३ ॥
चतुर्दिक्षु बहिः स्थित्वा निरीक्ष्य स्थपतिर्गृहम् ।
दक्षिणादक्षिणे दीर्घादीर्घाभ्यां सन्धयेत् क्रमात् ॥ ४ ॥
मध्ये च दक्षिणे चैव यः सन्धिं कर्तुमीहते ।
मध्येऽतिदीर्घं युञ्जीयाद् दीर्घमल्पं च पूर्ववत् ॥ ५ ॥
वामेऽवामे समद्रव्यं मध्ये दीर्घमथापि वा ।
मध्यद्रव्यं विना वामेऽवामे द्रव्यं समं तथा ॥ ६ ॥

एतत्सन्धिं बहिः कुर्यात् तथैवाभ्यन्तरे विदुः ।
स्थपतिर्हृदयस्था(ने) स्थित्वा प्रेक्ष्य चतुर्दिशि ॥ ७ ॥
दीर्घमल्पं समद्रव्यं पूर्ववत् परिकल्पयेत् ।
आधाराधेयनीत्यैव द्रव्यसन्धानमूह्यताम् ॥ ८ ॥
मूले मूलं न युञ्जीयादग्रे चाग्रं तथैव च ।
मूलाग्रद्रव्ययोगेन सन्धिकर्म सुखप्रदम् ॥ ९ ॥
मूलं हि शयितं चाधश्चाग्रमूर्ध्वे तु योजयेत् ।
द्विद्रव्यमेकसन्धि स्यान्मल्लीलमिति स्मृतम् ॥ १० ॥
त्रिद्रव्यैस्तु द्विसन्धि स्याद् ब्रह्मराजमितीरितम् ।
चतुर्भिः पञ्चभिर्द्रव्यैस्त्रिचतुस्सन्धयः क्रमात् ॥ ११ ॥
वेणुपर्वमिति प्रोक्तं तैतलानां नृणां गृहे ।
षड्भिस्तु सप्तभिर्द्रव्यैः सन्धयः पञ्च षट् क्रमात् ॥ १२ ॥
पूकपर्वेति तत् प्रोक्तं धनधान्यकरं स्मृतम् ।
अष्टभिर्नवभिर्द्रव्यैः सन्धयः सप्त वाष्टधा ॥ १३ ॥
देवसन्धिरिति प्रोक्तः सर्ववासेषु योग्यतः ।
बहुसन्धिर्बहुद्रव्यैर्दीर्घमल्पं च पूर्ववत् ॥ १४ ॥
दण्डिकेति समाख्याता धनधान्यसुखप्रदा ।
दक्षिणापरभागे तु द्रव्यमूलं प्रशस्यते ॥ १५ ॥
अग्रमग्रं तथैशान्ये तेषां बन्धनमुच्यते ।
आधारं प्रथमं प्राच्यां मूलाग्रच्छेदनान्वितम् ॥ १६ ॥
दक्षिणोत्तरयोरग्रं तस्योपरि निधापयेत् ।
दक्षिणोत्तरयोर्मूलमूर्ध्वच्छेदनसंयुतम् ॥ १७ ॥

पश्चिमस्थमधश्छेद्यं क्षेप्यमाधेययोगतः ।
एतत् तु सर्वतोभद्रमवागादि तथा विदुः ॥ १८ ॥
नन्द्यावर्तविधानेन नन्द्यावर्तं प्रकल्पयेत् ।
दक्षिणोत्तरगं दीर्घं दक्षिणे तु सकर्णकम् ॥ १९ ॥
प्राक्प्रत्यग्गतमायामं पश्चिमे तु सकर्णकम् ।
दक्षिणोत्तरगं दीर्घमुत्तरे तु सकर्णकम् ॥ २० ॥
पूर्वपश्चिमगं दीर्घं पूर्वायां तु सकर्णकम् ।
आधाराधेयनीत्यैव पूर्वादीनि च विन्यसेत् ॥ २१ ॥
नन्द्यावर्तमिदं तद्वदवागादीनि च क्रमात् ।
पक्षयोर्बहुभिर्द्रव्यैर्दीर्घं प्रागुदगग्रकम् ॥ २२ ॥
सशिखैश्च बहुद्रव्यैर्द्वाभ्यां वा तिर्यगग्रकम् ।
स्वस्त्याकृतिसमायुक्तं स्वस्तिबन्धनमिष्यते ॥ २३ ॥
परितो बहुभिर्द्रव्यैर्युक्तं तद्वत् तदन्तरे ।
मध्येऽङ्कणसमायुक्तं बाह्ये युक्ता(?) सभद्रकम् ॥ २४ ॥
पूर्वद्रव्यं परद्रव्यं भद्रकं दक्षिणोत्तरान् ।
शालानां भित्तिमाश्रित्य युक्त्या साधु समाचरेत् ॥२५॥
एवं युञ्ज्यादिदं बन्धं वर्धमानमितीरितम् ।
अधोभूमिक्रियायुक्त्या स्यादूर्ध्वोर्ध्वतलं प्रति ॥ २६ ॥
विपरीते विपत्त्यै स्यादिति शास्त्रविनिश्चयः ।
दीर्घादीर्घेषु संयोगद्रव्यसन्धानतर्पणम् ॥ २७ ॥
यथाबलं (यथा)योगं तथा यो(ग्यं ? ज्यं) विचक्षणैः ।
एवं विधिविशिष्टं स्यात् सम्पत्त्यै द्रव्यबन्धनम् ॥ २८ ॥

मेषयुद्धं त्रिखण्डं च सौभद्रं चार्धपाणिकम्।
महावृत्तं च पञ्चैते स्तम्भानां सन्धयः स्मृताः॥ २९॥

षट्शिखा झषदन्तं च सूकरघ्राणमेव च।
सङ्कीर्णकीलं वज्राभं पञ्चैव शयितेष्वपि॥ ३०॥

स्वव्यासकर्णमध्यर्धद्विगुणं वा तदायतम्।
त्र्यंशैकं मध्य(म)शिखं मेषयुद्धं प्रकीर्तितम्॥ ३१॥

स्वस्त्याकारं त्रिखण्डं स्यात् सत्रिचूलि त्रिखण्डकम्।
पार्श्वे चतुश्शिखोपेतं सौभद्रमिति संज्ञितम्॥ ३२॥

अर्धं छित्त्वा तु मूलेऽग्रे चान्योन्याभिनिवेशनात्।
अर्धपाणिरिति प्रोक्तो गृहीतघनमानतः॥ ३३॥

अर्धवृत्तशिखं मध्ये तन्महावृत्तमुच्यते।
वृत्ताकृतिषु पादेषु प्रयुञ्जीत विचक्षणः॥ ३४॥

स्तम्भानां स्तम्भदैर्घ्यार्धादधः सन्धानमाचरेत्।
स्तम्भमध्योर्ध्वसन्धिश्चेद् विपदामास्पदं सदा॥ ३५॥

कुम्भमण्ड्यादिसंयुक्तं सन्धानं सम्पदां पदम्।
सालङ्कारे शिलास्तम्भे यथा योगं तथाचरेत्॥ ३६॥

स्थितस्य पादपस्याङ्गप्रवृत्तिवशतो विदुः।
ऊर्ध्वमूलमधश्चाग्रं सर्वसम्पद्विनाशनम्॥ ३७॥

अर्धपाणिद्विललाटे लाङ्गलाकारषट्शिखा।
घनमध्यस्थकीला या सा मता षट्शिखाह्वया॥ ३८॥

स्वायामतिर्यग्बाहु(स्थ)शिखं तु झषदन्तकम्
ऊर्ध्वाधस्ताद् यथायोग्यं यथाबलशिखान्वितम्॥ ३९

सूकरघ्राणमित्युक्तं सूकरघ्राणसन्निभम् ।
यथाबलं यथायुक्ति नानाबलशिखान्वितम् ॥ ४० ॥
नानाकीलैस्तु सङ्कीर्णं स्यात् तु सङ्कीर्णकीलकम् ।
वज्राकृतिशिखं नाम्ना वज्रसन्निभमेव तत् ॥ ४१ ॥
एतस्मिन् पङ्क्तिसन्धाने सन्धिरेकाकृतिर्भवेत् ।
उपर्युपरि चैवं स्याद् विपरीते विपत्करम् ॥ ४२ ॥
अन्तर्मूलं बहिश्चाग्रं पार्श्वद्रव्येषु योजयेत् ।
अन्तरग्रं बहिर्मूलं स्वामिनश्च विनाशनम् ॥ ४३ ॥
शिखा दन्तं च शूलं च विद्धं पर्यायमीरितम् ।
शल्यं च शङ्कुराणिश्च कीलं पर्यायमुच्यते ॥ ४४ ॥

अष्टसप्तकषडंशकेऽङ्घ्रिके
भागतारमथ शूलकीलयोः ।
कीलपार्श्वमथ पादमध्यमं
योजयेत् सममुदग्रबुद्धिमान् ॥ ४५ ॥
स्तम्भान्तं दन्तान्तकं चेद् विनाशं
दन्तान्तं चेत् स्तम्भमध्यं तदेव ।
स्तम्भान्तं चेत् सन्धिमध्यं सरोगं
सन्धेर्मध्यं पादमध्यं क्षयं स्यात् ॥ ४६ ॥

दिग्विदिग्द्वारदेवांशं सर्वं त्यक्त्वा प्रयोजयेत् ।
अर्कार्किवरुणेन्दूनां स्थानं दिगिति कीर्तितम् ॥ ४७ ॥
अग्निराक्षसवाय्वीशस्थानं विदिगिति स्मृतम् ।
गृहक्ष(त)श्च पुष्पाख्यो भल्लाटश्च महेन्द्रकः ॥ ४८ ॥

एतेषामंशकद्वारं तत्र सन्धिं न सन्धयेत् ।
शल्यं च दन्तं त्यक्त्वैव पूर्वोक्तानां च सम्मतम् ॥ ४९ ॥
मध्यार्धमध्यमध्यं च त्यक्त्वा युञ्जीत बुद्धिमान् ।
द्रव्यमध्यस्थसूत्रस्य वामेऽवामे तु दन्तकम् ॥ ५० ॥
द्रव्यविस्तारमध्यस्था शिखा शीघ्रविनाशिनी ।
अन्योन्यसन्धिविद्धं च शिखा कीलस्य वेधनम् ॥ ५१ ॥
धर्मार्थकामसौख्यानां विपत्तिं नित्यमादिशेत् ।
वामदक्षिणयोगेन प्रतिसन्धिं परित्यजेत् ॥ ५२ ॥
तारतीव्रान्तरस्थं यत् कल्प्यशल्यमिति स्मृतम् ।
पूर्ववद् विधिना सन्ध्यायाममध्ये तु योजयेत् ॥ ५३ ॥
अज्ञानात् त्वरयानुक्तस्थाने वा योजयेद् यदि ।
सर्वेषामपि वर्णानां सर्वसम्पत्क्षयो भवेत् ॥ ५४ ॥
पुराणैर्न नवद्रव्यैर्न पुराणैर्नवैरपि ।
नवैर्नवानां द्रव्याणां योगो जीर्णैश्च जीर्णिनाम् ॥ ५५ ॥
युक्त्यैव द्रव्यसन्धानं सम्पदामास्पदं सदा ।
विपरीते विनाशाय भवेदेवेति निश्चयः ॥ ५६ ॥
ऊर्ध्वद्रव्याणि सर्वाणि वाजनादीनि यान्यपि ।
सशिखान्यशिखान्येतान्युक्त्या योज्यानि पूर्ववत् ॥
पादोपरि भवेत् सन्धिरन्तरे नैव कारयेत् ।
ब्रह्मस्थलेऽर्ध्वगद्रव्यसन्धानं विपदां पदम् ॥ ५८ ॥
ब्रह्मस्थानस्थितः स्तम्भः स्वामिनश्च विनाशनम् ।
तुलादीन्युपरिद्रव्याण्यत्र दोषो न विद्यते ॥ ५९ ॥

पुंस्त्रीनपुंसकमहीरुहसन्धिकार्ये
पुंसा च पुंविहितमेव तथैव पुंस्त्री।
नैवोभयेन च नपुंसकसङ्गमः स्या-
ज्जात्यैकया शुभद उक्तविधिक्रमं वा ॥ ६० ॥

एवं युक्त्या द्रव्यसन्धानयोगं
प्रोक्तं नृणां तैतिलानां निवासे।
युक्त्या युक्तं सम्पदामास्पदं तद्
युक्त्यायुक्तं सर्वसम्पत्क्षयं स्यात् ॥ ६१ ॥

छिद्रं स्वल्पतरं विधेयमधुना दीर्घान्वितच्छेदनं
स्थूलं काष्ठशिलेभदन्तमुदितं निम्नं हि पक्वेष्टकम्।
पक्वं निर्गमनं सुधाभिरनिशं कुर्यात् तनुत्वं यथा-
पूर्वं मानसमुन्नयेत् तदपरं शिल्प्युत्तमः शातधीः॥

इति मयमते वस्तुशास्त्रे सन्धिकर्मविधानो नाम

सप्तदशोऽध्यायः।

अथाष्टादशोऽध्यायः।

गलभूषणमेतेषां शिरश्छन्दमथाधुना।
लुपाभानं च वक्ष्येऽहं स्थूपिकालक्षणं क्रमात् ॥ १ ॥
वेदिकाद्विगुणोत्सेधं कन्धरं शिखरोदयम्।
तद्द्वित्रिगुणतुङ्गं वा वेदिकोच्चं तु वा गलम् ॥ २ ॥
गर्भभित्तित्रिभागैकमङ्घ्रेर्वेद्यङ्घ्रिवेशनम्।
ग्रीवावेशं ततस्तावदेवं देवे च मानवे ॥ ३ ॥

पञ्चांशे भित्तिविष्कम्भे भागो वेद्यङ्घ्रिवेशनम् ।
ग्रीवावेशं ततस्तावच्चतुरंशे तथैव च ॥ ४ ॥
एवं त्रिविधनील्या तु ग्रीवा सा(स्या?ध्या) प्रयत्नतः ।
उत्तरं वाजिनं चैव मुष्टिबन्धं मृणालिका ॥ ५ ॥
दण्डिकावलयं चैव गलभूषणमिष्यते ।
मुष्टिबन्धोपरि क्षिप्तव्यालनाटकमूर्ध्वतः ॥ ६ ॥
दण्डिका च विधातव्या तदूर्ध्वे शिखरक्रिया ।
शिखरोत्सेधमात्तोच्चा भागमानवशेन वा ॥ ७ ॥
दण्डिकावधिविस्तारं पञ्चांशं द्व्यंशमानकम् ।
सप्तनन्दशिवांशे तु त्रयोदशतिथौ तथा ॥ ८ ॥
सप्तदशांशके बन्धवेदभूतषडंशकम् ।
सप्ताष्टांशं तु तारार्धमित्यष्टौ शिखरोदयाः ॥ ९ ॥
पाञ्चालं चापि वैदेहं मागधं चापि कौरवम् ।
कौसलं शौरसेनं च गान्धारावन्तिकं तथा ॥ १० ॥
यथाक्रमेण नामानि ज्ञातव्यानि विचक्षणैः ।
जघनाद् बहिरेवैते एकाः सर्वे समाहिताः ॥ ११ ॥
सर्वाणि तैतलानां स्युरर्धादधस्तु मानुषम् ।
तद्दशायासप्तदशभागादेकांशवर्धनात् ॥ १२ ॥
आवन्तिकाप्र(श्रय?भृ)त्यूर्ध्वमष्टावि(ष्टय?ष्ट)लुपोदयाः ।
व्यामिश्रं च कलिङ्गं च तथा कौशिकमेव च ॥ १३ ॥
वराटं द्राविडं चैव बर्बरं कोल्लकं पुनः ।
तथा शौण्डिकमित्येते व्यामिश्रादिलुपोदयाः ॥ १४ ॥

देवानां प्रथितान्येत्र पाषण्ड्याश्रमिणामपि ।
चतुरश्रं च वृत्तं च षडश्राष्टाश्रमेव च ॥ १५ ॥
द्वादशाश्रं द्विरष्टाश्रं पद्मकुड्मलसन्निभम् ।
तथामलकपकाभं दीर्घवृत्तं च गोलकम् ॥ १६ ॥
अष्टा(र्गेष्टघ? द्यष्टाष्टधा)राणि हर्म्यादीनां शिरांसि हि ।
षडाद्याषष्टिकर्णं च सम्मतं शिखराकृतिः ॥ १७ ॥
तदुच्छ्रयचतुष्पञ्चभागं स्यात् पद्मतुङ्गकम् ।
तत्समोच्चत्रिभागा वा तदूर्ध्वे स्थूपिकायतिः ॥ १८ ॥
अल्पीयसी शिरोर्धा वा भागोच्चा वा त्रिभागिके ।
सङ्क्षेपात् स्थूपिकाभूषा ह्युपरिष्टात् प्रकाश्यते ॥ १९ ॥
पञ्चाद्येकादशान्ताश्च चतुराद्या दशान्तकाः ।
चतुर्विधा लुपासङ्ख्या देवेऽदेवे निकेतने ॥ २० ॥
पूर्वोक्तं द्व्यन्तरोच्चं तु व्यामिश्रं नाम पुष्करम् ।
ऊर्ध्वस्थान्यप्यधस्थानि पुष्कराण्यर्धमानतः ॥ २१ ॥
अर्धमारभ्य संवर्त्य पश्चादुक्तोच्चसीमयुक् ।
आरोह्याण्यवरोह्याणि गुह्यमेतदुदाहृतम् ॥ २२ ॥
दण्डिकावधि कारार्धं चतुरश्रीकृतं समम् ।
कोष्णीषासनसीमाख्यसूत्रयुक्तं खलं नयेत् ॥ २३ ॥
दण्डिकोत्तरबाहुल्यं सूत्रयेदासनादधः ।
आसने चतुरंशाद्यादशांशं बिन्दु विन्यसेत् ॥ २४ ॥
कोष्णीषसन्धेस्तद्बिन्दुसीमच्छायोच्चमावहेत् ।
छायोच्चायतमानानि कमूलादासने न्यसेत् ॥ २५ ॥

तान्येव दण्डिकादीनां पर्यन्तानि भवन्ति हि ।
कोष्णीषसङ्घात् पर्यन्तविन्द्वन्तं तल्लुपायतम् ॥ २६ ॥
तत्तत्पर्यन्तविस्तारं कसूत्रे विन्यसेत् पुनः ।
स्वस्वकर्णगतच्छायामानैः सर्वान् विमानयेत् ॥ २७ ॥
तत्तत्पर्यन्तसूत्राणि मल्लपर्यन्तसूत्रवत् ।
एवं मध्यलुपासीम्नो वर्धन्ते वर्णसंख्यया ॥ २८ ॥
एवमाव(र्त्त ? र्य) तत्पश्चादारोह्यैवावरोह्य च ।
तत्तत्पुष्करसङ्घातं तत्तन्मल्लायतं विदुः ॥ २९ ॥
समध्यं च विमध्यं च लुपाकलनमेव हि ।
मध्यं च मध्यकर्णं चाप्याकर्णमनुकोटिकम् ॥ ३० ॥
कोटिरित्येवमुच्यन्ते पञ्च वर्णलुपाः क्रमात् ।
युग्मांशेऽयुग्मसंख्याभिरयुग्मे युग्मसंख्यया ॥ ३१ ॥
कान्तान्तरासिकोष्णीषसीमान्तं स्वांशसंख्यया ।
चूलिका भ्रमणीया हि समयासमया च सा ॥ ३२ ॥
तत्तत्सूत्रात् स्थितादन्तस्तनसूत्राणि सूत्रयेत् ।
शयितसूत्रादधः पृष्ठवंशसूत्राणि सूत्रयेत् ॥ ३३ ॥
शयितस्थितसूत्रान्तः कीलं तत्कूटमूर्धनि ।
निधायार्धेन्दुवत् सर्वाश्चूलिका विलिखेत् समाः ॥ ३४ ॥
लुपाविलुपमध्यान्तर्गता सा चूलिकाकृतिः ।
एवं स्याद् ऋजुकार्यं हि तथा कुक्कुटपक्षवत् ॥ ३५ ॥
बालकूटस्य विस्तारस्थितसूत्रस्तनान्तरे ।
कूटमध्यमसूत्रं तु वलयच्छिद्रमध्यगम् ॥ ३६ ॥

पर्यन्तसूत्रकादन्तर्दण्डिकोत्तरजा ततिः ।
तदन्तर्जानुकव्यासस्तदन्तश्चूलिकास्थितिः ॥ ३७ ॥
लुपातारं तु दण्डं वा सपादं सार्धमेव वा ।
विस्तार(त्रि?त्रि)चतुष्पञ्चभागैकांशं तु तद्घनम् ॥ ३८ ॥
जानुव्यासं चोत्तरार्धचूलिकार्धार्धमेव वा ।
दण्डिकाविपुलं तावत् त्रिपादार्धं तु तद्घनम् ॥ ३९ ॥
वलयं जानुनीव्रं च दण्डिकाविपुलार्धतः ।
मल्लमध्यादिचामीली(?) जानुकालम्बनं च यत् ॥ ४० ॥
पर्यन्तजानुकान्तं च चूलिकाभाग एव सः ।
शयनात् तावदेव स्यात् त्रिप्रालम्बनेसूत्रकम् ॥ ४१ ॥
कुठारिकाल्ललाटं च जघनं च समं मतम् ।
पादविष्कम्भकर्णो वा विष्कम्भद्विगुणोऽथ वा ॥ ४२ ॥
कूटव्यासो लुपापिण्डी कर्णस्तद्विगुणायतः ।
तदर्धं नालिकालम्बमूर्ध्वे मल्लाग्रसङ्गतिः ॥ ४३ ॥
छिद्रं तत्तीव्रमात्रं स्यान्मलानां तु प्रवेशनम् ।
जानुकं च लुपामध्यं मध्यपृष्ठस्थवंशकम् ॥ ४४ ॥
समं स्यात् तीव्रताराभ्यां चूल्यंशो वा लुपान्तरम् ।
लुपातीव्राष्टगुणं वा वलयो वंशविस्तरः ॥ ४५ ॥
तदर्धं वेशनं तीव्रं फलकैर्लोहलोष्टकैः ।
मृण्मयैस्तु यथास्थैर्यमिच्छया छादयेत् पुनः ॥ ४६ ॥
लुपोर्ध्वे फलकान् न्यस्य वाष्टबन्धमधोर्ध्वतः ।
लुपामध्यादधश्छिद्रं वलयस्य विधीयते ॥ ४७ ॥

क्रियायां परलेखास्तु कल्प्याः षोडशसंख्यया ।
कुक्षिन्यासाष्टभागैकं मात्रामानमिति स्मृतम् ॥ ४८ ॥
तेन भागेन सप्तार्धाद् द्व्यर्धभागविवर्धनात् ।
आपञ्चदशसंख्यान्ताः परलेखास्तु षोडश ॥ ४९ ॥
लुपाधऊर्ध्वबिन्द्वादि मध्ये विन्यस्य तद्विधिम् ।
तद्बिन्द्वादिविलोक्या हि परलेखा विचक्षणैः ॥ ५० ॥
प्रासादानामिमाः प्रोक्ता गृहादीनां च षोडश ।
लुपायामाद्याद्द्विगुणं तन्मानं तेन बुद्धिमान् ॥ ५१ ॥
कोष्णीषासनसूत्राभ्यामधः शफरमालिखेत् ।
तस्मादुपरि मल्लस्य लेखयेत् तद्विचक्षणः ॥ ५२ ॥
मल्लायतादधोभागे त्रिःपञ्चांशीकृतेः क्रमात् ।
तत्तदंशावसानं तु मत्स्यं तत्तत् समुल्लिखेत् ॥ ५३ ॥
सर्वासां परलेखानां क्रमोऽयं परिकीर्तितः ।
पाञ्चालादिलुपानां च प्रत्येकं प्रोच्यते बुधैः ॥ ५४ ॥
ऋजाकार्ययुता मल्लाद् या लेखासनकाग्रयोः ।
मध्ये परं हि सा प्राज्ञैः परलेखा प्रकीर्तिता ॥ ५५ ॥
लुपाबाहुल्यमानेन घटिकां चतुरश्रिकाम् ।
वितस्त्यायामिनीमृज्वीं कृतमध्यमसूत्रिताम् ॥ ५६ ॥
चूलिकान्तर्वर्णलुपातिर्यक्सूत्रस्त्वमध्यमात् ।
विन्यस्य घटिकां पश्चाच्छिन्नां शमनसूत्रवत् ॥ ५७ ॥
प्रतिवर्णं तु घटिकां तद्वर्णे तां निधापयेत् ।
क्षिप्तसूत्रस्य शेषांशच्छिन्ने वर्णलुपोदरे ॥ ५८ ॥

दण्डिकोत्तरवलयस्थितसूत्रसमं लिखेत् ।
उदरायाममध्ये तु लिखिते ककरं भवेत् ॥ ५९॥
घटिकाललाटमध्यं ककरं च समं यथा ।
तथा निधाय घटिकां लुपोदरवशायताम् ॥ ६० ॥
तल्ललाटकृतिच्छेद्या वलयाद्या लुपोदरे ।
इष्टपार्श्वे क्षिपेच्छायां छिद्रैश्च वलयस्य तु ॥ ६१ ॥
तत्तद्धटिकया तत्तन्मध्यसंहितमध्यया ।
या ललाटगतच्छाया तासां तासां तु सा भवेत् ॥
दण्डिकावलयच्छिद्रस्तनजानूत्तरादिषु ।
शिरोमध्येऽर्धमध्ये च न्यसेन्मुण्डतुलोपरि ॥ ६३ ॥
विटभागशिखोपेततुलापादः सवंशाह(म्?त्) ।
सवर्णा मत्स्यबन्धाश्च खर्जूरपत्रसन्निभाः ॥ ६४ ॥
स्वलयक्षो(?) विधातव्या लुपाः शिखरकान्तरे ।
लुपोर्ध्वे फलकं वोर्ध्वे तस्याः कम्पं निधाय च ॥
इष्टकासुधया वापि प्रच्छादनमलङ्क्रियात् ।
स्थूपिकाकलिदीर्घं चैवोक्तोत्सेधसमं मतम् ॥ ६६ ॥
अर्धार्धमग्रविस्तारं दण्डार्धं मूलविस्तृतम् ।
आशङ्कुमूलमुण्डान्तं तस्य मूलस्य वेधनम् ॥ ६७ ॥
वंशाधस्तान्निधातव्या मण्डनागाग्रपट्टिका ।
बालकूटस्तनं शङ्कुमूलमुण्डकमेव च ॥ ६८ ।
अन्तःस्थवलयं वर्णपट्टिका च सनालिका ।
मत्स्यबन्धनखर्जूरपत्रमल्लनिबन्धनात् ॥ ६९ ॥

वलक्षस्वस्तिधाराभिः शिखरान्तरलङ्क्रियात् ।
विस्तारो मुखपद्माश्च दण्ड्यो वाध्यर्ध एव वा ॥ ७० ॥
नीप्रं षडष्टभागं वा कर्णिकोच्चं तु तत्ततिः ।
शक्तिध्वजस्य मूलस्य विपुलं दण्डमानतः ॥ ७१ ॥
तत्कण्ठं तावदेवोच्चं सपादं सार्धमेव वा ।
ग्रीवान्तगग्रपत्रं तु स्तम्भव्यासार्धतुङ्गवत् ॥ ७२ ॥
द्विदण्डादित्रिदण्डान्तमन्तरं गग्रपत्रयोः ।
वाताहतचलच्चारुलतावत् कर्णिकाक्रिया ॥ ७३ ॥
अर्धकर्णमधस्तस्माच्छिरोऽर्धार्धेन चानतिः ।
ग्रीवोपरि कपोलान्तं त्रिदण्डं सार्धमेव वा ॥ ७४ ॥
तावच्छक्तिध्वजान्तं स्यात् सपत्रं वा सशूलकम् ।
नेत्रसंश्लिष्टमल्लं तु चूलिकास्तनमण्डलम् ॥ ७५ ॥
शयितास्थितपट्टाभ्यां मृणाल्यादिविभूषितम् ।
अर्धकर्णोर्ध्वपट्टोर्ध्वप्रत्यूर्ध्वे मुष्टिबन्धनम् ॥ ७६ ॥
यथाशोभननिष्क्रान्तं त्रिमुखं स्यात् तदूर्ध्वनः ।
शूलाभं मतलाभं वा सव्यालं वा सनाटकम् ॥ ७७ ॥
तदूर्ध्वे कूटकोष्ठादिमण्डितं स्याद् विमानवत् ।
सपट्टक्षुद्रकम्पाङ्गं मध्यतोरणमेव वा ॥ ७८ ॥
तोरणाभ्यन्तरे लक्ष्मीः साभिषेकाम्बुजासिका ।
एवंविधैरथान्यैश्च मण्डनीया ललाटिका ॥ ७९ ॥
ललाटवंशसंविद्धमध्यशूलदृढीकृता ।
स्तम्भविस्तारविस्तीर्णा विधातव्या कुठारिका ॥ ८० ॥

तत्कर्णं पत्रमकरं मण्डितं चावलम्बितम् ।
अर्धकर्णेन चार्धं वा यथायुक्ति यथारुचि ॥ ८१ ॥
अन्तर्गतलुपातिर्यगग्रबन्धनविष्टकम् ।
तदूर्ध्वे तेन निर्विद्धं स्थूपिकायूपमिष्यते ॥ ८२ ॥
पूर्वोक्तं स्थूपिकामानमलङ्कारमथोच्यते ।
सार्धमर्धं तदूर्ध्वेऽर्धमर्धमंशं शरांशकम् ॥ ८३ ॥
अंशमर्धं च भागं स्यादर्धमंशं तथार्धकम् ।
भागमर्धं तथार्धांशमंशमर्धं तथार्धकम् ॥ ८४ ॥
चतुरर्धं क्रमेणैवोत्तुङ्गे द्वाविंशदंशके ।
पद्मं च क्षेपणं वेत्रं क्षेपणं पङ्कजं घटम् ॥ ८५ ॥
पङ्कजं क्षेपणं धृक् च क्षेपणं वेत्रमूर्ध्वतः ।
क्षेपणं धृक् च कम्पं तु पद्मं फलकमम्बुजम् ॥ ८६ ॥
वेत्रं च मुकुलं चैव क्रमेणोक्तवशान्नयेत् ।
सप्तद्ध्यंशत्रिकद्ध्यंशैः पञ्चनन्देन्द्रियत्रिकैः ॥ ८७ ॥
द्वित्रिवेदत्रिकद्ध्यंशैर्गुणपञ्चर्तुपञ्चभिः ।
द्वित्रिभागैः क्रमाद् व्यासं मूलपद्मादिषु न्यसेत् ॥ ८८ ॥
मुकुलाग्रमंशमर्धार्धं यथाशोभवशान्नयेत् ।
चतुरष्टद्विरष्टाश्रं साधारं वर्तुलं तु वा ॥ ८९ ॥
तदाकृतिः शिरश्छन्दमलङ्कारवशात् तु वा ।
तदाकृतिः सुरोर्वीशविप्राणां च विशां मतम् ॥ ९० ॥
सुरद्विजनृपाणां तु वैश्यानां नैव शूद्रके ।
तत्सम्बन्धं समापाद्य ध्वजदण्डं तदूर्ध्वगम् ॥ ९१ ॥

एवंलक्षणसम्पन्नं विमानं सम्पदां पदम्।
करालमुद्गीगुल्माषकल्कचिक्कणसाह्वयाः॥ ९२ ॥
चूर्णोपयुक्ताः पञ्चैते सर्वकर्मसनातनाः।
अभयाक्षबीजमात्रशर्करास्वार्धचूर्णकाः॥ ९३ ॥
मुद्गबीजसमा क्षुद्रशर्करा मुद्गमिष्यते।
सार्धत्रिपादद्विगुणकिञ्जल्कसिकतान्वितम्॥ ९४॥
चूर्णस्य शर्कराशुक्त्योर्यद् गुल्मासं तदुच्यते।
करालं चापि मुद्गीं च तेन मानेन योजयेत्॥ ९५॥
पूर्वोक्तमात्रसिकताचणकश्चूर्णमानतः।
क्रियार्थं पेषितं कल्कं चिक्कणं मस्तु केवलम्॥ ९६॥
निश्छिद्रमिष्टमानेन गोत्रमिष्टकया दृढम्।
पूर्वोक्तानां च पञ्चानां विधातव्यं पृथक् पृथक्॥ ९७॥
तत्र तत्र तदुक्तेन द्रव्येण परिकल्पयेत्।
केवलेनाम्भसा पूर्वं पूर्वास्त्रिस्त्रिः प्रकुट्टयेत्॥ ९८॥
क्षीरद्रुमकदम्बाम्राभयाक्षत्वग्जलैः पुनः।
त्रिफलेदैस्ततस्तद्वन्माषयूषैस्ततस्तथा॥ ९९॥
संयम्य शर्कराशुक्तिं चूर्णं तत् खातवारिणि।
खुरसङ्कुट्टनं कृत्वा स्रावयित्वाथ वाससा॥ १००॥
कल्कं च चिक्कणं तेन कल्कनीयं विचक्षणैः।
दधिदुग्धमाषयूषगुडाज्यकदलीफलैः॥ १०१ ॥
जलैश्च नालिकेरस्य चूतपक्वरसैः सह।
कल्पितं शिल्पिभिर्यत् तद् बन्धोदकमिति स्मृतम्॥ १०२॥

शुद्धिं शुद्धोदकेनादौ कृत्वा बन्धाम्भसा (नतु?ततः)
आलिप्य सुधया कार्या नानारूपान्वितक्रिया ॥ १०३ ॥
दग्धैश्च मृण्मयैश्चापि लोहलोष्टैर्यथोचितम् ।
गोपानस्योपरिष्टात् तुच्छादनीयं विचक्षणैः ॥ १०४ ॥
करालमुद्गिगुल्माषघनमेकैकमङ्गुलम् ।
कल्कमानं तदर्धेन तदर्धार्धं तु चिक्कणम् ॥ १०५ ॥
जलस्थलप्रयुक्ते तु यथेष्टं घनमिष्यते ।
षण्मासमुत्तमं प्रोक्तं चतुर्मासं तु मध्यमम् ॥ १०६ ॥
अधमं तु द्विमासं स्यादेषामुषितमिष्यते ।
ततो बन्धोदकैरेतान् संक्लेद्य क्रमशः कृतिः ॥ १०७ ॥
लुपोपरीष्टकास्तारे चैवं चूर्णक्रियां पुनः ।
आच्छादनीयं यत्नेन तद्घनं छादनं विदुः ॥ १०८ ॥
देवानां च द्विजानां चावासे योग्यं सनातनम् ।
बहिरन्तश्च सर्वेषां छत्रं युञ्जीत बुद्धिमान् ॥ १०९ ॥
सुमङ्गलकथोपेतं श्रद्धानृत्तक्रियान्वितम् ।
विप्रादीनां च वर्णानां निवासं सम्पदां पदम् ॥ ११० ॥
सङ्ग्रामं मरणं दुःखं देवासुरकथान्वितम् ।
नग्नं तपस्विलीलां चामयाव्यादि न योजयेत् ॥ १११ ॥
अन्येषामन्यथा वासे साधनीयं यथेष्टतः ।
पञ्चांशं माषयूषं स्यान्नवाष्टांशं गुडं दधि ॥ ११२ ॥
आज्यं द्व्यंशं तु सप्तांशं क्षीरं चर्म षडंशकम् ।
त्रैफलं दशभागं स्यान्नालिकेरं युगांशकम् ॥ ११३ ॥

क्षौद्रमेकांशकं त्र्यंशं कदलीफलमिष्यते ।
लब्धे चूर्णे शतांशे तु युञ्जीतव्यं सुबन्धनम् ॥ ११४ ॥
सर्वेषामधिकं शस्तं गुडं च दधि दुग्धकम् ।
चूर्णद्व्यंशं करालं मधुघृतकदलीनालिकेरं च माषं
चक्रे तोयं च(ापि ?)दुग्धं दधिगुडसहितं त्रैफलं तत्क्रमेण ।
लब्धे चूर्णे शतांशेंऽशकमिदमधुना चानुवृद्धिं प्रकुर्या-
देतद् बन्धं दृषत्सादृशमिति कथितं तन्त्रविद्भिर्मुनीन्द्रैः ॥
देवानां द्विजभूमीशवैश्यानां भवनेऽधुना ॥ ११६ ॥
मूर्ध्नेष्टका विधातव्याश्चतस्रो लक्षणान्विताः ।
सुस्निग्धाः समदग्धाश्च सुस्वनास्ताः सुशोभनाः ॥ ११७ ॥
स्त्रीलिङ्गाश्चापि पुँल्लिङ्गा भिन्नच्छिद्रादिवर्जिताः ।
विस्तारायामतीव्रैस्तु प्रथमेष्टकया समाः ॥ ११८ ॥
शिलामये शिला प्रोक्ता सर्वदोषविवर्जिता ।
जन्माद्याशिखरान्तं च यैर्द्रव्यैश्च विनिर्मितम् ॥ ११९ ॥
तैरेवादौ तथान्ते च न्यस्तव्याश्चेष्टकाः शुभाः ।
मिश्रद्रव्यैश्च सङ्कीर्णे यैर्द्रव्यैरुपरि स्थितम् ॥ १२० ॥
तैरेव मूर्ध्नि विन्यासं रहस्यमिदमीरितम् ।
लोहजं दारुजं वापि स्थूपिकाकीलमिष्यते ॥ १२१ ॥
ऊर्ध्वभूम्यङ्घ्रिणायामविस्तारं पादतः समम् ।
अग्रमङ्गुलविस्तारमानुपूर्व्या कृशं तथा ॥ १२२ ॥
चतुरश्रसमं कुर्यात् त्रिभागैकमधस्तथा ।
वृत्तमूर्ध्वमधः कुर्याच्छिखिपादं न्यसेदधः ॥ १२३ ॥

विस्तारत्रिगुणायामं व्यासोच्चं पादतः समम् ।
अभ्रमं तु यथा भूमौ पञ्चमूर्तिसमन्वितम् ॥ १२४ ॥
अथवा तच्छिखायामाद्द्विगुणं कीलदैर्घिकम् ।
स्तम्भव्यासार्धविस्तारत्रिचतुर्भागमेव वा ॥ १२५ ॥
अग्रमर्धाङ्गुलव्यासं शिखिपादं यथाबलम् ।
शिखराकृतिवत् कीलं लिङ्गच्छन्दमथापि वा ॥ १२६ ॥
एवं त्रिधा समुद्दिष्टं स्थूपिकाकीलमार्यकैः ।
सद्मनश्चोत्तरे पार्श्वे मण्डपे तु सुसंस्कृते ॥ १२७ ॥
चतुष्प्रदीपसयुंक्ते वस्त्रैश्च परिवेष्टिते ।
सर्वमङ्गलसंयुक्ते शुद्धशाल्यास्तरे शुभे ॥ १२८ ॥
स्थण्डिले चण्डितं कृत्वा मण्डूकं वाथ तत्परम् ।
विन्यस्य देवान् ब्रह्मादीन् श्वेततण्डुलधारया ॥ १२९ ॥
आराध्य गन्धपुष्पाद्यैर्भुवनाधिपतिं जपेत् ।
देवताभ्यो बलिं दत्त्वा तत्तन्नाम्ना यथाविधि ॥ १३० ॥
स्थपतिः कलशान् न्यस्य पञ्च पञ्च सलक्षणान् ।
सुगन्धोदकसम्पूर्णान् पञ्चरत्नसमायुतान् ॥ १३१ ॥
ससूत्रान् वस्त्रकूर्चाला(न्) सापिधानान् सहेमकान् ।
उपपीठांशदेवानां स्वस्वनाम्नाभिधाय च ॥ १३२ ॥
प्रणवादिनमोन्तेन गन्धाद्यैरर्चयेत् क्रमात् ।
प्रक्षाल्य पञ्चगव्यैस्तु नवरत्नकुशोदकैः ॥ १३३ ॥
इष्टकाश्च यथाकीलं सूत्रैरावेष्टयेत् क्रमात् ।
कुम्भस्य दक्षिणे शुद्धशालीस्थण्डिलमण्डले ॥ १३४ ॥

आराध्य गन्धपुष्पैश्च बलिं दत्त्वा यथाविधि ।
इष्टकाश्चैव कीलांश्च वेष्टयेदम्बरैः शुभैः ॥ १३५ ॥
श्वेतवस्त्रास्तरस्योर्ध्वे न्यसेद् दर्भास्तरे शुचिः ।
स्थपतिर्वरवेषाढ्यः शुक्लमाल्यानुलेपनः ॥ १३६ ॥
सितवस्त्रपरिच्छन्नोत्तरीयो हैममुद्रिकः ।
पीत्वा शुद्धं पयो रात्रावुपोष्याधिवसेत् सुधीः ॥ १३७ ॥
कलशस्योत्तरे पार्श्वे सितवस्त्रपरिस्तरे ।
ततः प्रभाते विमले नक्षत्रकरणान्विते ॥ १३८ ॥
सुमुहूर्ते सुलग्ने च स्थपतिः स्थापकेन तु ।
पुष्पकुण्डलहारादिकटकैरङ्गुलीयकैः ॥ १३९ ॥
पञ्चाङ्गभूषणैर्हेमनिर्मितैस्तु विभूषितः ।
हेमयज्ञोपवीतस्तु नववस्त्रपरिच्छदः ॥ १४० ॥
श्वेतानुलेपनश्चैव सितपुष्पशिराः शुचिः ।
ध्यात्वा धरातलं सर्वं दिग्द्विपेन्द्रसमायुतम् ॥ १४१ ॥
ससागरं सशैलेन्द्रमनन्तस्योपरि स्थितम् ।
सृष्टिस्थितिलयाधारं भुवनाधिपतिं जपेत् ॥१४२॥
स्नापयित्वेष्टकाकीलं पूर्वोक्तैः कलशोदकैः ।
आराध्य गन्धपुष्पैश्च धूपदीपसमन्वितैः ॥ १४३ ॥
बलिं दत्त्वा यथान्यायं जयशब्दादिमङ्गलैः ।
विप्रस्वाध्यायघोषैश्च शङ्खभेर्यादिनिःस्वनैः ॥ १४४ ॥
स्थापयेदिष्टकाः सम्यक् पूर्वदक्षिणतः क्रमात् ।
शिखरार्धे विमानस्य गर्भपत्रान्तरेऽपि वा ॥ १४५ ॥

शिखरत्रिचतुर्भागात्वसाने वाम्बुजादधः ।
तदाद्यात् स्थूपिकायामात् कीलदैर्घ्यं प्रगृह्यताम् ॥ १४६ ॥
पूर्वमेवेष्टकास्थानं निश्छिद्रं तु दृढीकृतम् ।
तन्मध्ये नवरत्नानि विन्यसेच्च यथाक्रमम् ॥ १४७ ॥
ऐन्द्रे मरतकं विद्याद् वैडूर्यं वह्निगोचरे ।
इन्द्रनीलं तु याम्यायां मौक्तिकं पितरि स्मृतम् ॥ १४८ ॥
वारुणे स्फाटिकं विद्यान्महानीलं समीरणे ।
वज्रं तु सौम्यदेशे स्यादैशान्यां तु प्रवालकम् ॥ १४९ ॥
माणिक्यं मध्यमे भागे हाटकं च विनिक्षिपेत् ।
रसोपरसबीजैश्च धान्यान्यप्यौषधानि च ॥ १५० ॥
तदूर्ध्वे स्थूपिकाकीलं स्थापयेदचलं समम् ।
तस्मात् प्रकृतिभूम्यन्तमुदग्दिशि महाध्वजम् ॥ १५१ ॥
ग्रथितं क्षौमवस्त्रैश्च कार्पासैर्वा मनोहरैः ।
लम्बयेत् तदुदक्प्राच्यौ प्रागुदग्विदिशं ततः ॥ १५२ ॥
संस्पृशेद् यदि सर्वेषां प्राणिनां सम्पदृद्धये ।
भवनं स्थूपिकीलं च पट्टैरावेष्ट्य शुभ्रकैः ॥ १५३ ॥
चतुर्दिक्षु चतुर्गाश्च सवत्साः सन्निवेशयेत् ।
द्वारालङ्करणं कुर्यात् सुविचित्राम्बरैर्नवैः ॥ १५४ ॥
यजमानो विशुद्धात्मा प्रणम्य शिरसा गुरुम् ।
विमानस्थूपिकास्तम्भद्वारालङ्करणानि च ॥ १५५ ॥
वस्त्राणि धनधान्यैश्च पशूनपि सवत्सकान् ।
मुदा स्थपतये दत्त्वा शेषान् भक्त्या तु तर्पयेत् ॥ १५६ ॥

एवं मुनिवरैः प्रोक्तं प्रासादानां तु मूर्धनि ।
हर्म्याणां गर्भसंयुक्तौ नेत्रभित्तौ तलान्तरे ॥ १५७ ॥

मण्डपे मध्यदेशे तु सभादीनामधोऽम्बुजा(म्?त्) ।
प्रासादवद् विधातव्यं गोपुराणां तु मूर्धनि ॥ १५८ ॥

एवं तु विधिना सम्यक् सम्पन्नं सम्पदां पदम् ।
येन यत् कर्म चारब्धमादौ तदवसानके ॥ १५९ ॥

तेनैव निष्ठितं कर्म श्रीसौभाग्यायु(षि?रे)धनम् ।
तस्याभावे तु तत्पुत्रः शिष्यो वा तं गुरुं पटे ॥ १६०
लिखित्वा तन्नियोगेन सर्वकर्म समाचरेत् ।
अज्ञानात् त्वरितेनापि यद् वस्त्वन्येन भावितम् ॥ १६१ ॥

करोति स्वामिनं शीघ्रमन्यथेति ह निश्चयः ॥

प्रथमं कृतवान् विधिं यथावत्
　　कृतवानेव करोति निष्ठितान्तम् ।
अथ वा विधिरन्यथा भवेच्चे-
　　दशुभं स्वामिनमन्यथा करोति ॥ १६२ ॥

एवं ग्रीवालङ्कृतं पुष्कराभं
　　मानं मल्लानां शिखाभूषणं च ।
युक्त्या सर्वेषां करालादिबन्धं
　　प्रोक्तं सम्यक् चेष्टकाबन्धमूर्ध्वे ॥ १६३ ॥

खदिरसरलसालस्तम्बकाशोकवृक्षाः
　　पनसतिमिसनिम्बाः सप्तपर्णाश्च सर्वे ।

परुषवकुलवह्निक्षीरिणीत्येवमाद्याः
सुदृढविमलसाराः स्थूपिकीलाः प्रसिद्धाः ॥ १६४ ॥

अथ हर्म्ये परि(नि)ष्ठिते तदा
यजमानोऽपि गुरुश्च वर्धकिः ।
उदगायनशोभन(नक्षत्र?र्क्ष)पक्षे
जलसम्प्रोक्षणकर्म चारभेत् ॥ १६५ ॥

नवसप्तत्रिकपञ्चरात्रिके
विधिना चाङ्कुरार्पणं कुरु ।
भवनस्योत्तरपूर्वदेशतः
स्वधिवासार्हमण्डपं चरेत् ॥ १६६ ॥

नवसप्तेषुकरैर्युगाश्रकं
वसुपादं नववस्त्रशोभितम् ।
सवितानं सुपटैर्निवेष्टितं
सुमनोज्ञं सितपुष्पशोभितम् ॥ १६७ ॥

तस्य मध्ये तु शालीभिः स्थण्डिलं दण्डमानतः ॥ १६८ ॥

कृत्वाष्टाष्टपदं न्यस्य ब्रह्मादीन् वस्तुनायकान् ।
श्वेततण्डुलधाराभिर्विन्यस्याराध्य पुष्पकैः ॥ १६९ ॥

गन्धैर्धूपैश्च दीपैश्च बलिं दत्त्वा विधानतः ।
तदूर्ध्वं पञ्चपञ्चैव कलशान् वस्त्रशोभितान् ॥ १७० ॥

मणिहेमसमायुक्तान् ससूत्रान् सापिधानकान् ।
निष्कलङ्कानसुषिरान् हाटकोदकपूरितान् ॥ १७१ ॥

उपपीठपदस्थांस्तान् स्वस्वनाम्नाभिधाय च ।
ओङ्कारादिनमोन्तेन चार्चयित्वा न्यसेत् ततः ॥ १७२ ॥
कलशस्योत्तरे पार्श्वे दर्भा(सन)परिस्तरे ।
चतुष्प्रदीपसंयुक्ते सर्वमङ्गलशोभिते ॥ १७३ ॥
पूतचेता विशुद्धात्मा स्थपतिर्व्रतमास्थितः ।
पीत्वा शुद्धं पयो रात्रावुपोष्याधिवसेत् ततः ॥ १७४ ॥
प्रासादस्याग्रतो यागमण्डपं विधिनाचरेत् ।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥ १७५ ॥
वासोभिर्दर्भमालाभिः स्र(क्सु)मैः समलङ्कृतम् ।
तन्मध्ये वेदिकां कुर्यात् तद्व्यासत्र्यंशमानतः ॥ १७६ ॥
चतुरश्रं चतुर्दिक्षु विदिक्ष्वश्वत्थपत्रवत् ।
सुरेन्द्रेशानयोर्मध्ये कुण्डमष्टाश्रमिष्यते ॥ १७७ ॥
त्रिमेखलासमायुक्तं वैकमेखलयान्वितम् ।
स्थापको मूर्त्तिपैः सार्धं विधिना होममाचरेत् ॥ १७८ ॥
शालिभिः स्थण्डिलं कृत्वा वेदिमध्ये विचक्षणः ।
मूर्त्तिकुम्भं न्यसे(त् स)म्य(ग्) बीजमन्त्रमनुस्मरन् ॥ १७९ ॥
प्रासादस्य चतुर्दिक्षु वृत्तकुण्डविधानतः ।
सन्तर्प्य स्थापको जातवेदसं निवसेत् तदा ॥ १८० ॥
विमानं जन्मतः स्थूपिकान्तं वस्त्रैर्निवेष्टयेत् ।
कुशास्ती(र्णैर्न)वैर्वस्त्रैः स्थूपिकीलमलङ्क्रियात् ॥ १८१ ॥
बल्यन्नं पायसान्नं च मुद्गान्नं च यवान्नकम् ।
कृसरं गुलशुद्धान्नं पीतं कृष्णं तथारुणम् ॥ १८२ ॥

गृ(हीत्वा स)कलस्याग्रे हेमपात्रे निधाय च ।
दधिदुग्धघृतक्षौद्ररत्नपुष्पाक्षताम्बुभिः ॥ १८३ ॥
कदलीफलसंयुक्तं पात्रं चैवान्यशिल्पिभिः ।
धारयित्वाम्बुभी रात्रौ वास्तुदेवब(लिं चरेत्) ॥ १८४ ॥
ततः प्रभाते विमले नक्षत्रकरणान्विते ।
स्थपतिर्वरवेषाढ्यः प्राप्तपञ्चाङ्गभूषणः ॥ १८५ ॥
धृतहाटकयज्ञोपवीतः श्वेतानुलेपनः ।
श्वेतपुष्पशिरःप्राप्तोष्णीषश्चाहतवस्त्रयुक् ॥ १८६ ॥
दिशामूर्ध्वपरांश्चक्षुर्मोक्षणं विधिनाचरेत् ।
(स्था ? स्ना)पयेत् कलशाम्भोभिरर्चयेद् गन्धपुष्पकैः ॥
प्रथमं हेमया तत्र सूच्या नयनमण्डलम् ।
लिखित्वा तीक्ष्णशस्त्रेण मण्डलत्रयमुल्लिखेत् ॥ १८८ ॥
आच्छाद्य नववस्त्रेण ब्राह्मणान् धान्यसञ्चयान् ।
धेनुं सवत्सां कन्यां च दर्शयित्वा यथाक्रमम् ॥ १८९ ॥
विमानं पुनरारुह्य स्थपतिः स्थापकाज्ञया ।
शङ्खकाहलतूर्यादिघोषणैः स्वस्तिवाचनैः ॥ १९० ॥
स्थूप्यग्रादाप्रकृत्यन्तं चतुर्दिशि महाध्वजम् ।
लम्बयेत् क्षौमपट्टैर्वा कार्पासैर्ग्रथितं नरम् ॥ १९१ ॥
चन्दनागरुतोयेन सर्वगन्धोदकेन च ।
कलशोदैः कुशाम्भोभिरुपरिष्टात् समन्ततः ॥ १९२ ॥
प्रोक्षयेत् स्थपतिः प्राज्ञो भुवनाधिपतिं जपेत् ।
तैतला(नां विमाना)नां पाञ्चभौतिकसंश्रितात् ॥ १९३ ॥

स्थूपिकुम्भं सुवर्णेन ताम्रेण रजतेन वा।
उपलेष्टक(या?) सौधैर्वा कृ(त्वा?त्वे)ष्टं कीलवत् (सु?स्मृ)तम्॥
सुसंस्थाप्याचलं यावत् प्रोक्षयेद् गन्धवारिणा।
विमानादवरुह्याथ गर्भगेहं च मण्डपम्॥ १९५॥
प्रोक्षयित्वा मुखे स्थित्वा नत्वा देवं वदेदिदम्॥

धाराधिपातात् सलिलप्रकोपाद्
दंष्ट्रया निपातात् पवनप्रकोपात्।
अग्नेश्च दाहान्मुषिता(प)चाराद्
रक्षत्विदं सद्म शिवं च मेऽस्तु॥ १९६॥
निरुजा मुदिता सधना प्रथिता
यशसा महदद्भुतवीर्ययुता।
सततं निरुपद्रवक(र्म)युता
पृथिवी पृथु जीवतु धर्मविधेः॥ १९७॥
ब्रह्मा विष्णुः शङ्करः सर्वदेवाः
क्षोणी लक्ष्मीर्वाग्वधूः सिंहकेतुः।
ज्येष्ठा विश्वेदेवदेव्यः प्र(जानां)
श्रीसौभाग्यारोग्यभोग्यं कुर्वीरन्॥ १९८॥
उक्त्वैवं स्थपतेः कर्मण्यत्रैव परिनिष्ठिते॥ १९९॥
स्थापको विधिना शुद्धिं कुर्याद् यागादिकर्मभिः।
प्रोक्षयित्वा घटाम्भोभिः पञ्चगव्यैः कुशोदकैः॥ २००॥
अर्चयेद् गन्धपुष्पाद्यैर्नैवेद्यं च प्रदापयेत्।
प्रासादबीजमन्त्रांस्तु न्यसेत् सौधाधिदेवताम्॥ २०१॥

प्रासादाभिमुखे स्थित्वा यजमानः प्रसन्नधीः ।
स्थपतेर्धर्मसर्वस्वं क्लेशेन सह यद् भवेत् ॥ २०२ ॥
तत् सर्वं परिगृह्णीत सुप्रीत्या स्थापकाज्ञया ।
पूजयेत् तु यथाशक्ति स्थापकं स्थपतिं ततः ॥ २०३ ॥
पुत्रभ्रातृकलत्रैश्च यजमानो मुदा धनैः ।
धान्यैश्च पशुभिर्वस्त्रैर्वाहनैर्भूमिदानकैः ॥ २०४ ॥
शेषानपि च तक्षादिविष्टिसर्वान् स कर्मणि ।
सन्तर्पयेद्धिरण्यैश्च वस्त्रैर्वापि मनोहरैः ॥ २०५ ॥
विमानस्थूपिकास्तम्भमण्डपालङ्कृतान्यपि ।
वस्त्रादीनि ध्वजं धेनुं प्रीत्या स्थपतये ददेत् ॥ २०६ ॥
एवमेवं कृतं वस्तु वर्धयेन्नित्यमा युगात् ।
यजमानस्त्विहामुत्र फलं सम्यग् लभेद् दृढम् ॥ २०७ ॥
अन्यथा चेत् फलं नैव लभते तत्र वस्तुनि ।
भूतप्रेतपिशाचादिराक्षसाश्च वसन्त्यलम् ॥ २०८ ॥
तस्मात् प्रासादनिष्पन्ने सर्वथा प्रोक्षणं चरेत् ।
मण्डपे च सभायां वा रङ्गे विहारशालके ॥ २०९ ॥
हेमगर्भसभायां तु तत्तुलाभारकूटके ।
विश्वकोष्ठे प्रपायां च धान्यागारे महानसे ॥ २१० ॥
वास्तुदेवबलिं दत्त्वाधिवास्य विधिना तथा ।
स्थपतिः पूतचित्तात्मा प्राप्तपञ्चाङ्गभूषणः ॥ २११ ॥
नवाम्बरधरश्चैव नववस्त्रोत्तरीयकः ।
सर्वमङ्गलघोषैश्च जलसम्प्रोक्षणं चरेत् ॥ २१२ ॥

उत्तरायणमासे तु कृतं चेदुत्तमोत्तमम्।
त्वरितेऽप्येवमेवं तु कुर्यात् तद् दक्षिणायने ॥ २१३ ॥
त्रिरात्रमेकरात्रं वा सद्योऽधिवासमेव वा।
तत्रैवाविकले द्रव्ये लभेत् कर्ता महत् फलम् ॥ २१४ ॥

एकत्रिपञ्चकलशेषु तथाधिदेवा
एकत्रिपञ्च कथिता इह मूर्तयस्ताः।
तत्तत् स्वमन्त्रसहितं तदधः सहेम-
रत्नं निधाय विधिना कलशान् न्यसेत्तत् ॥२१५॥
एवं मुदा भवनकर्मसमाप्तिमत्र
कुर्याज्जनेशजन(को?गो)कुलसम्पदृद्ध्यै।
यद् वैपरीत्यमसमाप्तिकवस्तुवेशं
तद् वास्तुदेवबलिहीनमनर्थदं स्यात् ॥ २१६ ॥

इति मयमते वस्तुशास्त्रे शिखरकरणभवनकर्मसमाप्तिविधानं नाम
अष्टादशोऽध्यायः।

अथैकोनविंशोऽध्यायः।

एकभौमं चतुर्मानं वक्ष्ये संक्षिप्य शास्त्रतः।
त्रिचतुर्हस्तमारभ्य नवपङ्क्त्यन्तविस्तृतम् ॥ १ ॥
तारे सप्तदशोत्सेधमध्यर्धं तत्त्रिपादकम्।
द्विगुणं तु तदुत्सेधं शान्तिकं पौष्टिकं भवेत् ॥ २ ॥
जयदं चाद्भुतं चैव चतुर्धोदयमीरितम्।
चतुरं वृत्तमायामं द्व्यश्रवृत्तं षडश्रकम् ॥ ३ ॥

अष्टाश्रमाकृतिर्ह्येषां शिखरेऽपि तथैव च ।
समं त्रिपादमर्धं वा मुखमण्डपमिष्यते ॥ ४ ॥
समं तन्मण्डपं यस्य सान्तरालं सवेशकम् ।
युग्मस्तम्भसमायुक्तं युक्त्या सर्वाङ्गशोभितम् ॥ ५ ॥
सार्धहस्तं द्विहस्तं वा प्रासादस्यांशमेव वा ।
अन्तरालस्य विस्तारं द्विदण्डं तस्य वेशनम् ॥ ६ ॥
सावकाशान्तरालं चेद् द्वित्रिहस्तान्तरं तु वा ।
पार्श्वे सोपानसंयुक्तं हस्तिहस्तविभूषितम् ॥ ७ ॥

धाम्नः कुड्यस्यार्धकं तत्समं वा
पादोनं वा भित्तिविष्कम्भमानम् ।
पार्श्वे चैतद् द्वित्रिदण्डैस्तु वेशं
कुर्यादग्रे मण्डपस्यास्य धीमान् ॥ ८ ॥

तत्युन्नतायतकरेषु च हस्तमाना-
द्धीनं त्रिपादकरमर्धमथापि पादम् ।
तत्रैव वस्तुनि यथोचितमाचरेद् वै
हानिं च वृद्धिकमनिन्द्यमनेकशास्त्रैः ॥ ९ ॥

विमानं भवनं हर्म्यं सौधं धाम निकेतनम् ।
प्रासादं सदनं सद्म गेहमावासकं गृहम् ॥ १० ॥
आलयं निलयं वासमास्पदं वस्तु वास्तुकम् ।
क्षेत्रमायतनं वेश्म मन्दिरं धिष्ण्यकं पदम् ॥ ११ ॥
लयं क्षयमगारं च तथोदवसितं पुनः ।
स्थानमित्येवमुक्ताश्च पर्यायाख्या हि पण्डितैः ॥ १२ ॥

हर्म्यतारत्रिभागैकं भूतांशेषु गुणांशकम्।
धातुभागे युगांशः स्याद् बाणांशं नवभागिके ॥ १३ ॥

रुद्रांशे रसभागं तु धातुत्रयोदशांशके ।
तिथ्यंशे वसुभागं तु सप्तदश नवांशकम् ॥ १४ ॥

विस्तारार्धं तु ते सर्वे नालीगृहविशालताः।
फलिके पञ्चभागे तु युगार्धं पद्मविस्तृतम् ॥ १५ ॥

पद्म(रा?ता)रत्रिभागैकं कुम्भतारमिति स्मृतम्।
कुम्भतारत्रिभागैकं कुम्भस्याधो वलग्नकम् ॥ १६ ॥

वलग्नस्य त्रिभागैकं कुम्भस्योपरि कन्धरम्।
कन्धरत्रिगुणं पाली तत्त्रिभागेन कुड्मलम् ॥ १७ ॥

समं त्रिपादमर्धं वा महानासीविनिर्गमम्।
तद्व्यासत्रिचतुर्भागहीनं स्कन्धान्ततुङ्गकम् ॥ १८ ॥

शक्तिध्वजं तदर्धोच्चं त्रिपादं वा विधीयते।
कन्धरोच्चत्रिभागैकं वेदिकोदयमीरितम् ॥ १९ ॥
सार्धदण्डं द्विदण्डं वा क्षुद्रनास्या विशालकम् ॥

पादोत्सेधे पङ्क्तिनन्दाष्टभागे द्वारोत्सेधं तत्तदेकांशहीनम्।
विस्तारं स्यात् तत्तदुच्चार्धमानं द्वारं कुर्याद्धर्म्यमध्ये नृपाणाम् ॥

योगव्यासं पादविष्कम्भमानं पादाधिक्यं वा तदर्धं त्रिपादम्।
बाहुल्यं स्यादुच्छ्रये वेदभागे बाह्ये साब्जक्षेपणं तत्त्रिभागैः ॥

भित्तिव्यासे द्वादशांशे तु बाह्ये
पञ्चांशान्तद्वारयोगस्य मध्यम्।
तद्वच्चान्तः स्तम्भमध्यं तयोस्त-
न्मध्यं प्रोक्तं भित्तिमध्यं विधिज्ञैः ॥ २२ ॥

जन्मान्तं वा जगत्यन्तं कैरवान्तं गलान्तकम् ॥ २३ ॥

पट्टिकान्तं तलं पञ्चभेदं सर्वेषु धामसु ।
छिद्रं विद्यादधश्चोर्ध्वे बाह्ये नालं प्रयोजयेत् ॥ २४ ॥

द्वादशाङ्गुलमारभ्य त्रित्र्यङ्गुलविवर्धनात् ।
चतुर्विंशाङ्गुलं यावदायामं पञ्चधा भवेत् ॥ २५ ॥

अष्टाङ्गुलं समारभ्य द्विद्व्यङ्गुलविवर्धनात् ।
तारं षोडशमात्रान्तं पञ्चधा परिकीर्तितम् ॥ २६ ॥

समं त्रिपादमर्धं वा घनं छिद्रं तु मध्यमे ।
त्रिचतुष्पञ्चषण्मात्रं तारं तत्समनिम्नकम् ॥ २७ ॥

मूलात् पञ्चत्रिभागं स्यादग्रं धारासमन्वितम् ।
घटितं सिंहवक्त्रेण किञ्चिन्मूलान्नताग्रकम् ॥ २८ ॥

एवं नालं प्रकर्तव्यं वामे प्रासादमध्यमे ।
अन्तःपीठस्य नालस्य समं वा बहिरिष्यते ॥ २९ ॥

विस्तारायाममुत्सेधं सर्वाण्यङ्गानि च क्रमात् ।
सङ्क्षेपतः समादिष्टान्यलङ्कारमथोच्यते ॥ ३० ॥

वृत्तग्रीवामस्तकं वैजयन्तं श्रीभोगं स्यात् कर्णकूटोपयुक्तम् ।
मध्येभद्रं श्रीविशालं तदेव वस्वश्रं चेच्छीर्ष(कं) स्वस्तिबन्धम् ॥

वेदाश्राभं तच्छिरः श्रीकरं स्याद् द्व्यश्रं वृत्तं हस्तिपृष्ठं हि नाम्ना ।
ऋत्वश्राभं शीर्षकं स्कन्दकान्तं तत्तन्नाम्ना तत्तदायामयुक्ते ॥

मध्ये भद्रयुतं कर्णकूटयुक्तं तु मस्तके ।
कोष्ठकं भद्रनास्यङ्गं वृत्तं वा गलमस्तकम् ॥ ३३ ॥

नाम्नैतत् केसरं प्रोक्तं युगाश्रं वा गलं शिरः ।
पञ्चसप्तर्तुभागे तु त्रिद्व्यंशैर्मध्यभद्रकम् ॥ ३४ ॥

नागरं द्राविडं चैव वेसरं च त्रिधा मतम् ।
चतुरश्रायताश्रं यन्नागरं परिकीर्तितम् ॥ ३५ ॥
अष्टाश्रं च षडश्रं च तत्तदायाममेव च ।
सौधं द्राविडमित्युक्तं वेसरं तु प्रकथ्यते ॥ ३६ ॥
वृत्तं वृत्तायतं द्व्यश्रं वृत्तं चान्यं प्रकथ्यते ।
स्थूप्यन्तं चतुरश्रं यन्नागरं परिकीर्तितम् ॥ ३७ ॥
ग्रीवात् प्रभृति वस्वश्रं विमानं द्रामिळं भवेत् ।
ग्रीवात् प्रभृति वृत्तं यद् वेसरं तदुदाहृतम् ॥ ३८ ॥
तले तले विमानानां दिक्षु देवान् न्यसेत् क्रमात् ।
पूर्वायां द्वारपालौ तु नन्दिकाळौ च विन्यसेत् ॥ ३९ ॥
दक्षिणे दक्षिणामूर्तिं पश्चिमेऽच्युतमेव हि ।
अथवा लिङ्गसम्भूतमुत्तरे तु पितामहम् ॥ ४० ॥
मण्डपे मध्यदेशे तु दक्षिणे तु विनायकम् ।
तत्पूर्वे पश्चिमे वापि नृत्तरूपं विशेषतः ॥ ४१ ॥
कात्यायनीमुदग्भागे क्षेत्रपालं तथैव च ।
स्थानकासनसंयुक्ता दिशामूर्तीन्न्यसेद् बुधः ॥ ४२ ॥
विशेषेण कथोपेतं रूपाण्यपि विधानतः ।
एवं मूलतले प्रोक्तमुपर्युपरि वक्ष्यते ॥ ४३ ॥
पुरन्दरं न्यसेत् पूर्वे सुब्रह्मण्यमथापि वा ।
दक्षिणे वीरभद्रः स्यान्नारसिंहश्च पश्चिमे ॥ ४४ ॥
उत्तरे तु विधाता स्याद् धनदो वा विधीयते ।
एवं द्वितलविन्यासं त्रितले तु मरुद्गणान् ॥ ४५ ॥

तले तलेऽमरान् सिद्धान् गन्धर्वादिमुनीन् न्यसेत् ।
षोडश प्रतिमाश्चैव सर्वत्र परिकीर्तिताः ॥ ४६ ॥
ग्रीवाधस्तात् प्रतेरूर्ध्वे कोणे कोणे वृषान् न्यसेत् ।
सर्वेषामपि देवानां तत्तद्वाहनमीरितम् ॥ ४७ ॥
प्रदक्षिणावृतं तस्य सर्वदेवालये तथा ।
इत्येवमादिभिर्युक्तं विमानं सम्पदां पदम् ॥ ४८ ॥
कूटैर्नीडैस्तोरणैर्मध्यभद्रैर्युक्तायुक्तं तत्तु सर्वाङ्गशोभम् ।
नानाधिष्ठानाङ्घ्रिवेद्यादियोगं धाम प्रोक्तं तैतिलानां मयेह ॥

इति मयमते वस्तुशास्त्रे एकभूमिविधानं नाम
एकोनविंशोऽध्यायः ।

अथ विंशोऽध्यायः ।

द्वितलं पञ्चधामानं वक्ष्ये सङ्क्षेपतः क्रमात् ।
पञ्चषट्सप्तमारभ्य द्विद्विहस्तविवर्धनात् ॥ १ ॥
सैकार्कर्तुहस्तान्तमुत्सेधं पूर्ववद् भवेत् ।
तारे सप्तर्तुभागे तु भागं सौष्ठिकविस्तृतम् ॥ २ ॥
कोष्ठं तु द्विगुणायामं शेषं हारं सपञ्जरम् ।
विमानोत्सेधं विभजेदष्टाविंशतिसङ्ख्यया ॥ ३ ॥
ईशाद् द(गृ)तुबन्धांशैर्भूतनेत्रशिवांशकैः ।
नेत्रसार्धचतुर्भागैरध्यर्धेन यथाक्रमम् ॥ ४ ॥
मसूरकाङ्घ्रिकं मञ्चमङ्घ्रिमञ्चवितर्दिकम् ।
कन्धरं शिखरं कुम्भं मूलतः परिकल्पयेत् ॥ ५ ॥

चतुरश्रमधिष्ठानं तद्वत् कन्धरमस्तकम्।
चतुष्कूटसमायुक्तं चतुष्कोष्ठसमन्वितम् ॥ ६ ॥
दभ्रनीडा(सु ? तु)पर्यष्टौ षडष्टैवाल्पनासिकम्।
शिखरं चोरुनाडीभिर्वेदसङ्ख्याभिरन्वितम् ॥ ७ ॥
हारान्तरस्य मध्ये तु कुड्यं कुम्भलतान्वितम्।
तोरणैर्वेदिकाद्यैस्तु नानाचित्रैर्विचित्रितम् ॥ ८ ॥
सर्वदेवार्हकं शस्तं नाम्नैतत् स्वस्तिकं भवेत्।
तदेव सौष्ठिकं निम्नमुन्नतं कोष्ठकं यदि ॥ ९ ॥
अन्तरप्रस्तरोपेतमेतद् विपुलसुन्दरम्।
अंशमंशत्रयं सत्रिपादांशं साङ्घ्रिभागिकम् ॥ १० ॥
भागत्रयं वितर्द्यङ्घ्रिप्रस्तरग्रीवमस्तकम्।
पादोदये दशांशे तु द्वितलादिविमानके ॥ ११ ॥
अन्तरप्रस्तरोपेतं कूटशालोन्नतं मतम्।
तदेव कोष्ठकं निम्नं सौष्ठिकं चोन्नतं यदि ॥ १२ ॥
अन्तरप्रस्तरोपेतमेतत् कैलासमुच्यते।
तदेव वर्तुलं वेदिकन्धरं शिखरं घटम् ॥ १३ ॥
अष्टकूटं चतुश्शालोपेतं सप्ताष्टनासिकम्।
कोष्ठकान्निर्गमं मध्ये द्वित्रिदण्डेन सौष्ठिकात् ॥ १४ ॥
समग्रीवाशिरोयुक्तं कूटकोष्ठकमीरितम्।
नानाधिष्ठानसंयुक्तं नानापादैरलङ्कृतम् ॥ १५ ॥
नाम्नैतत् पर्वतं प्रोक्तं विमानं सार्वदेशिकम्।
तदेव शिखरे चार्धकोष्ठकं तु चतुष्टयम् ॥ १६ ॥

चतुरश्रशिरोयुक्तं चतुष्कूटसमन्वितम् ।
नानाधिष्ठानसंयुक्तं षडष्टैवाल्पनासिकम् ॥ १७ ॥
नाम्नैतत् स्वस्तिबन्धं स्यान्नानावयवशोभितम् ।
तदेव सौष्ठिकं कोष्ठमन्तरप्रस्तरैर्युतम् ॥ १८ ॥
हाराल्पपञ्जरं निम्नं नवाष्टैर्वाल्पनासिकम् ।
नानालङ्कारसंयुक्तं कल्याणमिति पठ्यते ॥ १९ ॥
तदेव शिखरे चार्धकोष्ठकं रहितं तु चेत् ।
चतुर्नाडीसमायुक्तमेतत् पाञ्चालमिष्यते ॥ २० ॥
तदेवाष्टाश्रकं वेदीकन्धरं शिखरं घटम् ।
शिखरेऽष्टमहानासि नाम्नैतद् विष्णुकान्तकम् ॥ २१ ॥
तदेव कूटशालानामन्तरप्रस्तरं विना ।
तच्चतुर्भागमाधिक्यमायतं चतुरश्रकम् ॥ २२ ॥
आयताश्रं तथा वेदीकन्धरं शिखरं भवेत् ।
स्थूपित्रयसमायुक्तमेतन्नाम्ना सुमङ्गलम् ॥ २३ ॥
तदेवायतवृत्तं चेद् वेदिकाकन्धरं शिरः ।
सर्वावयवसंयुक्तमेतद् गान्धारमिष्यते ॥ २४ ॥
तारादर्धांशमाधिक्यमायतं चतुरश्रकम् ।
द्व्यश्रवृत्तशिरोयक्तं नेत्रशालामुखान्वितम् ॥ २५ ॥
हस्तिपृष्ठमिदं द्व्यश्रं वृत्तं वापि मसूरकम् ।
चतुरश्रमधिष्ठानं वृत्तं स्याद् गर्भगेहकम् ॥ २६ ॥
सर्वालङ्कारसंयुक्तमेतन्नाम्ना मनोहरम् ।
तदेव जन्माद्या कुम्भाद् वृत्तं चेति बहिर्बहिः ॥ २७ ॥

शेषं पूर्ववदुद्दिष्टमिष्टमीश्वरकान्तकम् ।
तदेव चतुरश्रं स्याद् गर्भगेहं मसूरकम् ॥ २८ ॥
वर्तुलं जन्मतः स्थूपिकान्तं चेद् वृत्तहर्म्यकम् ।
आयताश्रमधिष्ठानं षडश्रं कन्धरं शिरः॥ २९ ॥
तदेव पूर्ववत् सर्व नाम्ना कुबेरकान्तकम् ।
मानं पञ्चविधं धाम्नां भेदं पञ्चदशैव हि ॥ ३० ॥
द्वितलानां यथा प्रोक्तं तथा कुर्याद् विचक्षणः ।
सञ्चितासञ्चितं चैवोपसञ्चितमिति त्रिधा ॥ ३१ ॥
स्त्रीपुन्नपुंसकं चैव त्रिविधं तत् प्रवक्ष्यते ।
इष्टकाभिः शिलाभिर्वा सञ्चितं यद् घनीकृतम् ॥ ३२ ॥
कपोतादिशिरोयुक्तं तत्तत् पुंस्त्वं समीरितम् ।
ऐष्टकं दारुजं सौधं भोगयुक्तागसंयुतम् ॥ ३३ ॥
स्त्रीत्वं ह्यसञ्चितं भोगाभोगयुक्तं द्रुमेष्टकैः ।
घनाघनाङ्गयुक् षण्डमुपसञ्चितमिष्यते ॥ ३४ ॥
ऊर्ध्वतलपादनिजदैर्घ्यमुनिभागे
स्थूप्युदयमेकमथ कं प्रति गुणांश(क?)म् ।
द्व्यंशि गलमंशकवितर्दिकमधस्तात्
खण्डभवनस्य विधिरुक्तमुरुधीभिः ॥ ३५ ॥
पादोदये दशनवाष्टविभाजिते तत्
सप्तर्तुपञ्चचरणायतमत्र भागम् ।
शेषं झषांशमुदयार्धविशालकं वा
षट्पञ्चवेदचरणेन भवेद् विशालम् ॥ ३६ ॥

नीडस्य तावदुदयं च विशालमङ्घ्रि-

मूलात् त्रिपादविपुलं तलिपं तयोश्च ।

हारान्तरे सदनमध्यपदे च कूटे

कोष्ठे च तोरणमलङ्कृतमेत्र कुर्यात् ॥ ३७ ॥

द्वारस्योभयपार्श्वे (सा? द्वा)रसमीपे तु वाथ पदमध्ये ।

द्वारपवासगुहा स्यादुत्तरमण्डान्तकं तु वो(च्यं?च्चं) तत् ॥

खण्डान्तपोतिकान्तं तोरणमात्रोदयं तु वा कथितम् ।

युक्त्या प्रवेशयुक्त्या सर्वस्मिन् धाम्नि कर्तव्याः ॥ ३९ ॥

इति मयमते वस्तुशास्त्रे द्विभूमिविधानं नाम

विंशोऽध्यायः ।

अथ एकविंशोऽध्यायः ।

त्रितलं पञ्चधामानं सङ्क्षेपाद् वक्ष्यतेऽधुना ।

सप्ताष्टहस्तमारभ्य द्विद्विहस्तविवर्धनात् ॥ १ ॥

पञ्चदशविकारान्तं व्यासतुङ्गं तु पूर्ववत् ।

सप्ताष्टनन्दहस्ते तु सप्ताष्टांशैर्विभाजिते ॥ २ ॥

भागेन कूटविस्तारं कोष्ठद्वित्रिगुणायतम् ।

लम्बपञ्जरमर्धांशं हाराभागं तु तत्समम् ॥ ३ ॥

ऊर्ध्वभूमौ षडंशेंऽशं कूटं तद्द्विगुणायतम् ।

कोष्ठकं चान्तरे हारं भागेनैव प्रकल्पयेत् ॥ ४ ॥

ऊर्ध्वभूमौ त्रिभागेन मध्ये भद्रं विधीयते ।

दण्डं सार्धं द्विदण्डं वा भद्रं तत् कारयेद् बुधः ॥ ५ ॥

विमानोच्चं विशेषेण चतुर्विंशतिभाजिते ।
पाशगङ्गाश्विनीभिस्तु सत्रिपादगुणांशकैः ॥ ६ ॥
सार्धांशैः सार्धबन्धांशैः सपादांशार्धकांशकैः ।
सार्धत्रिभिस्तु भागेन योजयेत् तु विचक्षणः ॥ ७ ॥
धरातलमधःस्तम्भमञ्चमङ्घ्रिकमञ्चकम् ।
तलिपं प्रस्तरं वेदीकन्धरं शिखरं घटम् ॥ ८ ॥

कूटं नीडं कोष्टकं चाष्टकं तद् वेदाश्राभं जन्मतः स्थूपिकान्तम्।
ऊर्ध्वे भूमावल्पनीडं द्विरष्टाविष्टं ह्यस्मिन् षण्णवत्यल्पनासम् ॥
नानाधिष्टानाङ्घ्रिवेद्यादियोगं मूर्धन्यष्टार्धं तथादभ्रनासम् ।
कोष्टं कूटादुन्नतं चेत् समं च शम्भोर्वासं स्वस्तिकं तच्चिभागम् ॥

तारे सप्तनवांशे तु भागं सौष्ठिकविस्तृतम् ।
शालाभागं तथा द्व्यंशं हाराभागेन कल्पयेत् ॥ ११ ॥
अष्टकूटं तु तत्कोष्ठं द्वादशैव विधीयते ।
अष्टौ नीडानि विंशत्तु शतमात्राल्पनासिकम् ॥ १२ ॥
अष्टाश्रं मस्तकं वेदी कन्धरं चाष्टनासिकम् ।
विमलाकृतिकं नाम्ना शम्भोर्वासं सनातनम् ॥ १३ ॥

हस्तनवसप्ततिसप्तनवभागं
भागततिकूटवसुकन्तुकमिवोष्टम(?) ।
ऊर्ध्ववसुपञ्जरमथाष्टगलनासं
विंशतिशतातु(?) विमलाकृति विमानम् ॥ १४ ॥

एकादशकरं व्यासमष्टभागैर्विभाजयेत् ।
तच्चतुर्भागमाधिक्यमायतं वृत्तमिष्यते ॥ १५ ॥

द्व्यश्रवृत्तमधिष्ठानं तद्वत् कन्धरमस्तकम्।
तद्विस्ताराधर्मानेन वर्तुलं वर्तनीयकम् ॥ १६ ॥
अश्रात् पार्श्वे च पृष्ठे च कुर्यादर्कद्वयांशकम्
कूटकोष्ठकनीडानां विस्तारं भागमिष्यते ॥ १७ ॥
कोष्ठकं द्विगुणायामं हारा भागेन योजिता
समं त्रिपादमर्धं वा मुखमण्डपमिष्यते ॥ १८ ॥
मण्डपोर्ध्वं यथा हर्म्यं तथालङ्कारमीरितम्
कूटकोष्ठादिसंयुक्तं मण्डपं खण्डहर्म्यके ॥ १९ ॥
त्रिवर्गसहितं वापि तोरणाद्यैर्विचित्रितम्।
मण्डपं समसूत्रं चेदन्तरालं तु निम्नकम् ॥ २० ॥
कूटकोष्ठादि सर्वाङ्गं मानसूत्राद् बहिर्गतम्।
स्वव्यासार्धं तदर्धार्धं दण्डं सार्धद्विदण्डकम् ॥ २१ ॥
द्विदण्डार्धं त्रिदण्डं वा मानसूत्राद् बहिर्गतम्।
एवं युञ्जीत हर्म्यं तु संपदामास्पदं सदा ॥ २२ ॥
ऋजुसूत्रं प्रमाणान्तं तद्भङ्गं विपदां पदम्।
षड्भागं स्यात् तदूर्ध्वे तु पृष्ठतस्तस्य पार्श्वयोः ॥ २३ ॥
कृत्वार्कद्विगुणांशं तु कूटकोष्ठादि पूर्ववत्।
ऊर्ध्वभौमं चतुर्भागं यथायुक्तिवशान्नयेत् ॥ २४ ॥
मस्तके पुरतो नेत्रशालावक्रसमन्वितम्।
गर्भकूटोपसंपन्नं क्षुद्रनास्यङ्घ्रिसंयुतम् ॥ २५ ॥
कूटकोष्ठादिसंयुक्तं यथालङ्कारमाचरेत्।
शिखरे दश नास्यः स्युस्तिस्रः पादसमन्विताः ॥ २६ ॥

अष्टकूटं तथा कोष्ठं नीडं द्वादश चैव हि।
हारायां क्षुद्रनीडं स्यादर्कद्विगुणसङ्ख्यया ॥ २७ ॥
नानामसूरकस्तम्भवेदिकाद्यैरलङ्कृतम् ।
सोपपीठमधिष्ठानं केवलं वा मसूरकम् ॥ २८ ॥
हस्तिपृष्ठमिदं नाम्ना सर्वदेवेषु योग्यकम् ।
पादोच्चत्रिद्विभागोच्चं पादं सर्वाङ्गसंयुतम् ॥ २९ ॥
पोतिकारहितं वीरकाण्डोपरि समण्डितम् ।
उत्तरं वाजनं साब्जक्षेपणं निम्नवाजनम् ॥ ३० ॥
तदूर्ध्वे झषकाण्डं स्यान्नानापत्रैर्विचित्रितम् ।
तोरणाकृतिसंयुक्तं मृणाल्यान्वितकन्धरम् ॥ ३१ ॥
सर्वालङ्कारसंयुक्तं स्तम्भतोरणमीरितम् ।
पादान्तरे वा हारायां कर्णप्रासादमध्यमे ॥ ३२ ॥
शालामध्येऽन्तराले तु कुर्यात सर्वेषु धामसु ।

स्तम्भे सर्वाङ्गयुक्ते समतलमुभयोः पार्श्वयोर्वीरकाण्ड-
स्याग्रे न्यस्तोत्तरं वाजनमुपरि दलं क्षेपणं तोरणाग्रम् ।
नक्रैः पत्रादिभिर्यद् विरचितमथ (तद्) धाम्नि वा मण्डपे वा
शालायामन्यवस्तुष्वभिमतमयुतस्तम्भयुक् तोरणं स्यात् ॥

तदेव चतुरश्राभमायतं तन्मसूरकम् ॥ ३४ ॥
विस्तारमष्टभागं स्यादायामं दशभागभाक् ।
कूटकोष्ठकनीडं च भा(गो ? गेनो)परि कल्पयेत् ॥ ३५ ॥
हाराभागं तु भागेन षडंशं चोर्ध्वभूमिके ।
तदूर्ध्वे तु चतुर्भागमायामे द्व्यंशमाधिकम् ॥ ३६ ॥

सायतं द्व्यश्रवृत्तं स्याद् वेदिकागलमस्तकम् ।
कूटकोष्ठादि सर्वाङ्गं पूर्ववत् परिकल्पयेत् ॥ ३७ ॥
नानाधिष्ठानसंयुक्तं नानापादैरलङ्कृतम् ।
पादोपरि भवेन्नासी स्वस्तिबन्धनशोभिता ॥ ३८ ॥
यथा बलं यथा योगं तथा कुर्याद् विचक्षणः ।
एतदप्युदितं सौधं गजपृष्ठं पुरातनैः ॥ ३९ ॥
युग्मेऽप्येवं प्रयुञ्जीयात् सर्वहर्म्ये विचक्षणैः ।
त्रयोदशकरव्यासं नवधा विभजेत् समम् ॥ ४० ॥
गर्भगेहं त्रिभागेन गृहपिण्डिस्तु भागतः ।
अन्धारमंशमंशेन प(ति?रि)तोऽन्धारिका भवेत् ॥ ४१ ॥
अंशेन सौष्ठिकं कोष्ठं विस्तारं त्रिगुणायतम् ।
अर्धेन नीडविस्तारं शेषं हाराङ्गमिष्यते ॥ ४२ ॥
कोष्ठमध्ये त्रिदण्डेन नासी निर्गमनान्विता ।
उपर्यपि षडंशेंऽशं कूटं तद्द्विगुणायतम् ॥ ४३ ॥
कोष्ठकं भागतो हारा पञ्जरैरन्विता भवेत् ।
ऊर्ध्वभागं त्रिभागेन मध्ये दण्डेन निर्गमम् ॥ ४४ ।
चतुरश्रमधिष्ठानं वस्वश्रं गलमस्तकम् ।
आदौ तले चतुष्कण्ठे कूटं वेदाश्रमस्तकम् ॥ ४५ ॥
अष्टाश्रमूर्ध्वभूमौ तु सौष्ठिकानां तु मस्तकम् ।
अष्टकूटं तथा नीडं कोष्ठकं तु तथैव हि ॥ ४६ ॥
क्षुद्रनीडं तथाप्यष्टावष्टौ स्युर्गलनासिकाः ।
स्वस्तिकाकारसंयुक्तं नासिकाभूषणं भवेत् ॥ ४७ ॥

भद्रकोष्ठमिदं नाम्ना यथार्थं परिकीर्तितम् ।
तदेव वर्तुलं कर्णकूटमूर्ध्वोर्ध्वभूमिके ॥ ४८ ॥
मस्तकं तस्य वृत्तं स्याच्चतुर्नासीसमन्वितम् ।
वृत्तकूटमिदं नाम्ना देवानां सार्वदेशिकम् ॥ ४९ ॥
तदेवाष्टांशमाधिक्यमायतं चतुरश्रकम् ।
कर्णकूटं युगाश्रं स्यादायतं वृत्तमस्तकम् ॥ ५० ॥
कोष्ठभद्रं विना तत्र शेषं पूर्ववदाचरेत् ।
स्तूपित्रयसमायुक्तमेतन्नाम्ना सुमङ्गलम् ॥ ५१ ॥
पश्चादशकरव्यासं पङ्क्त्यंशेन विभाजयेत् ।
गर्भगेहं चतुर्भागमन्धार्यंशेन योजिता ॥ ५२ ॥
अलिन्द्रमंशमंशेन खण्डहर्म्यं बहिः क्रमात् ।
कर्णे मध्येऽन्तरे कार्यं कूटं कोष्ठं च पञ्जरम् ॥ ५३ ॥
भागेन कोष्ठकायामं द्विगुणं संमतं बुधैः ।
उर्ध्वभूमौ रसांशे तु भागं सौष्ठिकविस्तृतम् ॥ ५४ ॥
कोष्ठकं द्विगुणायामं हारा भागेन योजयेत् ।
तदूर्ध्वे तु चतुर्भागं द्विभागं मध्यनिर्गमम् ॥ ५५ ॥
दण्डं वाध्यर्धदण्डं वा द्विदण्डं वा विशेषतः ।
चतुरश्रमधिष्ठानं तद्वत् कन्धरमस्तकम् ॥ ५६ ॥
अष्टकूटं तथा नीडं कोष्ठकं तु तथैव च ।
लम्बनीडमुपर्यष्टौ वर्षस्थलसमन्वितम् ॥ ५७ ॥
नासिका स्वस्तिकाकारा सर्वत्र परिशोभिता ।
नानामसूरकस्तम्भवेदीजालकतोरणम् ॥ ५८ ॥

उन्नतौ कूटकोष्ठौ चेदन्तरप्रस्तरान्वितौ ।
एतद् गान्धारमित्युक्तमष्टाश्रं वा गलं शिरः ॥ ५९ ॥
तदेव वर्तुलं वेदी कन्धरं शिखरं भवेत् ।
शेषं पूर्ववदुद्दिष्टं नाम्ना श्रीभोगमिष्यते ॥ ६० ॥
वृत्ते वृत्तायते द्व्यश्रवृत्तेऽष्टाश्रे षडश्रके ।
कूटकोष्ठकनीडानामुपर्युपरि च क्रमात् ॥ ६१ ॥
कूटकोष्ठकनीडैश्च मण्डितं खण्डहर्म्यके ।
ऋजुभागविशालात् तु द्व्यश्रवृत्ते तु वर्तुले ॥ ६२ ॥
भागं किञ्चिद् भवेन्न्यूनं भागं सर्वं समं तु वा ।
अष्टांशोनदशांशोनमूर्ध्वांशं वाप्यधोंशकात् ॥ ६३ ॥
यथा शोभाबलावाप्तिस्तथा युञ्जीत बुद्धिमान् ।
अर्पितानर्पितं चैव प्रासादं द्विविधं भवेत् ॥ ६४ ॥
अर्पितं न च सालिन्द्रमनर्पितमलिन्द्रभाक् ।
एवमल्पक्रमं सर्वं योजयेत् तद् विचक्षणः ॥ ६५ ॥

गुणशरमुनिनन्दैकादशैकाधिकार्कै-
स्तिथिमुनिदशभागे हर्म्यतारे कृतेऽस्मिन् ।
शशिगुणयु(ग)बाणैः षड्यमीनागनन्दैः
स्वभवनविपुलस्यार्धेन नालीगृहं स्यात् ॥ ६६ ॥

हर्म्याङ्गानां कूटकोष्ठादिकानां
ग्रीवाधस्ताद् वेदिका योजनीया ।
हाराभागे वेदिकावेदिका वा
नीडं वा (त)त्राल्पनासं च कुर्यात् ॥ ६७ ॥

तोरणं त्रिविधं पत्रतोरणं मकरान्वितम् ।
चित्रतोरणमित्येषां मण्डनं त्वधुनोच्यते ॥ ६८ ॥
बालचन्द्रनिभं पत्रैश्चित्रितं पत्रतोरणम् ।
द्वयोर्मकरयोर्वक्त्रसितमध्यमपूरितम् ॥ ६९ ॥
नानाविधलतायुक्तमेतन्मकरतोरणम् ।
तदेव पार्श्वयोर्मध्यं पूरिमध्यं द्वयोस्ततः ॥ ७० ॥
नक्रतुण्डं प्रगृह्यैव द्वयोरास्यविनिर्गतैः ।
विद्याधरैश्च भूतैश्च सिंहैर्व्यालैश्च हंसकैः ॥ ७१ ॥
बालैः स्रग्दामकैरन्यैर्मणिबन्धैर्विचित्रितम् ।
चित्रतोरणमेतत् स्याद् देवानां भूभुजां वरम् ॥ ७२ ॥
गुहासु प्रतिमास्तासु पार्श्वपादयुतानि च ।
तोरणान्युत्तराधस्तात् प्रयोज्यानि विचक्षणैः ॥ ७३ ॥
स्तम्भोच्चे पञ्चषट्सप्तद्व्यंशोच्चं तोरणाग्रकम् ।
शेषं पादोदयं पादं चतुरष्टाश्रवृत्तयुक् ॥ ७४ ॥
कुम्भमण्ड्यादिसंयुक्तं पोतिकारहितं तु वा ।
उत्तरं वाजनं साब्जक्षेपणं क्षुद्रवाजनम् ॥ ७५ ॥
पोतिकोपरि वा कुर्याद् वीरकाण्डस्य चोपरि ।
उत्सन्ध्यन्तानताग्रं तु कुर्यान्मकरविष्टरम् ॥ ७६ ॥
तुङ्गार्धे त्रिचतुष्पञ्चदण्डतोरणविस्तृतम् ।
द्वारतुल्योन्नतं व्यासान्तरं स्तम्भद्वयोरपि ॥ ७७ ॥
उत्तरोत्तर(सं ?)युक्ताष्टमङ्गलोर्ध्वस्थनक्रवत् ।
फलकं पञ्चवक्त्रं तु तदूर्ध्वे शूलसंयुतम् ॥ ७८ ॥

छत्रकेतुपताकाश्रीर्भेरी कुम्भं च दीपिका ।
नन्द्यावर्तेन चाष्टौ हि सर्वेषामष्टमङ्गलम् ॥ ७९ ॥
एवं प्रोक्तं चतुर्भेदं देवादीनां तु तोरणम् ।
पद्मासनोर्ध्वे कुम्भस्य तिर्यक् चारुलताकृतिः ॥ ८० ॥
तदूर्ध्वे स्तम्भमासक्तवल्लीमण्डलमण्डितम् ।
तदूर्ध्वे फलकोर्ध्वाब्जमिष्टकुम्भलताग्रकम् ॥ ८१ ॥
कुम्भकुम्भलतैवं स्यादन्यदप्येवमूह्यताम् ।
तदेवोत्सन्धिकोर्ध्वे तु वीरकाण्डसमन्वितम् ॥ ८२ ॥
स्तम्भकुम्भलतैवं स्यात् स्तम्भतोरणवच्छिरः ।
हारायां तु प्रकर्तव्या दैवेऽदैवे निकेतने ॥ ८३ ॥
षडष्टदशमार्ताण्डमनुवैकारसात्रकैः ।
व्यासं तारार्धनिष्क्रान्तत्रिद्व्यशं वा त्रिभागिकम् ॥
वृत्ताकारसमं छन्नं तोरणाङ्घ्रिवदायतम् ।
सकन्धरं तदूर्ध्वे तु शुकनास्या विभूषितम् ॥ ८५ ॥
वृत्तस्फुटितमित्युक्तं द्युसदां सद्मभूषणम् ।
तले तले तु सोपानं प्रयुञ्जीत विचक्षणः ॥ ८६ ॥
त्रिविधं तस्य मूलं तु चतुरं वृत्तमायतम् ।
चतुर्विधप्रकारं(?) स्यात् त्रिखण्डं शङ्खमण्डलम् ॥ ८७ ॥
वल्लीमण्डलमत्यर्धगोमूत्रेण समाहितम् ।
मूलादाग्रात् क्रमक्षीणं प्रथितं शङ्खमण्डलम् ॥ ८८ ॥
स्याद् वल्लीमण्डलं वृक्षारोहिवल्लीसमक्रियम् ।
अश्वपादोपरिस्थित्यारोहणं दक्षिणाङ्घ्रिणा ॥ ८९ ॥

द्विदण्डाद्याः सप्तदण्डात् सोपानस्य विशालतः (?)।
अश्वपादस्य विस्तारो द्विगुणाद्यश्चतुर्गुणात् ॥ ९० ॥
शयितव्यासपादार्धत्रिपादांशं दशोदयैः।
स्थितानीभबालवृद्धसमखण्डान्यनुक्रमात् ॥ ९१ ॥
शयानफलकव्यासः षोडशाष्टादशाङ्गुलाः।
समुद्गतं षडंशैकमेवं सोपानकल्पनम् ॥ ९२ ॥
हस्तव्यासं द्विदण्डं तत्पादव्यासं तु बाहलम्।
हस्ते यथाबलं योज्यं प्रवशेस्थितशायिनोः ॥ ९३ ॥
अयुग्ममेव सोपानं गुह्यागुह्यवशात् ततः।
एकभक्तिविनिष्क्रान्तं मण्डपादिषु बाह्यतः ॥ ९४ ॥
सोपानं सर्ववर्णानां प्रादक्षिण्याधिरोहणम्।
प्रशस्तं विपरीतं तद् विनाशाय भवेदिह ॥ ९५ ॥
अधिष्ठानादिरोहार्थं सोपानं पार्श्वयोर्मुखम्।
हस्तिहस्तं चाश्वपादफलकान्तं प्रयोजयेत् ॥ ९६ ॥
सोपानं तदाधिष्ठानस्तम्भप्रस्तरवद् भवेत्।
एवं विधिविशिष्टं तु सोपानं सम्पदां पदम् ॥ ९७ ॥

एवं प्रोक्तं तैतिलानां नराणां वासे योग्यं तोरणं चैव युक्त्या ॥
सोपानं तद्भेदमाकारमस्मिन् सम्यग् योज्यं वास्तुविद्याविधिज्ञैः।
स्यान्नागरं द्राविडवेसरं च क्रमेण वै सत्त्वरजस्तमांसि।
महीसुरोर्वीपतिवैश्यकास्ते हरिर्विधाता हर आधिदैवाः ॥ ९९ ॥

इति मयमते वस्तुशास्त्रे त्रिभूमिविधानो नाम
एकविंशोऽध्यायः।

अथ द्वाविंशोऽध्यायः ।

पञ्चमानं चतुर्भौमं वक्ष्ये संक्षेपतः क्रमात् ।
त्रिचतुष्पङ्क्तिहस्तादिद्विद्विहस्तविवर्धनात् ॥ १ ॥

एकद्वाविंशदन्तं तु व्यासतुङ्गं तु पूर्ववत् ।
विस्तारोत्सेधमानाभ्यां भागान् वक्ष्यामि हर्म्यके ॥ २ ॥

त्रयोदशकरव्यासमष्टधा विभजेत् समम् ।
एकांशं कूटविस्तारं शालायामं द्विभागिकम् ॥ ३ ॥

भागेन पञ्जरव्यासमूर्ध्वे तु पुनरष्टधा ।
प्राग्वदेव सभाशालापञ्जराणामुपर्यपि ॥ ४ ॥

ऊर्ध्वे षड्भागिके भागमेकं कूटस्य विस्तृतम् ।
द्विभागं कोष्ठकायामं नीडं (प्रा ? भा)गार्धमिष्यते ॥ ५ ॥

तदूर्ध्वे गुणभागेंऽशं मध्ये दण्डेन निर्गमम् ।
उत्सेधं विभजेद् विद्वान् नवत्रिंशतिसङ्ख्यया ॥ ६ ॥

सार्धद्व्यंशमधिष्ठानं पञ्चांशं पाददैर्घ्यकम् ।
तदर्धं प्रस्तरोत्सेधं सत्रिपादयुगांशकम् ॥ ७ ॥

ऊर्ध्वभूम्यङ्घ्रिकोत्सेधं सपादद्व्यंशमञ्चकम् ।
जङ्घा तद्विगुणा चोर्ध्वे द्व्यंशेन प्रस्तरोदयम् ॥ ८ ॥

पादाधिकचतुर्भागमुपरिस्तम्भतुङ्गकम् ।
स्यात् सत्रिभागपादेन प्रस्तरं वेदिकांशकम् ॥ ९ ॥

गलोच्चमश्विनीभागं सार्धवेदैस्तु मूर्धनि ।
शेषभागं शिखामानमाभोगं चतुरश्रकम् ॥ १० ॥

रविसंख्या भवेत् सौष्ठी कोष्ठं तावत् तु पञ्जरम् ।
शिखरे देवनास्यः स्युश्चाल्पनास्या विभूषितम् ॥ ११ ॥
स्वस्तिकाकारसंयुक्तं नासिकाभिरलङ्कृतम् ।
प्राग्वदेव तलं चाधः स्तम्भालङ्कारतोरणम् ॥ १२ ॥
सर्वालङ्कारसंयुक्तमेतद्धर्म्यं सुभद्रकम् ।
सर्वं प्राग्वत् कूटकोष्ठादि युक्त्या मध्ये मध्ये मस्तकं मण्डलाभम्।
वृत्ताकारं स्यात् सभानां शिरस्तद्विस्तारार्धेनान्वितं गर्भगेहम् ॥
शेषं त्र्यंशेनावृतावासपिण्डिरतत्तुल्यं तद्बाह्यतोऽन्धारहारम् ।
नानाधिष्ठानाङ्घ्रिवेद्यादियोगं नाम्नेदं स्याच्छ्रीविशालं सुहृष्टम्॥
पञ्चदशाकरव्यासं नवधा विभजेत् क्रमात् ॥ १५ ॥
गर्भगेहं त्रिभागैकं गृहपिण्ड्यस्तदंशकम् ।
अंशेन परितोऽलिन्द्रं खण्डहर्म्यं तथांशकम् ॥ १६ ॥
सभा शाला तथा नीडं भागेनैकेन विस्तरात् ।
विस्तारत्रिगुणायामा स्वव्याससमनिर्गमा ॥ १७ ॥
शालामध्ये महानासी भागतल्या विनिर्गता ।
सभाकोष्ठ(क)नीडानामन्तरेऽर्धेन हारकम् ॥ १८ ॥
तदुपर्यष्टभागेन विभजेत् कूटमंशकम् ।
कोष्ठकस्य तु विस्तारं तदेव द्विगुणायतम् ॥ १९ ॥
कूटशालान्तरे नीडमंशेन परिकल्पयेत् ।
तदूर्ध्वे रसभागे तु कूटमंशेन कोष्ठकम् ॥ २० ॥
विस्तारद्विगुणायाममन्तरेऽर्धेन पञ्जरम् ।
ऊर्ध्वभूमे चतुर्भागे मध्ये दण्डेन निर्गमम् ॥ २१ ॥

अष्टाश्रं कर्णकूटं स्यात् कोष्ठकं क्रकरीकृतम् ।
महाशिखरमष्टाश्रमष्टनास्या विभूषितम् ॥ २२ ॥
कूटकोष्ठकनीडानां संख्यायां पूर्ववत् ततिः ।
अस्याप्युत्सेधभागं च पूर्ववत् परिकल्पयेत् ॥ २३ ॥
भद्रकोष्ठमिदं नाम्ना वेदभौमं दिवौकसाम् ।
सप्तदशकरव्यासं दशभागैर्विभाजयेत् ॥ २४ ॥
नालीगृहं चतुर्भागमंशेनान्धारिका भवेत् ।
अलिन्द्रमंशमंशेन परितः खण्डहर्म्यकम् ॥ २५ ॥
कूटं कोष्ठं च नीडं च भागेन परिकल्पयेत् ।
कोष्ठायामं द्विभागं स्याच्छेषं हारा सपञ्जरम् ॥ २६ ॥
जलस्थलं विहायोर्ध्वे वसुभागैर्विभाजिते ।
भागेन कूटविस्तारं कोष्ठकं द्विगुणायतम् ॥ २७ ॥
हारान्तरे तथांशेन लम्बपञ्जरमीरितम् ।
तदूर्ध्वे रसभागे तु भागं सौष्ठिकविस्तृतम् ॥ २८ ॥
द्विभागं कोष्ठकायामं हारायां क्षुद्रपञ्जरम् ।
तदूर्ध्वे तु त्रिभागेन मध्ये दण्डेन निर्गमम् ॥ २९ ॥
चतुरश्रमधिष्ठानमष्टाश्रं गलमस्तकम् ।
त्रिचतुष्कोष्ठकं तावत् सौष्ठिकं चाष्टपञ्जरम् ॥ ३० ॥
लम्बपञ्जरमष्टौ हि क्षुद्रनीडं द्विरष्टकम् ।
गलनास्यष्टसंयुक्तं कोष्ठकं किञ्चिदुन्नतम् ॥ ३१ ॥
नानामसूरकस्तम्भवेदीजालकतोरणम् ।
नानालङ्कारसंयुक्तं नानाचित्रैर्विचित्रितम् ॥ ३२ ॥

सोपपीठमधिष्ठानं केवलं वा मसूरकम्।
स्वस्तिकाकारसंयुक्तं नासिकाभिरलङ्कृतम्॥ ३३॥
पूर्ववत् तुङ्गभागं स्यादेतन्नाम्ना जयावहम्।
नवपङ्क्तिकरव्यासे दशभागविभाजिते॥ ३४॥
गर्भगेहं चतुर्भागं गृहपिण्डिस्तदंशके।
अन्धारमंशमंशेन परितः खण्डहर्म्यकम्॥ ३५॥
कूटकोष्ठकनीडानां तारमंशेन योजयेत्।
कोष्ठकं द्विगुणायामं हारा भागसमन्विता॥ ३६॥
पञ्चांशे सौष्ठिकव्यासे मध्ये द्व्यंशेन विस्तरम्।
एकभागविनिष्क्रान्तयुग्मस्तम्भसमन्वितम्॥ ३७॥
सोपपीठमधिष्ठानं समञ्चं सवितर्दिकम्।
सकन्धरशिरोयुक्तं सर्वालङ्कारसंयुतम्॥ ३८॥
पादुकोत्तरयोर्मध्ये नवांशेनोपपीठकम्।
मसूरकं द्विभागोच्चं द्विगुणं स्तम्भदैर्घ्यकम्॥ ३९॥
सार्धांशं प्रस्तरोत्सेधमर्धांशं वेदिकोदयम्।
उत्तरादिकपोतान्तं गलोदयमितीरितम्॥ ४०॥
पञ्जराकृतिसंयुक्तं कपोतात् तु विनिर्गतम्।
यथाशोभं यथायुक्ति तथा शक्तिध्वजान्वितम्॥ ४१॥
कपोतपञ्जरं ह्येतत् प्रासादे सार्वदेशिके।
हारायां वाथ शालायां मध्ये मध्ये तु योजयेत्॥ ४२॥
कूटकोष्ठकनीडं चैवान्तरप्रस्तरान्वितम्।
जलस्थलं विहायोर्ध्वभूमावष्टांशसौष्ठिकम्॥ ४३॥

द्विगुणं कोष्ठकायामं तयोर्मध्ये तु पञ्जरम् ।
तदूर्ध्वे रसभागे तु सौष्ठिकोष्ठं तु पूर्ववत् ॥ ४४ ॥
विजयस्य यथा प्रोक्तं शेषमूर्ध्वे तु योजयेत् ।
कूटकोष्ठादि सर्वाङ्गं पूर्ववत् संख्यया विदुः ॥ ४५ ॥
महानीडं द्विरष्टौ स्यान्नाम्नेदं भद्रकूटकम् ।
तदेवान्यदलङ्कारं शालामध्ये सभद्रकम् ॥ ४६ ॥
वृत्तग्रीवाशिरोयुक्तमेतन्नाम्ना मनोहरम् ।
तदेवान्यदलङ्कारं वेदाश्रं कन्धरं शिरः ॥ ४७ ॥
नानामसूरकस्तम्भवेदिकाद्यैरलङ्कृतम् ।
नाम्नावन्तिकमित्युक्तं शम्भोर्मन्दिरमुत्तमम् ॥ ४८ ॥

त्रिःसप्तहस्तविपुले चतुरंशनाली
घर्मांशकेंऽशमभितो गृहपिण्डिमानम् ।
अन्धारमंशमभितोंऽशकमङ्गहारं
कूटं च नीडमथ कोष्ठकमंशतारम् ॥ ४९ ॥
शालायतं द्विगुणमंशकतारहारं
वातायनैर्मकरतोरणकैर्विचित्रम् ।
त्यक्त्वा जलस्थलमुपर्यपि चाष्टभागे
कूटं च नीडमथ कोष्ठकमंशतत्या ॥ ५० ॥
शालायतं द्विगुणमूर्ध्वतले षडंशे
सौष्ठ्यंशमंशविपुलं द्विगुणायतं स्यात् ।
कोष्ठं च नीडविपुलं हि तदर्धभागं
चोर्ध्वे युगांशिनयनांशकमध्यभद्रम् ॥ ५१ ॥

दण्डेन निर्गममुपर्यपि भद्रनीडं
साधं द्विदण्डविपुलं गलनासिकं च ।
वृत्ताभकन्धरवितर्दिकमस्तकं स्या-
दष्टार्धनासिकमदभ्रमथाल्पमष्टौ ॥ ५२ ॥

कूटं च नीडमथ कोष्ठकमुन्नतं स्या-
दादौ तले तदपि मध्यसमश्वयुक्तम् ।
शालोन्नतं ह्युपरि चोन्नतमूर्ध्वकूटं
वृत्ताभमत्र वसुपट्टशिरस्तु मध्ये ॥ ५३ ॥

वेदाश्रकूटशिखरं ह्यथ मूलभूमौ
नासाल्पकं ह्युपरि वेधविहीनबन्धम् ।
नानामसूरकसहाङ्घ्रिकशोभिताङ्गं
नाम्ना सुखावहमिदं सुरमन्दिरं स्यात् ॥ ५४ ॥

सत्रिपादयुगलार्धपञ्चकैर्द्व्यर्धसाङ्घ्रिशिरसार्धनेत्रकैः ।
पञ्चभागिकसभागनेत्रकैस्त्र्यङ्घ्रिवेदनयनार्धवेदकैः ॥ ५५ ॥

त्र्यङ्घ्रिकांशकशिवद्विपादगङ्गाश्विनीभिरुदये षडष्टके ।
कुट्टिमं चरणमञ्चपादकं प्रस्तरं तलिपमञ्चमङ्घ्रिकम् ॥ ५६ ॥

प्रस्तरं तलिपमञ्चवेदिकं कन्धरं शिखरकुम्भकं क्रमात् ।
पञ्चभौममुदितं विशालके नन्दपङ्क्तिभिरथेन्द्रियांशकैः ॥५७॥

उच्छ्रये तदधः षड्भिर्गुणांशैरङ्घ्रिकं तलम् ।
षड्भौममेवमुद्दिष्टं ताराभागं तथा भवेत् ॥ ५८ ॥

तदधः सार्धषड्भागैः सपादगुणभागकैः ।
स्तम्भं मसूरकं कुर्यात् तारे रुद्रार्कभागतः ॥ ५९ ॥

सप्तभौममिदं प्रोक्तं विमानं सार्वदेशिकम् ।
तदधो मुनिभिः सार्धं गुणांशैः स्तम्भकुट्टिमम् ॥ ६० ॥
धर्मरुद्रार्कभागैस्तु सत्रयोदशभागिकः ।
अष्टभौमं वदन्त्यस्मिन्नेवं प्राज्ञा मुनीश्वराः ॥ ६१ ॥
तदधः सार्धसप्तांशैः सत्रिपादगुणांशकैः ।
स्तम्भं च तलकं कुर्यात् तारेऽशं तत्र पूर्ववत् ॥ ६२ ॥
एवं नवतलं प्रोक्तं दशभौममथोच्यते ।
तदधोऽष्टयुगांशैस्तु पादं मसूरकं भवेत् ॥ ६३ ॥
तारे पूर्वोक्तभागैस्तु मनुभागैरथापि वा ।
तदधः सार्धवस्वंशैः सपादयुगभागिकैः ॥ ६४ ॥
स्तम्भं मसूरकं कुर्यात् तारे तद्वच्च पक्षकैः ।
तथा द्विरष्टभागैस्तु सप्तदशांशकैस्तु वा ॥ ६५ ॥
एकादशतलं प्रोक्तं द्वादशक्ष्ममुच्यते ।
तदधो नन्दनन्दार्धभागैः स्तम्भं मसूरकम् ॥ ६६ ॥
तारे द्विरष्टभागादि यावदर्कद्वयांशकम् ।
गृहपिण्ड्यलिन्द्रहारा(श्र?) गर्भागाराद् बहिः क्रमात् ॥
हर्म्यस्यावधिकं यावन्नीयते तावदंशकैः ।
द्वित्रिवेदेषुषड्भागैः प्रागुक्तांशैस्तु वा गृहम् ॥ ६८ ॥
एकार्धेनाथवालिन्द्रं शेषं कुड्येषु योजयेत् ।
केचित् त्रिर्नवभिर्भागैर्वदन्ति द्वादशावनौ ॥ ६९ ॥
षट्कुड्यं पञ्चसालिन्द्रं बहिः कूटादिशोभितम् ।
कूटं कोष्ठं च नीडं च क्षुद्रशालेभतुण्डकम् ॥ ७० ॥

यथाशोभमलङ्कारं तथा युञ्जीत बुद्धिमान्।
युग्महस्तैरयुग्मैर्वा योजयेदेवमिच्छया ॥ ७१ ॥
युग्मांशे द्व्यंशकं वापि कूटव्यासं द्विरायतम्।
शालायाश्चतुरंशैर्वा युग्मे युग्मांशकैर्विदुः ॥ ७२ ॥
नानाभागैरलङ्कारैरन्यैरुक्तं मुनीश्वरैः।
तथा वा तत्र युञ्जीयात् प्राज्ञः शिल्पिषु बुद्धिमान् ॥
तलमेकं भवेद् ग्रासं खण्डहर्म्ये चतुःस्थले।
द्वितलं पञ्चषट्सप्तभूमावेव विधीयते ॥ ७४ ॥
त्रितलं चाष्टभूमे तु नन्दपङ्क्तितले तथा।
पञ्चभौमं चतुर्भौमं द्वादशैकादशे तले ॥ ७५ ॥
मूलतः कूटकोष्ठादीन् यः कर्तुं सम्यगीहते।
तले तले विभागांश्च यथायुक्त्या प्रयोजयेत् ॥ ७६ ॥
कूटकोष्ठादिसर्वाङ्गमुपर्युपरि पूर्ववत्।
कूटकोष्ठकनीडाद्यैर्भेदैराख्या यथोदिता ॥ ७७ ॥
पूर्वं तैर्भेदकैर्युक्तस्याख्या धाम्नस्तथा भवेत्।
आ द्वादशतलादेवं युञ्जीयाद् द्वितलादितः ॥ ७८ ॥
कर्णे मध्ये तयोर्मध्ये कूटं कोष्ठं च पञ्जरम्।
कर्तव्यं मानसूत्रात्तु तेषां निर्गममुच्यते ॥ ७९ ॥
स्वव्यासार्धं तथार्धार्धं दण्डं वा(पि ? द्वि)त्रिदण्डकम्।
अन्तर्विन्यासदेशं तु मानसूत्रं न योजयेत् ॥ ८० ॥
ऋजु सूत्रप्रमाणान्तं तल्लङ्घे विपदां पदम्।
तस्मात् कूटादिसर्वाङ्गं मानसूत्राद् बहिर्नयेत् ॥ ८१ ॥

चतुरश्रं तु वस्वश्रं षोडशाश्रं तु वर्तुलम् ।
मस्तकं स्तूपिकोपेतं कूटं कर्णगतं मतम् ॥ ८२ ॥
मध्यनासिसमोपेतमर्धकोटिसमन्वितम् ।
मुखपट्टिकयोपेतं शक्तिध्वजसमायुतम् ॥ ८३ ॥
अनेकस्थूपिकोपेतं कोष्ठकं मध्यमे भवेत् ।
हस्तिपृष्ठनिभं पृष्ठे शालाकारं मुखे मुखे ॥ ८४ ॥
पञ्जरं विहितं कूटकोष्ठयोरन्तरे बुधैः ।
पार्श्ववक्त्रं तदेवेष्टं हस्तितुण्डं समण्डितम् ॥ ८५ ॥
एष जातिक्रमः प्रोक्तः कर्णकोष्ठसमन्वितः ।
मध्ये कूटं तयोर्मध्ये क्षुद्रकोष्ठादिशोभितम् ॥ ८६ ॥
छन्दमेतत् समुद्दिष्टं कूटं वा कोष्ठकं तु वा ।
अन्तरप्रस्तरोपेतनिम्नं वोन्नतमेव वा ॥ ८७ ॥
विकल्पमिति निर्दिष्टमाभासं तद्विमिश्रितम् ।
क्षुद्राल्पमध्यमोत्कृष्टं हर्म्याणामेवमीरितम् ॥ ८८ ॥
इत्यादिभेदकैर्युक्तं विमानं संपदां पदम् ।
विपरीते विनाशाय भवेदेवेति निश्चयः ॥ ८९ ॥
षडष्टाश्रे च वृत्ते च द्व्यश्रवृत्ते च तत् क्रमात् ।
पञ्चाष्टनवपङ्क्त्यंशे व्यासैकांशेन बाह्यतः ॥ ९० ॥
वर्तयेत् तु तदाकृत्या कोटिच्छेदार्थमीरितम् ।
चतुरश्रस्य नाहेन योजयेत् तु समं यथा ॥ ९१ ॥
तया वर्तनया तेषां मानं संपूर्णमिष्यते ।
मानं धाम्नस्तु संपूर्णे जगत्संपूर्णता भवेत् ॥ ९२ ॥

तस्मात् सर्वप्रयत्नेन कुर्यात् संलक्ष्य बुद्धिमान् ।
एवं संक्षेपतः प्रोक्तं प्रासादानां तु लक्षणम् ॥ ९३ ॥

एकादिद्वादशान्तं ह्युदयविपुलभागं करैस्तारमानं
चोत्सेधं कूटकोष्ठाद्यवयवकरणं नामभेदं क्रमेण ।
प्रोक्तं संक्षिप्य सम्यङ् मुनिभिरवितथैर्ब्रह्मपूर्वैर्यथोक्तं
नानाभेदैर्विमानं प्रियतरमनघं तैतलानां मये(ह?न्) ॥ ९४ ॥

इति मयमते वस्तुशास्त्रे चतुर्भूम्यादिबहुभूमिविधानो नाम
द्वाविंशोऽध्यायः ।

अथ त्रयोविंशोऽध्यायः ।

रक्षार्थं च विमानानां शोभार्थं (च) तथाधुना ।
परिवारनिवेशार्थं प्राकारं प्रोच्यते बुधैः ॥ १ ॥
कृत्वा चतुष्पदं मूलप्रासादस्य तु विस्तृतम् ।
आद्यं सालं महापीठं पदैः षोडशभिर्युतम् ॥ २ ॥
मण्डूकाख्यं द्वितीयं स्यान्मध्यं भद्रमहासनम् ।
चतुर्थं सुप्रतीकान्तं पञ्चमं चेन्द्रकान्तकम् ॥ ३ ॥
एवं युग्मपदैर्युक्तमयुग्मैरथ वक्ष्यते ।
एकमाद्यं विमानं स्यादाद्यं सालं तु पीठकम् ॥ ४ ॥
द्वितीयं स्थण्डिलं सा(म?लं) मध्यं चोभयचण्डितम् ।
सुसंहितं चतुर्थं स्यादीशकान्तं तु पञ्चमम् ॥ ५ ॥
चतुरश्रीकृते तेन मुखायाममि(तो ? हो)र्ध्वतः ।
पादाधिकमथाध्यर्धं पादोनद्विगुणं क्रमात् ॥ ६ ॥
द्विगुणं द्विगुणार्धं च त्रिगुणं वा चतुर्गुणम् ।
मुखायाममिति प्रोक्तं प्राकाराणां विशेषतः ॥७॥

क्षुद्राणामल्पहर्म्याणां स्वव्यासार्धप्रमाणतः ।
अन्तर्मण्डलकं कुर्यात् सत्रिहस्तं तु तत्समम् ॥ ८ ॥
द्वितीयं हि तृतीयं तु तस्मात् पञ्चकराधिकम् ।
तस्मात् ससप्तहस्तं तु तत्समं स्याच्चतुर्थकम् ॥ ९ ॥
नवहस्तसमायुक्तं तत्समं पञ्चमं भवेत् ।
मध्यमानां स्वतारार्धमन्तर्मण्डलमिष्यते ॥ १० ॥
तत्समं पञ्चहस्तेन संयुक्तं स्याद् द्वितीयकम् ।
सप्तहस्ताधिकं तस्मात् सालमुक्तं तृतीयकम् ॥ ११ ॥
नवहस्ताधिकं तस्माच्चतुर्थं सालमीरितम् ।
एकादशकरैर्युक्तं तत्समं पञ्चमं भवेत् ॥ १२ ॥
उत्तमानां स्वतारार्धमाद्यं सालं प्रकीर्तितम् ।
तत्समं सप्तहस्तेन संयुक्तं स्याद् द्वितीयकम् ॥ १३ ॥
नवहस्ताधिकं तस्मात् तृतीयं सालमुच्यते ।
तस्मादेकादशाधिक्यं तत्समं तु चतुर्थकम् ॥ १४ ॥
त्रयोदशकरैर्युक्तं तत्समं पञ्चमं भवेत् ।
एवं क्षुद्राल्पमध्यानामुत्कृष्टानां प्रकीर्तितम् ॥ १५ ॥
एतेन कारयेद् धीमान् पूर्वोक्तेन क्रमेण वा ।
प्राकारं परितस्तस्मान्मुखायामं तु पूर्ववत् ॥ १६ ॥
भित्त्यभ्यन्तरमानेन मानयेन्मानवित्तमः ।
भित्तिमध्येन बाह्येन कैश्चिदुक्तं तु सूरिभिः ॥१७॥
अन्तर्मण्डलभित्तेश्च विष्कम्भं सार्धहस्तकम् ।
तस्मात् त्रित्र्यङ्गुलाधिक्याद् द्विहस्तान्तं यथाक्रमम् ॥

पञ्चानामपि सालानां विष्कम्भं परिगृह्यताम् ।
तत्तद्विष्कम्भमानेन त्रिगुणं वा चतुर्गुणम् ॥ १९ ॥
प्राकारोदयमुद्दिष्टं स्वाष्टांशोनाग्रविस्तरम् ।
उत्तरान्तोचिता वापि कुम्भमण्ड्यान्तकोदयाः ॥ २० ॥
मसूरकादिवर्गाढ्याः खण्डहर्म्याभिमण्डिताः ।
ऋजुभित्तियुता वापि बुद्बुदार्धेन्दुशीर्षकाः ॥ २१ ॥
क्षुद्राल्पानां तु सालानां भित्तिर्हस्तप्रमाणतः ।
सार्धहस्तावधिर्यावत पूर्ववद् वर्धयेत् क्रमात् ॥ २२ ॥
सोत्तरा वाजनच्छत्रशीर्षा(याः ? भाः) सालभित्तयः ।
भित्तिव्याससमोत्तुङ्गं पादार्धाधिकमेव वा ॥ २३ ॥
तदुच्चे रुद्रभागेऽप्यग्निमोक्षोऽक्षिशिवांशकैः ।
उत्त(रे?रं) वाजनाब्जं च क्षेपणं च यथाक्रमम् ॥ २४ ॥
ऋजुभित्तियुतं ह्येतत् खण्डहर्म्याभिमण्डितम् ।
अधिष्ठानादिवर्गाढ्यं निर्गमोद्गमसंयुतम् ॥ २५ ॥
एकद्वित्रितलोपेतं कुर्यादावृतमण्डपम् ।
अभ्यन्तरे बहिश्चात्तु ऋजुभित्तियुता भवेत् ॥ २६ ॥
अधोभूमित्रिभागे तु द्विभागं चोर्ध्वभूमिकम् ।
तत्पादाष्टांशहीनं वा बहिर्भित्त्युन्नतं भवेत् ॥ २७ ॥
मालिकाकृतिरेवं वा महावारयुतं तु वा ।
मानान्तं बाह्यभित्त्युच्चमधो भूमेः स्थलान्तकम् ॥ २८ ॥
मूलसद्मोत्तरान्तं वा प्रस्तरान्तमथापि वा ।
खण्डहर्म्योत्तरान्तं वा शिखरान्तोन्नतं तु वा ॥ २९ ॥

मण्डपं द्वितलं वैकतलं वापि तदावृतम् ।
अधिष्ठानादिवर्गाढ्यं समं वाष्टांशहीनकम् ॥ ३० ॥
त्रिपादं वा विशेषेण सालाधिष्ठानतुङ्गता ।
द्विगुणं चरणोत्तुङ्गं षडष्टांशोनमेव वा ॥ ३१ ॥
उक्षं वा भूतरूपं वा कर्तव्यं सालशीर्षके ।
मूलजन्मतलं हस्तमात्रोच्चं जन्मसालतः ॥ ३२ ॥
प्रतिसालं तु षण्मात्रहीनं स्याच्छेषसालके ।
क्षुद्रे साष्टादशाङ्गुल्यं मध्यमे मूलपादुकम् ॥ ३३ ॥
क्षपयेत्तु चतुर्मात्रैर्यावत् पञ्चान्तसालकम् ।
योजयेद् विधिनानेन स्थपतिस्तत्क्रमेण तु ॥ ३४ ॥
परिवारविमानानां मानं गर्भार्धमिष्यते ।
मूलवस्तुत्रिभागैकं मध्यं वा पादबाह्यकम् ॥ ३५ ॥
त्रिचतुष्पञ्चषट्सप्तहस्तैर्वा हर्म्यविस्तृतम् ।
अष्टौ वा परिवाराः स्युस्तथा द्वादश षोडश ॥ ३६ ॥
द्वात्रिंशत् परिवाराश्च हीष्यन्ते शास्त्रकोविदैः ।
परिवारामरोत्सेधं युक्त्या तत्रैव योजयेत् ॥ ३७ ॥
यदुक्तं सकले बेरे तन्मानं गृह्यतां वरैः ।
सर्वलक्षणसंयुक्तं स्थानकासनमेव वा ॥ ३८ ॥
हीनविमानानामथ परिवाराश्चाष्ट वै प्रोक्ताः ।
प्राकारोऽप्ये(वं?कः) स्यात् पीठपदे चार्यकः स्थाप्यः ॥
ऋषभगणाधिपकमलजमातृगुहार्याच्युताश्च चण्डेशाः ।
उपपीठपदे चान्तर्द्वादश परिवारकाः स्थाप्याः ॥ ४० ॥

वृषकमलजगुहहरयः पूर्ववदुदितास्तथार्यकादिपदे ।
रविगजवदनयमास्ते मातृजलेशौ च दुर्गा च ॥ ४१ ॥
घनदश्चण्डः क्रमशः सूर्यपदादिष्ववामगताः ।
षोडश परिवाराः स्युश्चोग्रे पीठे निधातव्याः ॥ ४२ ॥
अन्तश्चार्यकभागादिषु वृषभाद्यास्तथा प्राग्वत् ।
ईशपदे च जयन्ते भृशभागेऽग्नौ च वितथे च ॥ ४३ ॥
भृङ्गनृपे पितृसुगले शोषे वायौ च मुख्यकेऽप्युदितौ ।
चण्डश्चन्द्रः सूर्यो गजवदनः श्रीः सरस्वती चेति ॥ ४४ ॥
ता मातरश्च शुक्रो जीवो दुर्गा दितिस्तथाप्युदितिः ।
द्वात्रिंशत् परिवाराः स्थण्डिलकाख्ये तु चण्डिते स्थाप्याः ॥
ब्रह्मपदं नवबाह्ये श्रीज्येष्ठोमा सरस्वती चैताः ।
साविन्द्रेन्द्रजयांशे रुद्रजये चापवत्से च ॥ ४६ ॥
आर्यादिषु च पदेषु वृषभाद्याः पूर्ववत् कथिताः ।
ईशे पर्जन्यपदे माहेन्द्रे भानुभागे तु ॥ ४७ ॥
सत्यान्तरिक्षकानलपूषग्रहक्षतार्तिभागे तु ।
गन्धर्वे भृषभागे पितृबोधनपुष्पदन्तवरुणेषु ॥ ४८ ॥
असुरे दक्षसमीरणभागे नागे च भल्लाटे ।
सोमपदे ऋभभागेऽप्युदितौ देवाः क्रमात् स्थाप्याः ॥
ईशशशिनन्दिकेश्वरसुरपतयो वै महाकालः ।
दिनकरवह्निबृहस्पतिगजवदनयमाश्च भिङ्गिरिटिः ॥ ५० ॥
चामुण्डाप्यथ निर्ऋतिश्चागस्त्यो विश्वकर्मा च ।
जलपतिरथ भृगुनामा दक्षः प्रजापतिर्वायुः ॥ ५१ ॥

दुर्गा च वीरभद्रो धनदश्चण्डेश्वरः शुक्रः ।
स्थण्डिलचण्डितभागे पण्डितजनमण्डलैरुदिताः ॥
युग्मायुग्मपदे ते कुड्य(ग)ता वागताश्च पदमध्ये ।
त्रिप्राकारे पञ्चप्राकारेऽप्येवमेव भवेत् ॥ ५३ ॥
अष्टाद्याः परिवारा मध्यान्तर्हारयोरुदिताः ।
प्रत्यगुदिङ्मुखहर्म्ये मित्रे वृषभस्थितिः प्रोक्ता ॥ ५४ ॥
कमलजगुहहर(य)स्ते भूधरभागार्यर्योर्विवस्वति च ।
यन्मुखमीश्वरभवनं तन्मुखमेवोदितं तेषाम् ॥ ५५ ॥
शिष्टा हर्म्याभिमुखाः पूर्वोक्तपदे निधातव्याः ।
प्राक्प्रत्यङ्मुखमुक्षा देवाभिमुखो न वाभिमुखः ॥ ५६ ॥
अवागुत्तरदिशि मुखिनौ चण्डेशेभाननौ च मतौ ।
प्रासादमण्डपसभाशालाकाराणि कार्याणि ॥ ५७ ॥
परिवारविमानानि सर्वाण्यङ्गानि युक्तिवशात् ।
मध्यान्तर्हारयोरेव मालिकापङ्क्तिरिष्यते ॥ ५८ ॥
एकद्वित्रिचतुर्भूमियुक्ता वा पञ्चभूमिके ।
भित्तेरुपरि भित्तिः स्यात् पादः पादोपरि स्मृतः ॥ ५९ ॥
भित्तेरुपरि पादो वा पादोपरि न भित्तिका ।
कूटकोष्ठादियुक्ता वा जलभित्तिरलङ्कृता ॥ ६० ॥
मण्डपाकृतियुक्ता वा शालाकारसभान्विता ।
भक्तिमानं तथा पादायामं संक्षिप्य वक्ष्यते ॥ ६१ ॥
मूलधाम्नस्तूत्तरान्तमुपानाद्युन्नतं क्रमात् ।
सप्तभागैः समं कृत्वा द्व्यंशं मसूरकोन्नतम् ॥ ६२ ॥

पादायामं तु पञ्चांशं पादं सर्वाङ्गसंयुतम् ।
अथवा पादमानं तु नवभागैर्विभाजयेत् ॥ ६३ ॥
अधिष्ठानं द्विभागं स्याच्छेषं पादोदयं भवेत् ।
सार्धद्विहस्तमारभ्य षट्षडङ्गुलवर्धनात् ॥ ६४ ॥
षड्ढस्तान्तं समुत्सेधं स्तम्भं त्रिःपञ्चसङ्ख्यया ।
भित्त्यभ्यन्तरतस्तावदेवं तस्या विशालता ॥ ६५ ॥
भक्त्यायामं च तावत् स्यात् क्षुद्रे महति मन्दिरे ।
षडङ्गुलात् समारभ्य वाङ्गुलाङ्गुलवर्धनात् ॥ ६६ ॥
विंशन्मात्रावधिर्यावत् पादविष्कम्भमिष्यते ।
पादोच्चार्धमधिष्ठानं षडष्टांशोनमेव वा ॥ ६७ ॥
पादोदयत्रिभागैकं चतुर्भागैकमेव वा ।
पादबन्धमधिष्ठानं चारुबन्धमथापि वा ॥ ६८ ॥
पादोनमप्यलङ्कारं प्रस्तरस्याप्यलङ्कृतम् ।
पूर्वोक्तेन प्रकारेण युक्त्या तत्रैव योजयेत् ॥ ६९ ॥
खल्लूरिका मनुष्याणां वासेष्वेवमुदीरिताः ।
प्रथमावरणाद् यावत् त्रिप्राकारान्तमावृतिः ॥ ७० ॥
यथेष्टदिशि हि द्वारं युक्त्या युक्तं नृणां मतम् ।
परिवारविमानानि तत्तदुक्तपदे क्रमात् ॥ ७१ ॥
आर्यात् पूर्वोक्तनीत्या तु प्रासादाभिमुखान्यपि ।
नृत्तमण्डपपीठादि परिवाराद् बहिः पुरः ॥ ७२ ॥
स्नानार्थं मण्डपं वापि नृत्तमण्डपमेव वा ।
परिवारालयान्तर्वा कर्तव्यं स्वप्रमाणतः ॥ ७३ ॥

गर्भगृहार्धेन समौ पीठव्यासोच्छ्रयौ मतौ।
एकद्वित्रिकरव्यासोत्सेधं वा बलिविष्टरम् ॥ ७४ ॥
गोपुरात्तु बहिः पीठं प्रासादार्धेन निर्गमम् ।
तत्समं वा त्रिपादं वा निर्गमं बलिविष्टरम् ॥ ७५ ॥
पञ्चानामपि सालानामारात् पैशाचमग्रतः ।
पैशाचपीठप्रासादमध्ये च बलिविष्टरम् ॥ ७६ ॥
पीठोत्सेधे षोडशभागे भागेन जन्मं स्यात् ।
जगती चतुरंशेन कुर्यात् कुमुदं त्रिभिर्भागैः ॥ ७७ ॥
भागेनोपरि पट्टं कण्ठं कुर्यात् त्रिभागेन ।
एकेनोपरि कम्पं द्व्यशं स्याद् वाजनं चोर्ध्वे ॥ ७८ ॥
तदुपरि वाजनमेकं तद्व्यासार्धं त्रिपादमुपरिदलम् ।
पद्मत्रिभागमूर्ध्वे कर्तव्या कर्णिका मध्ये ॥ ७९ ॥
तस्यार्धं कमलोच्चं वार्धोच्चं कर्णिकायास्तु ।
मध्ये भद्रयुतं वाभद्रं वा सोपपीठं वा ॥ ८० ॥
नानाधिष्ठानानामाकृतयो वा यथा तथाप्युक्ताः ।
एवं पीठालङ्कृतमुदितं प्रवरैः पुरातनैर्मुनिभिः ॥ ८१ ॥
वृषभस्याग्रतः कुर्यात् प्रासादार्धप्रमाणतः ।
ध्वजस्थानं तदग्रे तु तन्नीत्वा त्रिशिखालयम् ॥ ८२ ॥
एते वृषादयः सर्वे चान्तर्वामे तु गोपुरात् ।
मध्यादिसालमाश्रित्य पावके हव्यकोष्ठकम् ॥ ८३ ॥
अग्निगोपुरयोर्मध्ये धनधान्यगृहं भवेत् ।
याम्ये मज्जनशाला स्यात् तत्रस्थं पुष्पमण्डपम् ॥ ८४ ॥

नैर्ऋतिस्थानमाश्रित्य कुर्यादायुधमण्डपम्।
वरुणे वायुदेशे तु शयनस्थानमिष्यते ॥ ८५ ॥
सौम्यायां तु प्रकर्तव्यं धर्मश्रवणमण्डपम्।
ईशे वापी च कूपं स्यादापवत्सपदाश्रितम् ॥ ८६ ॥
ईशगोपुरयोर्मध्ये वाद्यस्थानं प्रकीर्तितम्।
आरादीशे विमानस्य स्थानं चण्डेश्वरस्य वा ॥ ८७ ॥
पूर्वोक्तस्थानदेशे वा कर्तव्यं भवनं बुधैः।
शक्तिस्तम्भं पीठात् पुरतो विद्याद् विमानमानेन ॥ ८८ ॥
क्षुद्राणां द्विगुणोदयमल्पानां तत्समं विद्यात्।
मध्यविमानानामपि तुङ्गार्धं वा त्रिपादोच्चम् ॥ ८९ ॥
उदयत्रिभागमुदितं वार्धं वोत्कृष्टहर्म्याणाम्।
हस्तं षोडशमात्रं द्वादशदशमात्रकं विपुलम् ॥ ९० ॥
मण्डीकुम्भयुतं तत् फलकोऽर्ध्वे भूतमुक्षा वा।
शैलं दारुमयं वा वृत्तं वाष्टाश्रकं द्विरष्टाश्रम् ॥ ९१ ॥
वेशस्थानं वापी कूपारामौ च दीर्घिका चैत्र।
सर्वत्र सम्मतं स्यान्मठभुक्तिनिकेतनं चापि ॥ ९२ ॥
नान्तर्मण्डलमथ वा चान्तर्हारं तथैकसालं चेत्।
अन्तर्हारा मध्यमहारा मर्यादिभित्तिश्च(?) ॥ ९३ ॥
त्रिप्राकारेऽप्युदिताः पञ्चयुताः पञ्चसालाः स्युः।
एषां प्राकाराणामुपरि वृषाः स्युः सपङ्क्तिकाः परितः ॥
शक्तिस्तम्भात् पुरतस्त्रिचतुःपञ्चान्तरालयं नीत्वा।
गणिकागृहमथ पार्श्वद्वये तु साम्बाहिकासहितम् (?) ॥९५॥

प्राकारबहिः परितो वासं परिवारकाणां तु ।
दासीनामपि तद्वत् पुरतो वा वासमुद्दिष्टम् ॥ ९६ ॥

यमदिशि गुरुमठमुदितं पूर्वस्मिन् वाप्यवाग्वदनम् ।
शेषमनुक्तं सर्वं कुर्यात् राजोपचारेण ॥ ९७ ॥

विष्णुधिष्ण्येऽहमद्यापि वक्ष्यामि परिवारकम् ।
प्रमुखे वैनतेयश्च वह्नौ गजमुखालयम् ॥ ९८ ॥

यमे पितामहः सप्त मातरः पितरीरिताः ।
गुहो जलेशे वायव्ये दुर्गा सोमे धनाधिपः ॥ ९९ ॥

सेनापतिरथैशाने पीठादीनां तु पूर्ववत् ।
प्राकारोऽप्येक एवं स्यादुच्यन्ते द्वादशाधुना ॥ १०० ॥

विष्णोरभिमुखं चक्रं गरुडस्तत्प्रदक्षिणे ।
शङ्खो वामे बहिर्वक्त्राश्चैते सकलरूपिणः ॥ १०१ ॥

सूर्याचन्द्रमसौ पार्श्वे गोपुरस्यान्तराननौ ।
वह्नौ पचनगेहं स्याच्छेषं पूर्ववदाचरेत् ॥ १०२ ॥

मध्यान्तर्हारयोरेव परिवारास्तु षोडश ।
मण्डपस्याग्रतः कुर्यात् पक्षिराजं तु पीठकम् ॥ १०३ ॥

लोकेशाः क्रमशः स्थाप्यास्तत्तदंशे शिवं विना ।
आदित्यश्च भृगुश्चैवमश्विनौ च सरस्वती ॥ १०४ ॥

पद्मा च पृथिवी चैव मुनयः सचिवस्तथा ।
द्वारपालकमध्याद्विष्वन्तराले तु कीर्तिताः ॥ १०५ ॥

द्वात्रिंशत्परिवारांश्च युक्त्या तत्रैव योजयेत् ॥ १०५½ ॥

चण्डप्रचण्डरथनेमिसपाञ्चजन्य-
दुर्गागणेशरविचन्द्रमहानुभावाः ।
सर्वेश्वरः सुरपतिश्च तथा दशैते
प्राकारपञ्चमुखगोपुरकल्पनीयाः ॥ १०६ ॥

वृषस्य लक्षणं सम्यक् संक्षिप्येह प्रवक्ष्यते ॥ १०७ ॥

द्वारलिङ्गसमं श्रेष्ठं चतुरंशविहीनकम् ।
मध्यमं त्रिद्विभागोच्चं कन्यसं वृषभोदयम् ॥ १०८ ॥

गर्भार्धं कन्यसं नालीगेहतुल्यं वरोदयम् ।
तदन्तरेऽष्टभागे तु नवमानमुदीरितम् ॥ १०९ ॥

एकादिनवहस्तान्तं कनिष्ठादित्रयं त्रयम् ।
पञ्चाशदंशकं तुङ्गमेकांशमात्रमीरितम् ॥ ११० ॥

पञ्चाष्टाङ्गुलमायामं तन्मानमधुनोच्यते ।
मूर्ध्नस्तु गलपर्यन्तं दशमात्रं ततस्त्वधः ॥ १११ ॥
ग्रीवोच्चमष्टमात्रं स्यादुरोन्तं षोडशाङ्गुलम् ।
ऊरुदैर्घ्यं च षण्मात्रं जानुमात्रं द्विमात्रकम् ॥ ११२ ॥
जङ्घादीर्घं षडङ्गुल्या खुरं कोलकमुच्यते ।
शृङ्गान्तरं द्विमात्रं स्याच्छृङ्गदैर्घ्यं द्विकोलकम् ॥ ११३ ॥
मूलव्यासं त्रिभागेन शृङ्गाग्रं तु द्विमात्रकम् ।
ललाटं नवमात्रं स्यान्मुखव्यासं शराङ्गुलम् ॥ ११४ ॥
उत्सेधं तत्समं नेत्रायामं द्व्यङ्गुलमीरितम् ।
सार्धाङ्गुलं तदुत्सेधं नेत्रमध्यान्मुखायतम् ॥ ११५ ॥

वसुमात्रं ततः पृष्ठं ग्रीवान्तं तु षडङ्गुलम् ।
नेत्रमध्याल्ललाटोच्चं चतुर्मात्रं प्रकीर्तितम ॥ ११६ ॥

नेत्रात् कर्णान्तरं तावत् कर्णायामं शराङ्गुलम् ।
कर्णमूलं द्विमात्रं स्याद् भागं कर्णस्य मध्यमम् ॥ ११७ ॥

अग्रमङ्गुलविस्तारं घनमर्धाङ्गुलं भवेत् ।
घ्राणं सार्धाङ्गुलायाममङ्गुलं गाढविस्तृतम् ॥ ११८ ॥

अङ्गुलं नासिकातुङ्गमास्यं पञ्चाङ्गुलायतम् ।
उत्तरोष्ठं त्रिमात्रोच्चमधरोष्ठं द्विमात्रकम् ॥ ११९ ॥

जिह्वायामविशालोच्चं त्रिद्व्येकाङ्गुलमीरितम् ।
ग्रीवाव्यासं दशाङ्गुल्या मूलं द्वादशमात्रकम् ॥ १२० ॥

मूलेऽग्रे च घनं पृष्ठे ग्रीवस्याष्टषडङ्गुलम् ।
ककुत् षडङ्गुलव्याससमुत्सेधं तु तदर्धकम् ॥ १२१ ॥

ग्रीवस्याग्रविशालं तु द्विमात्रं युक्तितो न्यसेत् ।
ककुदस्तु शरीरोच्चं त्रिःषडङ्गुलमीरितम् ॥ १२२ ॥

द्विःसप्तमात्रकं पृष्ठे व्यासं द्वादशमात्रकम् ।
अपरोरुविशालं तु दशाष्टचतुरङ्गुलम् ॥ १२३ ॥

पञ्चाङ्गुलं तदायामं जानुदेशं द्विमात्रकम् ।
जङ्घादैर्घ्यं शराङ्गुल्या त्र्यङ्गुलं स्याद् विशालकम् ॥ १२४ ॥

खुरोत्सेधं त्रिमात्रं स्यात् पुच्छमूलं तथैव च ।
सार्धाङ्गुलं तु पुच्छाग्रं जङ्घान्तं तस्य लम्बनम् ॥ १२५ ॥

मुष्कायामविशालं तु त्रिद्विमात्रं यथाक्रमम् ।
शेफायामं त्रिमात्रं स्यादुदरादङ्गुलं घनम् ॥ १२६ ॥
ऊरुमूलविशालं तु चतुरङ्गुलमग्रतः ।
जङ्घाग्रे तु द्विमात्रं स्याच्छेषं युक्तिवशान्नयेत् ॥ १२७ ॥
स्थितं वा शयितं वापि यथा योग्यं तथाचरेत् ।
सुधालोहैः (फलै?पैरै)र्द्रव्यैर्यथा योग्यं तथा चरेत् ॥ ४२८ ॥
घनं वाप्यघनं वापि लोहजं युक्तितो नयेत् ।
सकलस्य तु यन्मानं तन्मानं वृषभोदयम् ॥ १२९ ॥
किञ्चिन्न्यूनाधिकं कार्यं सर्वदोषसमुद्भवम् ।
तस्मात् परिहरेद् विद्वान् सर्वलक्षणसंयुतम् ॥ १३० ॥

द्वारलिङ्गसमं वृषभं वरं
मध्यमं चतुरंशविहीनकम् ।
द्वित्रिभागसमोदयमीरितं
कन्यसं त्रिविधं मुनिभिर्वरैः ॥ १३१ ॥

इति मयमते वस्तुशास्त्रे सन्धिकर्मविधानो नाम
त्रयोविंशोऽध्यायः ।

अथ चतुर्विंशोऽध्यायः ।

अधुना गोपुराणां तु लक्षणं वक्ष्यते क्रमात् ।
क्षुद्राल्पमध्यमुख्यानां हर्म्याणां स्वप्रमाणतः ॥ १ ॥
मूलप्रासादविस्तारे सप्ताष्टनवभागिके ।
दशैकादशभागे तु तत्तदेकांशहीनकम् ॥ २ ॥

द्वारशोभादिविस्तारं गोपुरान्तं यथाक्रमम् ।
क्षुद्राल्पयोः समुद्दिष्टं मध्यानां प्रविधीयते ॥ ३ ॥
मूलधाम्नस्तु विस्तारे चतुष्पञ्चषडंशके ।
सप्ताष्टांशे च भागोनं गोपुरान्तं यथाक्रमम् ॥ ४ ॥
द्वारशोभादिविस्तारं पञ्चधा परिकीर्तितम् ।
त्रिभागैकांशमध्यं च द्विभागं स्यात् त्रिभागिके ॥ ५ ॥
चतुर्भागे त्रिभागं तु पञ्चांशे चतुरंशकम् ।
द्वारशोभादिविस्तारं गोपुरान्तं क्रमेण तु ॥ ६ ॥
उत्तमानामिदं प्रोक्तं हस्तैरप्यथ वक्ष्यते ।
द्विहस्तादि द्विरष्टान्तमेकारत्निविवर्धनात् ॥ ७ ॥
एकैकं त्रित्रिधा मानं द्वारशोभादिपञ्चसु ।
त्रिहस्तादेकत्रिंशान्तं द्विद्विहस्तविवर्धनात् ॥ ८ ॥
प्रोक्तं त्रिः पञ्चधा मानं द्वारशोभादिपञ्चके ।
नवहस्तं समारभ्य द्विद्विहस्तविवर्धनात् ॥ ९ ॥
सप्तत्रिंशत्करं यावत् पञ्चपङ्क्तिप्रमाणकम् ।
शोभादिगोपुराणां च विस्तारं परिकीर्तितम् ॥ १० ॥
द्वारशोभा द्वारशाला द्वारप्रासादहर्म्यके ।
गोपुरेण तु पञ्चैते द्वारशोभादिपञ्चसु ॥ ११ ॥
अथवा हस्तमानेन विस्तारं परिगृह्यताम् ।
त्रिपञ्चसप्तनन्दैकादशारत्नैर्विवर्धनात् ॥ १२ ॥
पञ्चमानं द्विरत्निभ्यां पञ्चस्वेकस्य संमतम् ।
पञ्चसप्तत्रिरन्त्येकादशत्रयोदशमानतः ॥ १३ ॥

प्रथमावरणे द्वारशोभाव्यासस्तु पञ्चधा।
त्रिपञ्चाद्यात्त्रयोविंशद् द्वारशालाविशालता ॥ १४ ॥
पञ्चपञ्चकराद् यावत् त्रयस्त्रिंशत्करान्तकम्।
द्वारप्रासादविस्तारं पञ्चधा परिकीर्तितम् ॥ १५ ॥
पञ्चत्रिंशत्कराद् यावत् त्रिचत्वारिंशदन्तकम्।
द्वारहर्म्यस्य विस्तारं पञ्चभेदमथोच्यते ॥ १६ ॥
नवपञ्चकराद् यावत् त्रिपञ्चाशत्करान्तकम्।
पञ्चधा विपुलं प्रोक्तं गोपुरस्य मुनीश्वरैः ॥ १७॥
चक्रवर्तिमहाराजवेश्मन्यप्येवमूह्यताम्।
सार्धं त्रिपादं द्विगुणं त्र्यंशैकद्व्यंशमायतम् ॥ १८॥
शोभादीनां तु पञ्चानां द्वाराणामुदितं ततः।
तेषामेवं क्रमाद् व्यासादुत्सेधं पृथगुच्यते ॥ १९ ॥
सप्तांशे च दशांशं च चतुरंशे षडंशकम्।
सप्तभागे चतुर्भागं त्रित्रिभागे तु पञ्चभिः ॥ २० ॥
द्विगुणं तु यथासंख्यं द्वारायतनतुङ्गता।
गोपुरस्य तु विस्तारं त्रिभागादेकभागिकम् ॥ २१ ॥
चतुर्भागैकभागं च पञ्चभागद्विभागिकम्।
निर्गमं गोपुराणां तु प्राकाराद् भित्तिबाह्यतः॥ २२॥
मूलं सार्धं तु पादोनद्विहस्तं तु द्विहस्तकम्।
तच्चत्षडङ्गुलैर्नन्दमात्रैर्द्वादशमात्रकैः ॥ २३ ॥
वृद्धया पञ्चकरान्तं तु सप्तान्तं तु नवान्तकम्।
द्वारं त्रिःपञ्चधा मानमेकैकं तु पृथक् पृथक् ॥ २४ ॥

क्षुद्रे मध्ये वरे द्वारविस्ताराः परिकीर्तिताः।
तत्तद्वैपुल्यवशतस्तत्तदुत्सेधमुच्यते ॥ २५ ॥
पञ्चांशेभ्यश्च सप्तांशं सप्तांशेभ्यो दशांशकम्।
द्विगुणार्धाधिकं पादाधिकं पञ्चोच्छ्रयाः स्मृताः ॥ २६ ॥
मूलवस्तु निरीक्ष्यैव पादाधिष्ठानतुङ्गता।
चतुष्पञ्चर्तुसप्ताष्टनन्दपङ्क्तीशभानुषु ॥ २७ ॥
भागेष्वेकैकभागोनं स्वाधिष्ठानान्ततुङ्गकम्।
शेषं तदुपपीठं स्यात् पादबन्धं मसूरकम् ॥ २८ ॥
प्रासादस्तम्भमानं वा वसुभागोनमेव वा।
नन्दपङ्क्त्यंशहीनं वा गोपुरस्तम्भतुङ्गकम् ॥ २९ ॥
छेदयेत् तदधिष्ठानं होमान्तं खातपादकम्।
उत्तरान्तं समुत्सेधं तदर्धं द्वारविस्तृतम् ॥ ३० ॥
प्रवेशदक्षिणे गर्भमारूढे भित्तिके भवेत्।
श्रीकरं रतिकान्तं च कान्तविजयमेव च ॥ ३१ ॥
विजयविशालकं चैव विशालालयमेव च।
विप्रतीकान्तं श्रीकान्तं श्रीकेशं च तथा पुनः ॥ ३२ ॥
केशविशालकं स्वस्तिकं दिशास्वस्तिकमेव च।
मर्दलं मात्रकाण्डं च श्रीविशालं चतुर्मुखम् ॥ ३३ ॥
एते पञ्चदश प्रोक्ता गोपुरस्याभिधानकाः।
एकादिपञ्चभूम्यन्तं शोभाद्यल्पप्रमाणकम् ॥ ३४ ॥
द्वितलादि षट्तलान्तं मध्यमक्रममुच्यते।
त्रितला(द्याः ? त्) सप्ततलपर्यन्तं चोत्तममुच्यते ॥ ३५ ॥

सोपपीठमधिष्ठानं पादोच्चमुत्तरान्तकम् ।
शेषं तत्स्थूपिपर्यन्तं भागमानं विधीयते ॥ ३६ ॥
सपादभागमञ्चोच्चं कन्धरोच्चं तदंशकम् ।
सत्रिपादद्विभागं तु शिरःशेषं शिखोदयम् ॥ ३७ ॥
एवमेकतलं प्रोक्तं द्वितले भागमुच्यते ।
उत्तरादिशिखान्तं यन्नवधा विभजेत् समम् ॥ ३८ ॥
सपादभागमञ्चोच्चं द्व्यंशार्धं चरणायतम् ।
भागैकं प्रस्तरोत्सेधमेकांशं कन्धरोदयम् ॥ ३९ ॥
सार्धद्व्यंशं शिरस्तुङ्गं शेषभागशिखोदयम् ।
एवं द्वितलमाख्यातं त्रितले भागमुच्यते ॥ ४० ॥
स्थूप्यन्तमुत्तरान्तं च कृत्वोच्चं द्वादशांशकम् ।
सपादांशं कपोतोच्चं द्व्यंशार्धं चरणायतम् ॥ ४१ ॥
भागैकं प्रस्तरोत्सेधं द्विभागं पाददैर्घ्यकम् ।
त्रिपादं तत्कपोतोच्चमंशं ग्रीवोदयं भवेत् ॥ ४२ ॥
सार्धद्व्यंशं शिरस्तस्माच्छेषं स्थूप्युच्छ्रयं भवेत् ।
एवं त्रितलमाख्यातं चतुर्भौममथोच्यते ॥ ४३ ॥
उत्तरादिशिखान्तं यन्मानमष्टादशांशकम् ।
सत्रिपादांशकं मञ्चं त्रिभागं तलिपायतम् ॥ ४४ ॥
सार्धांशं प्रस्तरोच्चं स्याद् द्व्यंशं स्यात् स्तम्भदैर्घ्यकम् ।
मञ्चमंशं गलं भागं त्रिभागं शिखरोदयम् ॥ ४५ ॥
शेषभागं शिखामानं पञ्चभौममथोच्यते ।
स्थूप्यन्तमुत्तरान्तं च त्रयोविंशतिभागिकम् ॥ ४६ ॥

द्विभागं प्रस्तरोच्चं स्यात् त्र्यंशार्धं चरणायतम् ।
पादोनद्व्यंशकं मञ्चं पादायामं त्रियंशकम् ॥ ४७ ॥
सार्धांशमूर्ध्वमञ्चोच्चं द्व्यंशार्धं पाददैर्घ्यकम् ।
सपादांशं कपोतोच्चं द्व्यंशं स्यात् तलिपायतम् ॥ ४८ ॥
प्रस्तरोच्चं तु भागेन कन्धरं भागमिष्यते ।
द्व्यंशार्धं शिखरोत्सेधं शेषं स्थूप्युच्छ्रयं भवेत् ॥ ४९ ॥
उत्तरादिशिखान्तं स्यादेकोनत्रिंशदंशकम् ।
द्विभागं प्रस्तरोत्सेधं पादोच्चं चतुरंशकैः ॥ ५० ॥
पादोनद्व्यंशकं मञ्चं त्र्यंशार्धं पाददैर्घ्यकम् ।
सत्रिपादांशकं मञ्चं त्रिपादं तलिपायतम् ॥ ५१ ॥
सार्धांशं प्रस्तरोत्सेधं द्व्यंशार्धं पाददैर्घ्यकम् ।
सपादांशं कपोतोच्चमूर्ध्वभागं द्विभागतः ॥ ५२ ॥
प्रस्तरोच्चं तु भागेन कन्धरं तत्समं भवेत् ।
सार्धद्व्यंशं शिरस्तस्माच्छेषभागं शिखोदयम् ॥ ५३ ॥
एवं तु षट्तलं प्रोक्तं सप्तभौममथोच्यते ।
उत्तरादिशिखान्तं यन्मानं षट्त्रिंशदंशकम् ॥ ५४ ॥
मञ्चं साङ्घ्रिद्वयं सार्धवेदांशं पाददैर्घ्यकम् ।
द्विभागं प्रस्तरोत्सेधं पादोच्चं चतुरंशकम् ॥ ५५ ॥
सत्रिपादांशकं मञ्चं त्र्यंशार्धं चरणायतम् ।
पादोनद्व्यंशमञ्चोच्चं त्रिपादं पाददैर्घ्यकम् ॥ ५६ ॥
सार्धांशं प्रस्तरोच्चं तु द्व्यंशार्धं तलिपायतम् ।
सपादभागमञ्चोच्चमूर्ध्वपादं द्विभागिकम् ॥ ५७ ॥

कपोतोच्चं तु भागेन तत्समं कन्धरोदयम् ।
सत्रिपादाश्विनीभागं शिरःशेषं शिखोदयम् ॥ ५८ ॥
एवं भागानि कर्तव्यान्युर्वीसंख्याक्रमेण तु ।
विस्तारे पञ्चभागे तु नालीगेहं त्रियंशकम् ॥ ५९ ॥
शेषं तु भित्तिविष्कम्भमेकभूमेर्विधीयते ।
विस्तारे सप्तभागं स्याद् गर्भगेहं युगांशकम् ॥ ६० ॥
शेषं तु भित्तिविष्कम्भमेकांशं कूटविस्तृतम् ।
कोष्ठकं त्र्यंशकं तारे पञ्चांशं स्यात् तदायते ॥ ६१ ॥
कूटकोष्ठकयोर्मध्ये पञ्जरादिविभूषितम् ।
एवं द्वितलमुद्दिष्टं त्रितलस्य विधीयते ॥ ६२ ॥
विस्तारे नवभागे तु नालीगेहं त्रियंशकम् ।
गृहपिण्ड्यलिन्द्रहारा भागेन परिकल्पयेत् ॥ ६३ ॥
कूटकोष्ठादिसर्वाङ्गं पूर्ववत् परिकल्पयेत् ।
शेषं तु भित्तिविष्कम्भमेकांशं कूटविस्तृतम् ॥ ६४ ॥
शालायामं त्रिभागं स्यात्केकांशं लम्बपञ्जरम् ।
हाराभागमथार्धं स्यादायामे कोष्ठकायतम् ॥ ६५ ॥
पञ्चांशं वा षडंशं वा ऊर्ध्वे सप्तांशविस्तृतम् ।
कूटमंशं द्विभागेन शालायामं द्विभागिकम् ॥ ६६ ॥
हारायां क्षुद्रनीडं तु अर्धभागमिति स्मृतम् ।
शालायामं तु पञ्चांशमायामे प्रविधीयते ॥ ६७ ॥
एवं त्रितलमाख्यातं शेषमूह्यं विचक्षणैः ।
तारे पङ्क्त्यंशके नालीगेहं तत्त्रिभिरंशकैः ॥ ६८ ॥

सार्धांशं भित्तिविष्कम्भमेकभागमलिन्द्रकम् ।
एकांशं खण्डहर्म्यं स्यात् कूटकोष्ठादि पूर्ववत् ॥ ६९ ॥
मुखेऽमुखे महाशाला पञ्चांशं च षडंशकम् ।
सर्वावयवसंयुक्तं चतुर्भौममिदं वरम् ॥ ७० ॥
तारे रुद्रांशके नालीगेहं तत्त्रिभिरंशकैः ।
द्विभागं भित्तिविष्कम्भमेकभागमलिन्द्रकम् ॥ ७१ ॥
एकांशं खण्डहर्म्यं स्याच्छेषं पूर्ववदाचरेत् ।
एवं पञ्चतलं विद्यात् षट्तलं चाधुनोच्यते ॥ ७२ ॥
विपुले द्वादशांशे तु नालीगेहं युगांशकम् ।
द्विभागं भित्तिविष्कम्भमंशेनान्धारकं भवेत् ॥ ७३ ॥
अंशेन खण्डहर्म्यं स्यात् कूटकोष्ठादि पूर्ववत् ।
तारे त्रयोदशांशे तु गर्भगेहं युगांशकम् ॥ ७४ ॥
द्व्यंशार्धं भित्तिविष्कम्भमेकभागमलिन्द्रकम् ।
एकांशं खण्डहर्म्यं स्यात् कूटकोष्ठादि पूर्ववत् ॥ ७५ ॥
मुखेऽमुखे महाशाला षड्भागेन विधीयते ।
पञ्जरैर्हस्तिपृष्ठैश्च पक्षशालादिभिर्युतम् ॥ ७६ ॥
नानामसूरकस्तम्भवेदीजालकतोरणम् ।
एवं सप्ततलं प्रोक्तं गोपुरं सार्वदेशिकम् ॥ ७७ ॥
मूलद्वारस्य विस्तारे पञ्चभागेन हीनकम् ।
चतुर्भागैकहीनं वोपरिष्टाद् द्वारविस्तृतम् ॥ ७८ ॥
उपर्युपरि वेशं च मध्यपादोच्चैर्युतम् ।
गर्भागारे तु सोपानं ह्युपर्युपरि विन्यसेत् ॥ ७९ ॥

चतुष्कर्णे तु सोपानमुपपीठे प्रशस्यते ।
यथायुक्ति यथाशोभं तथा योज्यं विचक्षणैः ॥ ८० ॥
गोपुराणामलङ्कारं प्रत्यकं वक्ष्यतेऽधुना ।
मण्डपाभा यथा द्वारशोभा तत्र प्रकीर्तिता ॥ ८१ ॥
दण्डशाला यथा द्वारशाला तत्र विधीयते ।
प्रासादाकृतिवद् द्वारप्रासादं प्रोच्यते बुधैः ॥ ८२ ॥
मालिकाकृतिवद् द्वारहर्म्यं तु प्रोच्यते बुधैः ।
सशालाकृतिसंस्थानं द्वारगोपुरमिष्यते ॥ ८३ ॥
सर्वेषु गोपुरं कुर्याद् यथायुक्ति विशेषतः ।
श्रीकरस्याप्यलङ्कारं प्रवक्ष्याम्यनुपूर्वशः ॥ ८४ ॥
विस्तारद्विगुणं वापि पादोनद्विगुणायतम् ।
पञ्चसप्तनवांशं तु विस्तारे प्रविधीयते ॥ ८५ ॥
विस्तारांशप्रमाणेन दैर्घ्यभागांश्च कल्पयेत् ।
एकद्वित्रितलोपेतं सर्वावयवसंयुतम् ॥ ८६ ॥
स्वस्तिकाकृतिकं नासी सर्वत्र प्रविधीयते ।
मुखेऽमुखे महानासी वंशनासी द्विपार्श्वयोः ॥ ८७ ॥
शिरःक्रकरकोष्ठं वा युग्मस्थूपिसमायुतम् ।
लुपारोहिशिरो वापि मण्डपाकृतिरेव वा ॥ ८८ ॥
रतिकान्तस्य संस्थानं विस्ताराध्यर्धमायतम् ।
कूटकोष्ठादि सर्वाङ्गं पूर्ववत् परिकल्पयेत् ॥ ८९ ॥
शालाकारशिरस्तस्मिन् षण्णासी मुखपृष्ठयोः ।
सार्धकोटिसमायुक्तं युग्मस्थूपिसमायुतम् ॥ ९० ॥

अन्तः पादोत्तरैर्युक्तं मध्यवेशनसंयुतम्।
कान्तविजयसंस्थानं तारत्रिद्व्यंशमायतम्॥ ९१ ॥
पूर्ववद् भूमिभागं च कूटकोष्ठादि पूर्ववत्।
अन्तः पादोत्तरैर्युक्तं नानाङ्गैः समलङ्कृतम् ॥ ९२ ॥
शिखरे च मुखे पृष्ठे षण्णास्यः पार्श्वयोर्द्वयोः।
सभाकारशिरस्तस्मिन्नयुग्मस्थूपिकान्वितम्॥ ९३ ॥
द्वारशोभात्रयं प्रोक्तं द्वाराङ्गं मुखशोभितम्।
विजयविशालसंस्थानं विस्ताराद्द्विगुणायतम् ॥ ९४ ॥
सपादं वाथ सार्धं वा पादोनद्विगुणायतम्।
सप्तनन्दशिवांशैश्च तलं द्वित्रिचतुष्टयम् ॥ ९५ ॥
सालिन्द्रे त्रिचतुर्भौमौ चतस्रो मुखपट्टिकाः।
मुखे पृष्ठे महानासी सार्धकोटि सभद्रकम्॥ ९६ ॥
पार्श्वयोः पञ्जरैर्युक्तं शालाकारशिरःक्रियम्।
अयुग्मस्थूपिकोपेतं सर्वावयवसंयुतम् ॥ ९७॥
विशालालयसंस्थानं पादोनद्विगुणायतम्।
पूर्ववद् भूमिभागं च कूटकोष्ठाद्यलङ्कृतम् ॥ ९८ ॥
अर्धकोटिसभद्रं स्याद् भद्रनासी मुखेऽमुखे।
चतस्रः पार्श्वयोर्नास्यः शालाशिखरसंयुतम् ॥ ९९ ॥
अयुग्मस्थूपिकोपेतं शेषं पूर्ववदाचरेत्।
विप्रतीकान्तसंस्थानं त्र्यंशे द्व्यंशाधिकायतम् ॥ १०० ॥
कूटकोष्ठादि सर्वाङ्गं पूर्ववत् परिकल्पयेत्।
पूर्ववद् भूमिभागं च चतुर्दिग्गतभद्रकम् ॥ १०१ ॥

चतस्रः शिखरे नास्यः शिरो भद्रसमन्वितम्।
अन्तःपादोत्तरैर्युक्तमयुग्मस्थूपिकान्वितम्॥ १०२॥
द्वारशालात्रयं प्रोक्तं सर्वाङ्गं परिमण्डितम्।
श्रीकान्तस्य च संस्थानं विस्ताराध्यर्धमायतम्॥ १०३॥
नन्दपङ्क्तिशिवांशैश्च त्रिचतुष्पञ्चभूमयः।
अन्तःपादोत्तरैर्युक्तमन्धाराद्यैरलङ्कृतम्॥ १०४॥
द्वारस्योर्ध्वेऽन्तरे रङ्गं परिभद्रसमन्वितम्।
मुखेऽमुखे महानासी शालाकारशिरो भवेत्॥ १०५॥
अर्धकोटिसमायुक्तं चतुष्पञ्जरशोभितम्।
श्रीकेशस्य तु संस्थानं तारत्रिभागमायतम्॥ १०६॥
पूर्ववद् भूमिभागं च द्वारे निर्गमकुट्टिमम्।
सान्धारं कूटकोष्ठादिसर्वावयवसंयुतम्॥ १०७॥
नानामसूरकस्तम्भवेदिकाद्यैरलङ्कृतम्।
अन्तःपादोत्तरैर्युक्तं मध्ये वारणशोभितम्॥ १०८॥
मुखेऽमुखे महानासी शालाकारशिरःक्रियम्।
पार्श्वयोर्वेदिनास्यः स्युः सर्वावयवशोभितम्॥ १०९॥
स्वस्तिकाकृतिवन्नासी सर्वत्र परिशोभिता।
नन्द्यावर्तगवाक्षादिजालकाद्यैर्विचित्रितम्॥ ११०॥
केशविशालसंस्थानं विस्ताराध्यर्धमायतम्।
पूर्ववद् भूमिभागं च मध्यवारणशोभितम्॥ १११॥
कूटकोष्ठाद्यलङ्कारं पूर्ववत् परिकल्पयेत्।
मुखे पृष्ठे द्विपार्श्वे तु महानासीचतुष्टयम्॥ ११२॥

सभाकारशिरस्तस्य मुखे पृष्ठे द्विपार्श्वयोः ।
अयुग्मस्थूपिकायुक्तं द्वारप्रासादकत्रयम् ॥ ११३ ॥
स्वस्तिकस्य तु संस्थानं विस्तारद्विगुणायतम् ।
पङ्क्तिरुद्रार्कभागैस्तु वेदपञ्चर्तुभूमयः ॥ ११४ ॥
अन्तः पादोत्तरैर्युक्तं भूमिभागं च पूर्ववत् ।
कूटकोष्ठादिसर्वाङ्गैरन्धाराद्यैरलङ्कृतम् ॥ ११५ ॥
सभाशिखरसंयुक्तं स्वस्तिकाकृतिनासियुक् ।
अष्टनासि सभाग्रे तु अयुग्मस्थूपिकान्वितम् ॥ ११६ ॥
दिशास्वस्तिकसंस्थानं विस्तारद्विगुणायतम् ।
पूर्ववद् भूमिभागं च कूटकोष्ठाद्यलङ्कृतम् ॥ ११७ ॥
अन्धार्यन्धाग्द्वाराङ्गं खण्डहर्म्याभिमण्डितम् ।
मुखेऽमुखेऽतिभद्रांशं शिरश्चायतमण्डलम् ॥ ११८ ॥
महानासिचतुर्युक्तं चतुष्पञ्जरशोभितम् ।
अन्तःपादोत्तरैर्युक्तं सर्वावयवसंयुतम् ॥ ११९ ॥
अनुक्तं पूर्ववत् सर्वमयुग्मस्थूपिकान्वितम् ।
षड्दलस्य तु संस्थानं विस्तारद्विगुणायतम् ॥ १२० ॥
पूर्ववद् भूमिभागं च कूटकोष्ठाद्यलङ्कृतम् ।
पुरे पृष्ठे सभाग्रं स्याद् विस्तारत्र्यंशनिर्गमम् ॥ १२१ ॥
शालाकारशिरोयुक्तं क्षुद्रनासीविभूषितम् ।
मुखे पृष्ठे महानासी चतुष्पञ्जरशोभितम् ॥ १२२ ॥
अन्तः पादोत्तरैर्युक्तं द्वारहर्म्यं त्रिधोदितम् ।
मात्राकाण्डस्य संस्थानं विस्तारद्विगुणायतम् ॥ १२३

रुद्रार्कत्रयोदशांशैः पञ्चषट्सप्तभूमयः।
पूर्ववद् भूमिभागं च कूटकोष्ठादि पूर्ववत् ॥ १२४ ॥
अन्तः पादोत्तरैर्युक्तं चतुर्दिग्गतभद्रकम्।
गृहपिण्ड्यलिन्द्रहाराभिर्मण्डितं खण्डहर्म्यवत् ॥ १२५ ॥
शालाकारशिरः कुर्यान्महानासी मुखेऽमुखे।
पार्श्वयोः क्षुद्रनास्यश्च यथायुक्त्या प्रयोजयेत् ॥ १२६ ॥
श्रीविशालस्य संस्थानं पञ्चांशे द्व्यंशमायतम्।
पूर्ववद् भूमिभागं च मूलतः ककरीकृतम् ॥ १२७ ॥
शिरः ककरकोष्ठं च सभा वा तत्र शीर्षकम्।
नानामसूरकस्तम्भवेदिकाद्यैरलङ्कृतम् ॥ १२८ ॥
चतुर्दिक्षु महानासी क्षुद्रनासीविभूषिता।
स्वस्तिकाकृतिवन्नास्यः सर्वत्र परिकल्पयेत् ॥ १२९ ॥
चतुर्मुखस्य संस्थानं चतुर्भागाधिकायतम्।
पूर्ववद् भूमिभागं च दिशाभद्रकसंयुतम् ॥ १३० ॥
हारामध्ये तु कर्तव्यं कुड्यकुम्भलतान्वितम्।
तोरणैर्जालकैर्वृत्तस्फुटिताद्यैरलङ्कृतम् ॥ १३१ ॥
कूटैर्नीडैस्तथा कोष्ठैः क्षुद्रकोष्ठैर्विभूषितम्।
गृहपिण्ड्यलिन्द्रहाराभिर्मण्डितं खण्डहर्म्यवत् ॥ १३२ ॥
सभाशिरस्तु वा शालाकारं वा शीर्षकं तु तत्।
चतुर्नासिसमायुक्तं पार्श्वे द्वे द्वे तु नासिके ॥ १३३ ॥
उपर्युपरिकूटाद्यैः सर्वाङ्गैः समलङ्कृतम्।
अन्तः सोपानसंयुक्तं द्वारगोपुरकं त्रिधा ॥ १३४ ॥

वर्षस्थलसमोपेतं निर्वारितलकं तु वा।
घनाघनाङ्गयुक्तानि श्रीकरादीनि युक्तितः॥ १३५ ॥

नानाविधस्तम्भमसूरकाणि
नानाविधाङ्गानि सलक्षणानि।
नानोपपीठानि समण्डकानि(?)
भद्राण्यभद्राणि घनाघनानि ॥ १३६ ॥

एकादिसप्तान्ततलानि युक्त्या
शोभादिपञ्चादशगोपुराणि।
शालासभामण्डपशीर्षकाणि
प्रोक्तानि सद्मन्यमरेश्वराणाम् ॥ १३७ ॥

इति मयमते वस्तुशास्त्रे गोपुरविधानं नाम
चतुर्विंशोऽध्यायः।

अथ पञ्चविंशोऽध्यायः।

देवानां द्विजभूमीशवैश्यानां शूद्रजन्मनाम्।
तत्तद्योग्यं यथायुक्त्या मण्डपं प्रविधीयते ॥ १ ॥
प्रासादाभिमुखे पुण्यक्षेत्रे वारामके शुभे।
ग्रामादिवस्तुमध्ये च चतुर्दिक्षु विदिक्ष्वपि॥ २ ॥
बाह्याभ्यन्तरतो वापि गृहाणां मध्यमे मुखे।
वासार्थमण्डपं चैव यागमण्डपमेव च ॥ ३ ॥
अभिषेकादियोग्यं च नृत्तमण्डपकं तथा।
वैवाहिकं च मैत्रं च तथोपनयनार्हकम्॥ ४॥

आस्थानमण्डपं चैव बलालोकनमण्डपम् ।
सन्धिकार्योर्हकं क्षौरं भुक्तिकर्मसुखान्वितम् ॥ ५ ॥
तेषां क्रमेण नामानि वक्ष्यन्ते विधिनाधुना ।
मेरुकं विजयं सिद्धं पद्मकं भद्रकं शिवम् ॥ ६ ॥
वेदं चालङ्कृतं दर्भं कौशिकं कुलधारिणम् ।
सुखाङ्गं सौख्यकं गर्भं माल्यं माल्याद्भुतं तथा ॥ ७ ॥
देवद्विजनरेन्द्राणां द्विरष्टचतुरश्रकम् ।
धनं सुभूषणाख्यं चाप्याह्ल्यं सुगकं तथा ॥ ८ ॥
कोणं च खर्वटं चैव श्रीरूपाख्यं च मङ्गलम् ।
एतान्यष्टौ सुरादीनां नृपाणामायताश्रकम् ॥ ९ ॥
मार्गं सौभद्रकं चैव सुन्दराख्यं तु मण्डपम् ।
साधारणं च सौख्यं च तथैवेश्वरकान्तकम् ॥ १० ॥
श्रीभद्रं सर्वतोभद्रमित्यष्टौ वैश्यशूद्रयोः ।
भक्तिमानं तथा पादायामं पादविशालकम् ॥ ११ ॥
अधिष्ठानं तदाधारं प्रपां मध्यमरङ्गकम् ।
अलङ्कारं क्रमाद् वक्ष्ये स्तम्भपक्षं तदाकृतम् ॥ १२ ॥
सार्धहस्तं समारभ्य षट्षडङ्गुलवर्धनात् ।
पञ्चहस्तावधिर्यावत् त्रिः पञ्चैवाङ्घ्रिकान्तकम् ॥ १३ ॥
अथ विस्तारभक्त्यैषामायामं प्रविधास्यते ।
एकद्वित्रिचतुष्पञ्चभागे भक्त्यन्तरे कृते ॥ १४ ॥
एकभागेन वृद्धिः स्यादायामं स्वविशालतः ।
(अथ) स्वभक्तिविस्तृतात् त्रिमात्रवृद्ध्या करान्ततः ॥ १५ ॥

आयाममष्टधा प्रोक्तं तेन मानेन योजयेत् ।
सायतं चापि तत् सर्वं तन्नाम्नैव प्रपद्यते ॥ १६ ॥
सार्धद्विहस्तमारभ्य षट्षडङ्गुलवर्धनात् ।
अष्टहस्तान्तमङ्घ्र्युच्चं त्रयोविंशत्प्रमाणकम् ॥ १७ ॥
त्रिश्र्यङ्गुलविवृद्ध्या वा स्तम्भोत्सेधाः प्रकीर्तिताः ।
अष्टाङ्गुलं समारभ्यैवार्धार्धाङ्गुलवर्धनात् ॥ १८ ॥
नन्दपङ्क्त्यङ्गुलं यावत् संख्यया पूर्ववत् ततिः ।
पादोच्चैरपि रुद्रांशधर्मनन्दाष्टभाजिते ॥ १९ ॥
मूलतारं तु भागेन तत्तद्भागोनमग्रतः ।
पादोच्चार्धमधिष्ठानं सामान्यं सर्ववस्तुषु ॥ २० ॥
पादोच्चे पञ्चभागे तु द्विभागोच्चं तु वा तलम् ।
स्तम्भोत्सेधत्रिभागैकं वा मसूरकतुङ्गकम् ॥ २१ ॥
सोपपीठमधिष्ठानं केवलं वा मसूरकम् ।
अधिष्ठानसमोच्चं वा द्विगुणं त्रिगुणं तु वा ॥ २२ ॥
उपपीठविधाने तु यदुक्तं तेन वोन्नतम् ।
उपपीठसमुत्सेधं यथायुक्ति यथारुचि ॥ २३ ॥
उपपीठतलस्तम्भप्रस्तरालङ्कृतिक्रमम् ।
प्राग्वदेत्र समुद्दिष्टं शेषं युक्त्या समाचरेत् ॥ २४ ॥
अधिष्ठानोपरिस्तम्भं प्रस्तरं च त्रिवर्गकम् ।
कपोतप्रतिसंयुक्तं यत् तन्मण्डपमिष्यते ॥ २५ ॥
मण्डं सुभूषणं तं पातीति मण्डपमिष्यते ।
सामान्यं सर्ववर्णानां प्रपारूपं वदाम्यहम् ॥ २६ ॥

प्रपारूपाङ्गपादान्ते चोत्तरादूर्ध्ववंशकम् ।
प्राग्वंशमनुवंशं च नालिकेरदलादिभिः ॥ २७ ॥
अन्यैरपि तथा पत्रैर्द्रव्यैः प्रच्छादिता प्रपा ।
प्राग्वदेवाङ्घ्रिकायामं चतुःषडष्टदशाङ्गुलम् ॥ २८ ॥
पादविष्कम्भमेतेषां प्रमाणं सारदारुजम् ।
त्वक्सारं च यथालाभं तथा तत्र प्रयोजयेत् ॥ २९ ॥
पादोच्चे पङ्क्तिनन्दाष्टसप्तषट्पञ्चभागिके ।
वेदिकोच्चं तु भागेन मध्ये रङ्गं प्रयोजयेत् ॥ ३० ॥
स्तम्भोत्सेधचतुर्भागे भागेनैव मसूरकम् ।
द्विभागं तलिपायामं भागेन प्रस्तरं भवेत् ॥ ३१ ॥
युग्मायुग्मद्विभक्त्यैकभक्त्या वा तद्विशालकम् ।
अष्टस्तम्भसमायुक्तं चतुःस्तम्भान्वितं तु वा ॥ ३२ ॥
प्रपादीनां तु संस्थानं यथा वा रङ्गमीरितम् ।
सर्वावयवसंयुक्तं मिश्रद्रव्यसमन्वितम् ॥ ३३ ॥
शालासभाप्रपाणां तु मण्डपानां तु मध्यमे ।
प्रतिष्ठितचतुःस्थानं त्रिमानं रङ्गमिष्यते ॥ ३४ ॥
मण्डपोपरिभूमस्तु मालिकामण्डपं भवेत् ।
मण्डपोर्ध्वे सशिखरं द्वितलं यदि सम्भवम् ॥ ३५ ॥
मध्यस्थभूमिदेशत्वात् प्रतिमध्यं तदुच्यते ।
मेरुजं चतुरश्रं स्याच्चतुष्पादेकभक्तिकम् ॥ ३६ ॥
नासिकाष्टकसंयुक्तं ब्रह्मासनमिति स्मृतम् ।
द्विभक्तिचतुरश्रं तु विजयं नाम मण्डपम् ॥ ३७ ॥

अष्टपादसमायुक्तमष्टनास्या विभूषितम् ।
अधिष्ठानादिवर्गाढ्यं त्यक्तमध्यस्थपादकम् ॥ ३८ ॥
नवपादसमायुक्ता प्रपा कल्याणकारिता ।
त्रिभक्ति चतुरश्रं तु षोडशस्तम्भसंयुतम् ॥ ३९ ॥
नासिकाभिर्द्विरष्टाभिर्युक्तं मध्येऽङ्कणान्वितम् ।
मध्योर्ध्वकूटयुक्तं वा चतुर्द्वारसमन्वितम् ॥ ४० ॥
चतुर्दिक्षु बहिर्द्वारे चतुस्तोरणभूषितम् ।
यागादिकर्मयोग्यं स्याद् देवद्विजमहीभृताम् ॥ ४१ ॥
नाम्ना सिद्धमिति प्रोक्तं सर्वकर्मसु पूजितम् ॥ ४१३ ॥

कृत्वैकाशीतिभागान् निशितविपुलधीर्मण्डपाभ्यन्तरं त-
न्मध्ये वेदी नवांशा भवति हि परितस्त्रीणि भागानि मध्ये ।
अश्रं योन्यर्धचन्द्रं गुणभुजमपरं वै सुवृत्तं षडश्रं
पद्मं वस्वश्रकुण्डं सुरपतिभवनादिक्रमेणैव कुर्यात् ॥ ४२३ ॥

हस्तविस्तृतनिखातवच्चतु-
ष्कोटिकं दिशि दिशि त्रिसूत्रकम् ।
सत्रिमेखलमथ द्विकं तु वा
धातुभूतगुणमात्रकोन्नतम् ॥ ४३३ ॥
व्यासमध्यनलपक्षमात्रकै-
र्योनिमूर्ध्वत इभोष्ठवत् कुरु ।
तारदैर्घ्यकसमुद्गमं चतुः-
षण्मनोङ्गुलिभिरग्निसंमुखम् ॥ ४४३ ॥
वेदबन्धनयनाङ्गुलोन्नत-
व्यासमेखलयुतं तु वा पुनः ।

तालगाढमथवैकमेखलं
सर्वकुण्डकमकर्णयोनिकम् ॥ ४५३ ॥

वृत्तसन्निभमथो तदाकृतिं
वा युगेषुरसमात्रवैपुलम् ।
व्यासवेदगुणभागतुङ्गकं
नाभिमब्जमिव कुण्डमध्यमे ॥ ४६३ ॥

न्यस्यैकांशं पञ्चभागे पुरस्तात्
कोणस्यार्धार्धं गृहीत्वा ततस्तत् ।
कोणं यावद् भ्रामयेत् तद्वदन्यद्
योन्याकारं स्याद् द्विसूत्रप्रयोगात् ॥ ४७३ ॥

व्यासे धर्मांशेंऽशमूर्ध्वादधस्ता-
न्नीत्वैव ज्यासूत्रकं पातयित्वा ।
तन्मानेन भ्रामयेदर्धचन्द्रं
कुण्डं युक्त्या वस्तुविद्याविधिज्ञैः ॥ ४८३ ॥

क्षेत्रव्यासे षट्कृते चाष्टभागे
मानेनानेन त्रिसूत्रं न्यसोद्धि ।
त्र्यश्रं प्रोक्तं द्विर्नवांशेंऽशकं तद्-
बाह्ये न्यस्य भ्रामयेद् वृत्तकुण्डम् ॥ ४९३ ॥

व्यासे बुद्ध्यंशेंऽशकं पार्श्वयोस्तद्-
बाह्ये न्यस्यानेन मानेन दद्यात् ।
मत्स्यं कृत्वा युग्मयुग्मं द्विपार्श्वात्
षट्कोणं स्यात् पातयेत् सूत्रषट्कम् ॥ ५०३ ॥

वृत्तं कृत्वा पूर्ववत् तस्य मध्ये
वृत्तं भ्राम्यं यत्र यन्मध्यतस्तत् ।
पद्मस्याकारं यथा कर्णिकादीन्
कुर्याद् विद्वान् पद्मकुण्डं क्रमेण ॥ ५१ ॥

क्षेत्रव्यासे षट्चतुर्भागिकेऽस्मिन्
भागं बाह्ये न्यस्य सूत्रं समन्तात् ।
कोणस्यार्धं कोणकाभ्यां तु लेख्यं
ह्यष्टाश्रं स्यादष्टसूत्रप्रयोगात् ॥ ५२ ॥

तारे पङ्क्त्यंशेंऽशकं न्यस्य बाह्ये
वृत्तं भ्राम्यं क्षेत्रकेऽष्टाष्टभागे ।
सैकैर्वेदाष्टांशकैः पट्टदैर्घ्यं
सप्ताश्रं स्यात् सप्तसूत्रप्रयोगात् ॥ ५३ ॥

व्यासे सप्तांशेंऽशकं न्यस्य बाह्ये
वृत्तं भ्राम्यं क्षेत्रतारे युगांशे ।
पट्टायामं त्रिप्रभागैरनेन
पञ्चाश्रं स्यात् पञ्चसूत्रप्रयोगात् ॥ ५४ ॥

तत्तद्रूयोपात्तभागेषु तत्तद्-
भागं कृत्वा प्रागिवैकैकभागे ।
न्यूनाधिक्येनाश्रनाहस्य तुल्यं
युक्त्या धीमान् योजयेत् सर्वकुण्डम् ॥ ५५ ॥

भूते साङ्घ्रित्रिबीजं मुनिषु च नयनं षोडशेष्वंशयुक्तं
सत्र्यङ्घ्र्येकं नवांशे शिवपदविहिते सार्धकं सैकहानौ ।

साङ्घ्र्येकं बीजमेवोदितमथ तिथिके षोडशांशैकहीनं
सप्ताधिक्ये दशांशे नवदशपदकेऽष्टांशहीनं क्रमेण ॥५६३॥
तदेव धाम्नामग्रे तु कर्तव्यं चेन्मसूरकम् ॥ ५७ ॥
स्तम्भप्रस्तरवर्गं च प्रासादाङ्गसमं मतम् ।
एकद्विद्वारयुक्तं वा कुड्यं कुम्भलतान्वितम् ॥ ५८ ॥
एकद्वित्रिगुणस्तम्भव्यासं मध्ये तु भद्रकम् ।
तोरणाढ्यं (गुहो?सुरो)पेतसर्वावयवशोभितम् ॥ ५९ ॥
धाम्नस्तु भित्तिविष्कम्भसमं वार्धार्धहीनकम् ।
त्रिभागैकविहीनं तद्भित्तिविष्कम्भमिष्यते ॥ ६० ॥
सान्तरालं सवेशं च सर्वेषां सद्मनां मुखे ।
चतुरश्रं चतुर्भक्त्या चतुर्द्वारसमन्वितम् ॥ ६१ ॥
मुखेऽमुखे द्विभक्त्यैकभक्त्या विस्तारनिर्गमम् ।
मध्यमस्तम्भकं त्यक्त्वैवोर्ध्वकूटं द्विभक्तिकम् ॥ ६२ ॥
षट्त्रिंशत्पादसंयुक्तं चतुस्सप्तालपनासिकम् ।
सोपानं स्याच्चतुर्दिक्षु लाङ्गलाकारभित्तिकम् ॥ ६३ ॥
पञ्जरैरष्टभिर्युक्तं पद्मकं पद्मभद्रकम् ।
स्नानार्थं तैतिलानां तु प्रासादाभिमुखे मतम् ॥ ६४ ॥
तदेवैकाननोपेतं मध्याङ्गणसमन्वितम् ।
यागादिकर्मयोग्यं स्यादिष्टतो दिशि वारणम् ॥ ६५ ॥
भद्रकं पञ्चभागेन चतुरश्रसमाकृति ।
मध्ये कूटं त्रिभागेन परितोंऽशेन मण्डपम् ॥ ६६ ॥

द्वात्रिंशत्पादसंयुक्तं चतुर्विंशतिनासिकम् ।
पञ्जरैरष्टभिर्युक्तं कुड्यं कुम्भलतान्वितम् ॥ ६७ ॥
चतुर्दिक्षु चतुर्द्वारं कर्णे लाङ्गलभित्तिकम् ।
मध्यमेऽङ्गणयुक्तं वा त्रिभक्त्या विस्तृताङ्घ्रिकम् ॥ ६८ ॥
धाम्नः स्थलसमं तस्य पङ्क्त्यष्टांशोनमेव वा ।
नृत्तमण्डपमेतत् स्यात् स्नानार्थं वा तदेव हि ॥ ६९ ॥
षड्भक्ति चतुरश्राभं मध्येऽष्टस्तम्भकूटकम् ।
द्विभक्तिविस्तृतं चैकभक्त्या निष्क्रान्तवक्रकम् ॥ ७० ॥
षट्षष्ट्यङ्घ्रिसमायुक्तं त्यक्तमध्यस्थपादकम् ।
चतुर्विंशतिनास्यङ्गं सर्वालङ्कारसंयुतम् ॥ ७१ ॥
शिवाख्यं मण्डपं सर्ववासे योग्यं सनातनम् ।
सप्तांशचतुरश्राभं षष्ट्यङ्घ्रिकसमायुतम् ॥ ७२ ॥
नवभागेन तन्मध्ये कूटं वा मण्डिताङ्गणम् ।
सद्वात्रिंशतिनास्यङ्गं चतुर्दिशि सवारणम् ॥ ७३ ॥
त्रिभागैकांशविस्तारनिर्गमं मुखभद्रकम् ।
मध्यरङ्गसमोपेतमिष्टदिग्गतभित्तिकम् ॥ ७४ ॥
आस्थानमण्डपं चैतत् तैतिलानां महीभृताम् ।
अभिषेकादिकार्येषु योग्यं त्वेदमिति स्मृतम् ॥ ७५ ॥
अष्टभक्त्या युगाश्रं स्यादशीतिपादसंयुतम् ।
चतुर्भागोर्ध्वकूटं तु द्विभागेन तु भद्रकम् ॥ ७६ ॥
चतुर्दिशि चतुर्द्वारं पार्श्वे सोपानसंयुतम् ।
सर्वालङ्कारसंयुक्तमलङ्कृतमिति स्मृतम् ॥ ७७ ॥

तदेव जलपादं तु ब्रह्मस्थलमितीष्यते ।
परितो वारमेकांशं द्व्यंशेनावृतमण्डपम् ॥ ७८ ॥
पूर्ववन्मुखभद्रं स्यादिष्टदिग्गतभद्रकम् ।
ब्रह्मस्थाने विधातव्यं ग्रामादीनां सनातनम् ॥ ७९ ॥
नवभक्तियुतं सम्यक् पङ्क्तिपङ्क्त्यङ्घ्रिकान्वितम् ।
त्र्यंशैकविस्तृतं भद्रं चतुर्द्वारसमन्वितम् ॥ ८० ॥
सोपानं प्रमुखे तस्य कर्णे लाङ्गलभित्तिकम् ।
नवरङ्गैरलङ्कुर्यात् षडष्टैवाल्पनासिकम् ॥ ८१ ॥
नवब्रह्म सुपूज्यं तद् ग्रामवेश्मादिमध्यगम् ।
सर्वालङ्कारसंयुक्तं दर्पाख्यं तन्मनोहरम् ॥ ८२ ॥
दशांशाचतुरश्राभं सद्वादशशताङ्घ्रिकम् ।
नवकूटसमायुक्तमेकैकांशान्तरालकम् ॥ ८३ ॥
एतत् कौशिकमित्युक्तं चतुरश्रं तु जातिकम् ।
नन्दमेकानने भद्रं द्विमुखं भद्रकौशिकम् ॥ ८४ ॥
त्रिमुखं जयकोशं स्यात् पूर्णकोशं चतुर्मुखम् ।
अधिष्ठानाङ्घ्रिवत् कर्णे लाङ्गलाकारभित्तिकम् ॥ ८५ ॥
सर्वालङ्कारसंयुक्तं षडष्टैवाल्पनासिकम् ।
एकादशविभागेन समं तु चतुरश्रकम् ॥ ८६ ॥
परितो मण्डपं तस्य बाह्ये भागेन कारयेत् ।
चतुष्कर्णे द्विभागेन चतुष्कूटसमन्वितम् ॥ ८७ ॥
चतुर्दिग्द्वित्रिभक्त्या तु विपुलायतकोष्ठकम् ।
त्रिभक्तिचतुरश्रं तु मध्यरङ्ग्यूर्ध्वकूटकम् ॥ ८८ ॥

कूटशालान्तरे तस्य ऋकरीकृतमार्गकम् ।
जात्यादिमुखभद्राङ्गं सर्वावयवशोभितम् ॥ ८९ ॥
ऊर्ध्वे सभाङ्गिनि प्राङ्गं प्रस्तरं नवबोधकम् ।
विवृतं संवृतं वापि गुह्यागुह्यार्थमाचरेत् ॥ ९० ॥
कुलधारणमित्युक्तं समं तु चतुरश्रकम् ।
भागैर्द्वादशभिर्युक्तं समं तु चतुरश्रकम् । ९१ ॥
अष्टदिक्षु च मध्ये तु द्विभक्त्यैवोर्ध्वकूटकम् ।
तत्तद्बाह्ये तु भागेन परितोऽलिन्द्रमिष्यते ॥ ९२ ॥
अङ्गणं वा सभास्थानं कर्णे लाङ्गलभित्ति(के?कम्) ।
चतुर्थ्यंशेन विस्तारं निर्गमं स्याच्चतुर्दिशि ॥ ९३ ॥
पार्श्वे सोपानसंयुक्तं पञ्जरैरष्टभिर्युतम् ।
षष्ट्युत्तरशतस्तम्भमाद्यङ्गे प्रविधीयते ॥ ९४ ॥
युक्त्या नास्यङ्गसंयुक्तं सुखाङ्गं नाम मण्डपम् ।
सौख्यं त्रयोदशांशेन चतुरश्रसमाकृति ॥ ९५ ॥
परितो मण्डपं द्व्यंशं भागेन ऋकरीपथम् ।
त्रिभागं मध्यरङ्गयूर्ध्वकूटं सस्थूपिनिप्रकम् ॥ ९६ ॥
चतुष्कर्णे द्विभागेन त्यक्तमध्याङ्घ्रिकूटकम् ।
दिक्षु द्वित्र्यंशविस्तारायामं कोष्ठचतुष्टयम् ॥ ९७ ॥
नन्दादिमुखभद्राङ्गमिष्टदिग्गतकुड्यकम् ।
चतुरशीतिभिर्युक्तशतस्तम्भसमन्वितम् ॥ ९८ ॥
सर्वालङ्कारसंयुक्तं देवद्विजमहीभृताम् ।
द्विःसप्तभित्तिविस्तारं समं तु चतुरश्रकम् ॥ ९९ ॥

द्विभक्त्या गर्भकूटं स्यादेकांशालिन्द्रमावृतम् ।
एकांशमन्तरालं स्यादप्रच्छन्नतलान्वितम् ॥ १०० ॥
चतुष्कर्णे द्विभक्त्यैवमङ्गणं वोर्ध्वकूटकम् ।
द्विचतुर्विस्तृतायामं कोष्ठं वाङ्गणकं दिशि ॥ १०१ ॥
तेषां बाह्ये तु भागेन परितोऽलिन्द्रमिष्यते ।
इष्टदिक्कुड्यसंयुक्तमिष्टदिग्भद्रसंयुतम् ॥ १०२ ॥
साष्टद्विशतपादं स्यादाद्यङ्गे तु विधीयते ।
देवद्विजनरेन्द्राणां गर्भाख्यं तन्मनोहरम् ॥ १०३ ॥
त्रिःपञ्चभक्तिविस्तारं समं तु चतुरश्रकम् ।
त्रिभागं मध्यरङ्गयूर्ध्वकूटं वाङ्गणमेव वा ॥ १०४ ॥
परितोऽलिन्द्रमंशेन भागैकेनान्तरालकम् ।
शेषं पूर्ववदुद्दिष्टं कोष्ठकं भागतोऽधिकम् ॥ १०५ ॥
द्वात्रिंशद्विशतं पादमाद्यङ्गे प्रविधीयते ।
सर्वालङ्कारसंयुक्तं माल्याख्यं मण्डपं भवेत् ॥ १०६ ॥
माल्याद्भुतं समाश्रं तु भागैः षोडशभिर्युतम् ।
द्विभक्त्यैवोर्ध्वकूटं तु भागेनालिन्द्रमावृतम् ॥ १०७ ॥
द्व्येकभक्त्या मुखे भद्रं कर्णे लाङ्गलभित्तिकम् ।
पार्श्वे सोपानसंयुक्तं चित्रप्रस्तरसंयुतम् ॥ १०८ ॥
तद्बहिर्द्व्यंशमानेन जलपादं समन्ततः ।
तद्बाह्ये तु चतुर्भक्त्या परितो मण्डपं भवेत् ॥ १०९ ॥
द्विभक्तिचतुरश्राभमेकांशं व्यवधानकम् ।
द्विरष्टाङ्गणं तन्मध्ये परितः प्रविधीयते ॥ ११० ॥

कर्णे लाङ्गलकुड्यं स्यादूर्ध्वे हाराभिमण्डितम् ।
चतुर्द्विभित्तिविस्तारनिर्गमं दिक्षु भद्रकम् ॥ १११ ॥
पार्श्वे सोपनसंयुक्तं सर्वालङ्कारसंयुतम् ।
देवद्विजनरेन्द्राणां चतुरश्रं द्विरष्टधा ॥ ११२ ॥
इत ऊर्ध्वं द्विपार्श्वैकवृद्ध्या द्वात्रिंशदंशकम् ।
विस्तारं चतुरश्राभं मण्डपं कारयेद् बुधः ॥ ११३ ॥
विवृतं संवृतं वापि कुड्यस्तम्भं प्रयोजयेत् ।
यथायुक्ति यथाशोभं तथा कुर्याद् विचक्षणः ॥ ११४ ॥
एतेषामायताश्राभं मण्डपं प्रविधीयते ।
त्रिभक्तिविस्तृतं तस्माद् द्विभक्त्याधिकमायतम् ॥११५॥
पुरतो वारमेकांशं त्रिरष्टाङ्घ्रिसमन्वितम् ।
विंशन्नास्यङ्गसंयुक्तं घनाख्यं तद् धनावहम् ॥ ११६ ॥
विस्तारं चतुरंशैस्तु तस्माद् द्व्यंशाधिकायतम् ।
मण्डपं परितो भक्त्या शेषमङ्गणकं भवेत् ॥ ११७ ॥
द्विभक्तिविस्तृतं चैकभक्त्या तन्मुखभद्रकम् ।
चतुरष्टाङ्घ्रिसंयुक्तमाद्यङ्गेषु बहिर्बहिः ॥ ११८ ॥
सर्वालङ्कारसंयुक्तं सुभूषणमिति स्मृतम् ।
पञ्चभक्त्या विशालं तु तस्माद् द्व्यंशाधिकायतम् ॥११९॥
मण्डपं परितोंऽशेन शेषं कूटं तु वाङ्गणम् ।
त्रिभक्तिविस्तृतं चैकभक्त्या तन्मुखभद्रकम् ॥ १२० ॥
आद्यङ्गमष्टपञ्चाङ्घ्रिसंयुक्तं तद् विचित्रकम् ।
सर्वालङ्कारसंयुक्तं मङ्गल्यं सर्वदेशिकम् ॥ १२१ ॥

षड्भक्तिविस्तृतं तस्माद् द्विभक्त्याधिकमायतम् ।
चतुर्द्विभक्तिकं दैर्घ्यव्यासमध्ये सभोदयम् ॥ १२२ ॥
परितो मण्डपं द्व्यंशमिष्टदिङ्मुखभद्रकम् ।
षष्ट्यङ्घ्रियुतमाद्यङ्गं युक्त्या नास्यङ्गसंयुतम् ॥ १२३ ॥
सर्वालङ्कारसंयुक्तं सुगाख्यं तन्मनोहरम् ।
सप्तभक्त्या विशालं तु तस्माद् द्व्यंशाधिकायतम् ॥ १२४ ॥
त्रिभक्तिविस्तृतं पञ्चभक्तिदैर्घ्यं सभाङ्गणम् ।
परितो मण्डपं द्व्यंशमिष्टदिग्गतभित्तिकम् ॥ १२५ ॥
त्रिभक्तिविस्तृतं भागनिर्गमं मुखभद्रकम् ।
युक्त्या नास्यङ्गसंयुक्तं द्विसप्तत्यङ्घ्रिकान्वितम् ॥ १२६ ॥
सर्वालङ्कारसंयुक्तं द्रोणाख्यं मण्डपं भवेत् ।
अष्टभक्त्या विशालं तु तस्माद् द्व्यंशाधिकायतम् ॥ १२७ ॥
द्विचतुर्भागविस्तारायामं मध्ये जलस्थलम् ।
परितोऽलिन्द्रमेकांशं बाह्ये द्व्यंशेन मण्डपम् ॥ १२८ ॥
त्यक्तमध्याङ्घ्रिसंयुक्तमिष्टदिग्गतभित्तिकम् ।
साष्टषष्ट्यङ्घ्रिसंयुक्तं पूर्ववन्मुखभद्रकम् ॥ १२९ ॥
प्रमुखे वारमेकांशं मुखं सोपानसंयुतम् ।
नानालङ्कारसंयुक्तं सुरादीनां तु खर्वटम् ॥ १३० ॥
नवभक्तिविशालं तु तस्माद् द्व्यंशाधिकायतम् ।
एकत्र्यंशं तु विस्तारायामं मध्ये जलस्थलम् ॥ १३१ ॥
परितोऽलिन्द्रमेकांशं बाह्ये द्व्यंशेन मण्डपम् ।
त्यक्तमध्याङ्घ्रिसंयुक्तं बाह्ये वारं तु भागतः ॥ १३२ ॥

षण्णवत्यङ्घ्रिसंयुक्तं यथेष्टं द्वारभित्तिकम् ।
वारयुक्तमवारं वा पूर्ववन्मुखभद्रकम् ॥ १३३॥
नानावयवसंयुक्तं नाम्ना श्रीरूपमिष्यते ।
पङ्क्तिभागविशालं तु तस्माद् द्व्यंशाधिकायतम्॥ १३४॥
द्विचतुर्भागविस्तारायामं मध्ये सभोदयम् ।
परितोऽलिन्द्रमेकांशं भागेन जलपातनम् ॥ १३५ ॥
तद्बाह्ये द्व्यंशमानेन परितो मण्डपं भवेत् ।
स्तम्भं कुड्यं मुखं भद्रं यथेष्टं परिकल्पयेत् ॥ १३६ ॥
अथवा मध्यकूटं चाप्यलिन्द्रं चापि पूर्ववत् ।
जलस्थलं विना सर्वं मण्डपं परिकल्पयेत् ॥ १३७ ॥
द्विभक्त्या चतुरश्रं तु षट्कूटं पार्श्वयोर्मतम् ।
द्विचतुर्भागविस्तारदैर्घ्यं कोष्ठं मुखेऽमुखे ॥ १३८ ॥
कर्णे लाङ्गलकुड्यं वा परितः कुड्यमेव वा ।
विवृतं संवृतं वापि स्तम्भं तत्रैव योजयेत् ॥ १३९ ॥
सर्वावयवसंयुक्तं मङ्गलाख्यं तु मण्डपम् ।
अष्टावेतानि चोक्तानि देवद्विजमहीभृताम् ॥ १४० ॥
पूर्वोक्तचतुरश्रात् तु भक्त्यैकया विवर्धनात् ।
यावद् द्विगुणमायामं तावद् दैर्घ्यं प्रयोजयेत् ॥ १४१ ॥
स्तम्भकुड्यादिकं सर्वमलङ्कारं च तत्ततः ।
यथारुचि यथाशोभं तथा कुर्याद् विचक्षणः ॥ १४२ ॥
अष्टावायतयुक्तानि वक्ष्यन्ते वैश्यशूद्रयोः ।
द्विभक्तिविस्तृतं चैव विस्तारद्विगुणायतम ॥ १४३ ॥

त्रिःपञ्चाङ्घ्रिसमायुक्तं द्व्यंशैकं मुखभद्रकम्।
पार्श्वे सोपानसंयुक्तं नासिकाख्यैरलङ्कृतम्॥ १४४॥
इष्टदिङ्मुखसंयुक्तं मार्गाख्यं मण्डपं मतम्।
त्रिभक्तिविस्तृतं तस्य विस्तारद्विगुणायतम्॥ १४५॥
चतुःसप्ताङ्घ्रिसंयुक्तं भक्त्या वारं तु तन्मुखे।
द्विभक्तिविस्तृतं भक्त्या निर्गमं मुखभद्रकम्॥ १४६॥
युक्त्या नास्यङ्घ्रिसंयुक्तं सौभद्रं तन्मनोहरम्।
चतुर्भक्त्या विशालं तु तस्माद् द्व्यंशाधिकायतम्॥ १४७॥
द्विचतुर्विस्तृतायामं कूटं मध्ये तु वाङ्गणम्।
द्वात्रिंशाङ्घ्रिसमायुक्तं भक्त्या तन्मुखभद्रकम्॥ १४८॥
युक्त्या नास्यङ्घ्रिसंयुक्तं सुन्दराख्यं तु मण्डपम्।
पञ्चभक्त्या विशालं तु तस्माद् वेदांशमायतम्॥ १४९॥
द्विभक्तिविस्तृतं त्र्यंशदैर्घ्यं पार्श्वेऽङ्गणद्वयम्।
षट्पञ्चाशद् भवेत् पादं वारमेकेन तन्मुखे॥ १५०॥
त्रिभक्तिविस्तृतं चैकभक्त्या तन्मुखभद्रकम्।
प्रमुखे तस्य सोपानं सर्वतः कुड्यसंयुतम्॥ १५१॥
युक्त्या नास्यङ्घ्रिसंयुक्तं साधारणमिति स्मृतम्।
षड्भक्तिविस्तृतं तस्मात् त्रिभक्त्याधिकमायतम्॥ १५२॥
द्विपञ्चभागविस्तारायामं मध्ये सभोदयम्।
परितो मण्डपं द्व्यंशं वारं भक्त्या तु तन्मुखे॥ १५३॥
पूर्ववन्मुखभद्रं तु नासिकाख्यैरलङ्कृतम्
षष्ट्यङ्घ्रिकसमायुक्तं सर्वावयवसंयुतम्॥ १५४॥

नाम्ना सौख्यमिति प्रोक्तं सर्वेषां तु सनातनम् ।
सप्तभक्त्या विशालं तु तस्माद् वेदांशमायतम् ॥ १५५ ॥
त्रिभागचतुरश्रं तु मध्ये कूटं तु वाङ्गणम् ।
तद्बाह्ये भागमानेन परितोऽलिन्द्रमिष्यते ॥ १५६ ॥
द्विपञ्चविस्तृतायामं पार्श्वयोरङ्गणद्वयम् ।
बाह्ये मण्डपमेकांशं परितः कल्पयेद् बुधः ॥ १५७ ॥
त्रिभक्त्यैकेन विस्तारनिर्गमं मुखभद्रकम् ।
चतुराशीतिकं पादमाद्यङ्गे प्रविधीयते ॥ १५८ ॥
प्रमुखे वारमेकांशं नानावयवशोभितम् ।
सर्वालङ्कारसंयुक्तमेतदीश्वरकान्तकम् ॥ १५९ ॥
अष्टभक्त्या विशालं तु तस्मात् पूर्ववदायतम् ।
द्विभक्ति चतुरश्रं तु मध्ये कूटं तु वाङ्गणम् ॥ १६० ॥
तद्बाह्ये भागमानेन परितोऽलिन्द्रमिष्यते ।
पूर्ववत् पार्श्वयोः कूटं द्व्यंशेनाधिकमायतम् ॥ १६१ ॥
द्विभक्त्या मण्डपं बाह्ये परितः कल्पयेद् बुधः ।
चतुर्द्विभक्तिविस्तारनिर्गमं मुखभद्रकम् ॥ १६२ ॥
दशाधिकशतस्तम्भमाद्यङ्गे प्रविधीयते ।
सर्वालङ्कारसंयुक्तं श्रीभद्रं सर्वयोग्यकम् ॥ १६३ ॥
नवभक्त्या विशालं तु तस्मात् पूर्ववदायतम् ।
त्रिभक्तिचतुरश्रं तु मध्ये कूटं तु वाङ्गणम् ॥ १६४ ॥
तद्बाह्ये भागमानेन परितोऽलिन्द्रमिष्यते ।
द्विपञ्चभक्तिविस्तारदैर्घ्यं पार्श्वेऽङ्गणद्वयम् ॥ १६५ ॥

परितो मण्डपं द्व्यंशं तद्बाह्ये योजयेद् बुधः।
पञ्चद्व्यंशविशालायामेन भद्रं मुखेऽमुखे ॥ १६६ ॥
त्र्यंशैकविपुलं दैर्घ्ये पार्श्वयोर्भद्रकद्वयम्।
कर्णे लाङ्गलवत् कुड्यं विवृतस्तम्भसंयुतम् ॥ १६७ ॥
साष्टाविंशच्छतं पादमाद्यङ्गे प्रविधीयते।
यथायुक्ति यथायोगं तथा युञ्जीत बुद्धिमान् ॥ १६८ ॥
सर्वतोभद्रकं नाम्ना सर्वालङ्कारसंयुतम्।
एतान्यपि सुरादीनां योजयेत् तु विचक्षणः ॥ १६९ ॥
मण्डपानां तु विस्तारादायामं प्रविधीयते।
जातिरूपं तु पूर्वोक्तं छन्दमेकं द्विभक्तिकम् ॥ १७० ॥
विकल्पं त्र्यंशकं प्रोक्तमाभासं चतुरश्रकम्।
दण्डकं स्वस्तिभद्रं च पद्मं ककरभद्रकम् ॥ १७१ ॥
षण्मुखं लाङ्गलं मौलिं जातिनामानुसारतः।
प्रपामण्डपजातिस्तु युक्तितः पादसंयुता ॥ १७२ ॥
गृहविन्यासरङ्गाङ्गं तदुक्तं गृहमण्डपम्।
प्रासादगर्भनालीवत् सालिन्द्राङ्गविशेषतः ॥ १७३ ॥
अधिष्ठानादिवर्गाढ्यं प्रासादाकारमण्डपम्।
प्रासादगृहसाङ्गाङ्गं गृहप्रासादमण्डपम् ॥ १७४ ॥
मण्डपोपरि भूमिश्चेन्मालिकामण्डपं मतम्।
इष्टकाभिः शिलाभिर्वा दारुभिर्दन्तलोहकैः ॥ १७५ ॥
सर्वत्र द्रव्यजातीनां मिश्रं मिश्रं विशेषितम् ॥ १७५½ ॥
सायतं (तु) चतुरश्रकं जलक्रीडयान्वितमथापि मण्डपम्।

एकभौमकमनेकभौमकं योजनीयमवनीपतीच्छया ॥

संवृतं विवृतमङ्घ्रिभित्तिकं दिक्षु दिक्षु गतभद्ररूपकम् ।
मध्यरङ्गसहितं तु वाङ्गणं स्तम्भभित्तिकमुपर्युपर्यपि ॥

गुह्यवारणपराधिरोहणं द्वारि तत्र बहुयन्त्रकल्पकम् ।
वारिगर्भगजभूतहंसकं व्यालसिंहकपिसालभञ्जिकम् ॥

हर्म्यमण्डपसभाभशीर्षकं कूटनीडगजतुण्डकोष्ठकम् ।
तोरणादिबहुजालकैर्युतं नासिकादिभिरलङ्कृतं पुनः ॥

मण्डपस्य पुरतोऽथ मध्यमे वा जलाशयमनेकयन्त्रकम् ।
इष्टकाभिरुपलैरलङ्कृतं सावगूढमपगूढवारिणाम्॥१८०३॥

एवं भूपानां जलक्रीडनार्थं प्रोक्तं यत्तन्मण्डपं रम्यदेशे ।
सालङ्कारं सर्वचित्रैर्विचित्रं स्त्रीसौभाग्यारोग्यभोग्यप्रदायि ॥

खदिरः खादिरो वह्निर्निम्बः सालः सिलिन्द्रकः पिशितः ।
तिन्दुकमथ राजादनहोममधूकास्तु पादपादपकाः ॥

एते देवद्विजनृपयोग्याः स्युः सर्वकर्मसु वै ।
स्तम्भाकृतयः सर्वे प्रोक्ताः पूर्वोदितास्तेषाम् ॥ १८३३ ॥

पिशितस्तिन्दुकवृक्षो निम्बो राजादनो मधूकश्च ।
सिलिन्द्रः स्तम्भरुजा वैश्यानां चापि शूद्राणाम् ॥१८४३॥

वृत्तं वा चतुरश्रं वाष्टाश्रं षोडशाश्रं च ।
स्तम्भाकृतयः प्रोक्तास्त्वक्साराः सर्वयोग्याः स्युः ॥

तालं च नालिकेरं क्रमुकं वेणुश्च केतकी चैव ।
इष्टशिलाभिर्वावृक्षैर्देवद्विजमहीपानाम् ॥ १८६३ ॥

आश्रमिणामप्युदितान्यावासानि हि सर्वाणि ।
नैव शिलाभिर्वणिजां शूद्राणां वासके योग्यम् ॥ १८७३ ॥
प्रासादाभिमुखे यान्यवरस्य श्रेष्ठमण्डपानि च वै ।
तानि विमानाद्यङ्गस्तम्भोत्तरवाजनानि सदृशानि ॥
अथ मुनिवसुनन्दांशैर्धर्मांशैर्कांशहीनानि ।
पूर्वोदितमानानि हि सर्वाण्यङ्गानि वा विधेयानि ॥ १८९३ ॥
आख्यातं मण्डपानां तान्येवोक्तानि दिक्प्रमाणं च ।
पञ्चचतुस्त्रिद्विगुणस्तम्भव्यासेन भित्तिविष्कम्भम् ॥
दारुस्तम्भव्यासात् पादोनं वा त्रिभागमर्धोनम् ।
कुड्यस्तम्भविशालं तेन विशालेन वा कुड्यम् ॥ १९१३ ॥
मध्याङ्गणस्य दिशि दक्षिणतोऽङ्घ्रिमूले
द्वारस्य दक्षिणयुते तालिपे तु केचित् ।
कोणे द्वितीयचरणान्वितके त्रिगर्भ-
स्थानं वदन्ति मुनयः खलु मण्डपानाम् ॥ १९२३ ॥
उक्तव्यासायामभागादलिन्द्रं
पूर्वेऽपूर्वे वाथ भक्त्या समन्तात् ।
भक्त्या वाध्यर्धः समन्तात् (तु) कुर्याद्
देवानामुर्वीसुरोर्वीश्वराणाम् ॥ १९३३ ॥
प्रासादाङ्गं मालिकाङ्गं यथावत्
कुर्यात् कुड्यं मूलकुड्योपरिष्टात् ।
पादं पादानामुपर्येव योज्य-
मेकद्वित्रीण्यत्र भौमानि युक्त्या ॥ १९४ ॥

तत्तद्विस्तारायतांशैर्विधिज्ञैः
तेषां मानं पादबाह्ये तु केचित्।
केचिद् भित्तेर्मध्यमं तद् वदन्ति
शालाकारं वा सभाशीर्षकाङ्गम् ॥ १९५? ॥
(यत्तत् कुर्यान्मण्डपं वासयोग्यम् ॥?)
एकद्वित्रिचतुर्मुखानि च मुखे भद्राण्यभद्राणि का-
न्यूर्ध्वे कूटयुतानि मध्यकपदे रङ्गाङ्गणाढ्यानि वै।
सर्वाण्यायतमण्डपानि चतुरश्राभाणि देवद्विज-
क्षोणीशायतने मतानि च विशां शूद्रेषु दीर्घं मतम् ॥

इति मयमते वस्तुशास्त्रे मण्डपलक्षणो नाम
पञ्चविंशोऽध्यायः।

अथ षड्विंशोऽध्यायः।

तैतलानां द्विजादीनां वर्णानां वासयोग्यकाः।
एकद्वित्रिचतुस्सप्तद(शा?शशाला)श्च षड्विधाः ॥ १ ॥
त्यक्ताजांशाः पुरोलिन्द्राः संयुक्ताः पिण्डभिन्नकाः।
तासां हस्तैरयुग्मैश्च युग्मैर्विस्तारमायतम् ॥ २ ॥
उत्सेधं चाप्यलङ्कारं संक्षेपाद् वक्ष्यतेऽधुना।
त्रिचतुर्हस्तमारभ्य द्विद्विहस्तविवर्धनात् ॥ ३ ॥
त्रयोविंशचतुर्विंशद्धस्तान्ता रुद्रसंख्यया।
एकशाला द्विशालाश्च ताः सर्वाः परिकीर्तिताः ॥ ४ ॥
सप्ताष्टहस्तादारभ्य द्वौ द्वौ हस्तौ प्रवर्धयेत्।
एकोनविंशद्धस्तान्तं विंशद्धस्तं तु सप्तधा ॥ ५ ॥

द्विशालायास्त्रिशालाया वैपुल्यं परिकीर्तितम्।
विस्तारात् पादमाधिक्यमर्धाधिकमथापि वा॥ ६॥
त्रिपादं द्विगुणायामं तस्मात् पादार्धकं त्रिपात्।
त्रिगुणान्तप्रमाणं चैवायामाश्चाष्टधा स्मृताः॥ ७॥
सर्वे दैर्घ्यार्धकाणां(?) तु द्विगुणं तु नृणां मतम्।
द्विगुणाद्यायताः सर्वे विहाराश्रमवासिनाम्॥ ८॥
सर्वेषां सङ्गमोपेते द्विगुणाद्यायतं मतम्।
विस्तारसममुत्सेधं सपादं सार्धमेव वा॥ ९॥
त्रिपादं द्विगुणं चैव उत्सेधं पञ्चधा मतम्।
शान्तिकं पौष्टिकं चैव जयदं धनमद्भुतम्॥ १०॥
तैतलानां द्विजादीनां पाषण्ड्याश्रमिणामपि।
हस्त्यश्वरथयौधानां यागहोमादिशिल्पिनाम्॥ ११॥
एकशाला प्रशस्ता स्यात् स्त्रीणां रूपोपजीविनाम्।
दण्डकं मौलिकं चैव स्वस्तिकं च चतुर्मुखम्॥ १२॥
सामान्यं तैतलादीनां पूर्वोक्तानां चतुष्टयम्।
एकादिबहुभूम्यन्तं खण्डहर्म्यादिमण्डितम्॥ १३॥
अर्पितानर्पितं चैव प्रासादवदलङ्कृतम्।
पुरतः पार्श्वयोः पृष्ठेऽलिन्द्रं कुर्यात् समन्ततः॥ १४॥
नराणां च सुराणां च पाषण्ड्याश्रमिणां तथा।
पुरतो मण्डपोपेतं पृष्ठे पार्श्वे तु भद्रकम्॥ १५॥
मध्ये वासं तु देवानां पार्श्वे वासो भवेन्नृणाम्।
प्रागवागपरोदीच्यां पृथक्शाला प्रधानिका॥ १६॥

सर्वेषामपि जातीनां सामान्यमिति विद्यते ।
दक्षिणे पश्चिमे चोक्तशाला वैशेषिका नृणाम् ॥ १७ ॥
प्रागुदक्प्रागवाक्प्रत्यगुदग्गेहं तु लाङ्गलैः ।
स्वामिनो मरणं स्याद्धि श्रियै याम्ये प्रतीच्यपि ॥ १८ ॥
अवाक्प्रत्यगुदक् सम्पत् प्रागवागपरो जयः ।
दक्षिणे पश्चिमे हीनास्त्रिशालाः सर्वदोषकाः ॥ १९ ॥
लाङ्गलं गणिकादीनां शूर्पमुग्रोपजीविनाम् ।
लाङ्गले चैव शूर्पे च पृथक्शाला प्रधानिका ॥ २० ॥
शालाविरहितस्थाने कुड्यद्वारं प्रयोजयेत् ।
एकसन्धि द्विशालायास्त्रिशालाया द्विसन्धिकम् ॥ २१ ॥
उक्तानां दण्डकादीनां विन्यासं च वदाम्यहम् ।
विस्तारं तु त्रिधा कृत्वा चतुर्भागं तदायतम् ॥ २२ ॥
द्विभागं गृहविस्तारं वारमेकांशमग्रतः ।
आस्यं तत्खण्डदण्डाभं वासं सर्वजनार्हकम् ॥ २३ ॥
एतद् दण्डकमित्युक्तं शालानां क्षुद्ररूपकम् ।
विस्तारे चतुरंशे तु षडंशाधिकमायतम् ॥ २४ ॥
द्विभागं गृहविस्तारं द्व्यंशं चङ्क्रमणं भवेत् ।
शेषं पूर्ववदुद्दिष्टं दण्डकं तदुदीरितम् ॥ २५ ॥

गृहायते नन्दविभागभाजिते शरांशके दक्षिणभागमाधिकम् ।
अदक्षिणे वद्धपदं तदन्तरे विधीयतां द्वारमथैकशालके ॥
केचिद् द्वारं मध्यसूत्रस्य वामे चाहुः शिष्टं मानुषाणां निवासे ।
सर्वास्वेतास्वस्त्रशालासु शालाभागे कुर्यादायते द्वारमेकम् ॥

त्रिभागं गृहविस्तारं द्विगुणं तस्य दीर्घकम् ।
भागं चङ्क्रमणोपेतं मध्यमे चैकभाक्तिकम् ॥ २८ ॥
कुल्याभद्वारसंयुक्तं शेषं पूर्ववदाचरेत् ।
वंशमूले तु वासं स्याद् वंशाग्रे रङ्गमीरितम् ॥ २९ ॥
सर्वतः परितः कुड्यं रङ्गं पादस्य संयुतम् ।
भागेन पुरतोऽलिन्द्रं पार्श्वयोः पृष्ठतस्तु वा ॥ ३० ॥
प्रासादवदलङ्कुर्याद् दण्डकं तदुदीरितम् ।
तदेव मध्यमे रङ्गं वासौ वंशाग्रमूलयोः ॥ ३१ ॥
युक्त्यान्तस्तम्भसंयुक्तं वंशद्वारं न योजयेत् ।
शेषं पूर्ववदुद्दिष्टं दण्डकं तदुदीरितम् ॥ ३२ ॥
षडंशं विस्तृतं चैव द्वादशांशं तदायतम् ।
भागेन परितोऽलिन्द्रं शालाभागं द्विभागतः ॥ ३३ ॥
तत्समं परितोऽलिन्द्रं युक्त्यान्तःस्तम्भसंयुतम्
पार्श्वयोर्द्वित्रिभागेन शालायामे द्विवासकौ ॥ ३४ ॥
द्विचतुर्भागविस्तारायामं मध्ये तु रङ्गकम् ।
दण्डकं तदपि प्रोक्तं शेषं पूर्ववदाचरेत् ॥ ३५ ॥
व्यासेऽग्निभूतपातालनन्दांशैकद्विकत्रिभिः ।
चतुर्भिः पुरतोऽलिन्द्रं स्यादेकद्वित्रिशालके ॥ ३६ ॥
एतत् सर्वं दण्डकं जातिरूपं देवानां भूतैतलानां नृपाणाम् ।
पाषण्डादीनां विशां शूद्रकाणां योधानां रूपाङ्गनानां प्रशस्तम् ॥
एतदेव सभाकारशिरोयुक्तं तु मौलिकम्
तदेव काननोपेतं मौलिकं तदुदीरितम् ॥ ३८ ॥

छन्दं पूर्वोदितानां तु संमतं नैव योषिताम् ।
तदेव पुरतोभद्रं चतुर्थ्यंशेन निर्गमम् ॥ ३९ ॥
त्र्यासं नेत्रत्रयोपेतं स्वस्तिकं तद् विकल्पकम् ।
देवभूसुरभूपेषु योग्यं नैवान्त्यजन्मनाम् ॥ ४० ॥
तदेव मुखभद्रं तु यथा तत् पृष्ठतो भवेत् ।
क्रकरीवंशशालाश्रं चतुर्नेत्रसमन्वितम् ॥ ४१ ॥
अधिष्ठानादिवर्गाढ्यं प्रासादवदलङ्कृतम् ।
नासिकातोरणाद्यङ्गैर्युक्तं वातायनादिभिः ॥ ४२ ॥
चतुर्मुखमिदं नाम्ना आभासमिति कल्पितम् ।
देवद्विजनृपाणां च संमतं सम्पदां पदम् ॥ ४३ ॥
एकादिपञ्चभूम्यन्तं दण्डकादिचतुष्टयम् ।
स्वामिचित्तवशान्न्यस्तस्थानविन्यासंसंयुतम् ॥ ४४ ॥
हस्त्यश्ववृषभादीनां प्रत्येकं वासपङ्क्तिकम् ।
सद्विचूलित्रिचूल्यङ्गं सग्रग्रीवं सतल्पकम् ॥ ४५ ॥
सपादं सार्धमुत्सेधं तत्समं वाभिधीयते ।
दण्डकं मौलिकं चैव यथेष्टदिशि वारणम् ॥ ४६ ॥
चतुरश्रे द्विशाले तु धर्मभागविभाजिते ।
भागेन बाह्यतो वारं द्व्यंशं गेहविशालकम् ॥ ४७ ॥
प्रमुखे वारमेकांशं मण्डपं नवभागिकम् ।
तदावृत्त्यैकतोऽलिन्द्रं शेषं चङ्क्रमणं भवेत् ॥ ४८ ॥
मुखगेहं बहिर्वारं लाङ्गलाभं यथा तथा ।
मुखचङ्क्रमणाद्यन्तर्विन्यासं चतुरश्रकम् ॥ ४९ ॥

मध्यरङ्गसमायुक्तं मुख्यगेहं द्विवासकम् ।
बाह्यचङ्क्रमणाद् बाह्ये मुखभद्रं द्विभागतः ॥ ५० ॥
चतुर्मुखसमायुक्तं द्विशालं तच्चतुर्मुखम् ।
तदेव पञ्चभागान्तमेकांशादि मुखायतम् ॥ ५१ ॥
द्वारं पूर्ववदुद्दिष्टं सर्वालङ्कारशोभितम् ।
मण्डपं बाह्यतोऽलिन्द्रं सायतं प्रविधीयते ॥ ५२ ॥
नेत्रत्रयसमायुक्तं दीर्घ्या चायतभद्रकम् ।
एतत् स्वास्तिकमित्युक्तं शेषं पूर्ववदाचरेत् ॥ ५३ ॥
तदेव द्विमुखोपेतं दण्डवक्रमिति स्मृतम् ।
सावकाशाङ्गणोपेतं मण्डपेन विना यदि ॥ ५४ ॥
शालाविरहितस्थाने कुड्यद्वारं प्रयोजयेत् ।
एकानेकतलोपेतं कुर्याद् रूपोपजीविनाम् ॥ ५५ ॥
व्यासायामेऽष्टधर्मांशे त्रिशाले द्व्यंशमङ्गणम् ।
त्रिपार्श्वेऽलिन्द्रमेकांशं द्व्यंशं शालाविशालकम् ॥ ५६ ॥
त्यक्तमध्यमपादं तद् द्व्यंशं तन्मुखभद्रकम् ।
षडाननसमोपेतं सप्रच्छन्नमजाङ्कणम् ॥ ५७ ॥
एकानेकतलोपेतं प्रासादवदलङ्कृतम् ।
द्वारादि पूर्ववन्मेरुकान्तं नामाग्रजीविनाम् ॥ ५८ ॥
व्यासे पङ्क्त्यर्कभागे तु पार्श्वयोः पृष्ठतस्तु वा ।
वारमेकांशतः कुर्याद् द्व्यंशं गेहविशालकम् ॥ ५९ ॥
प्रमुखे वारमेकांशं द्व्यंशं तन्मध्यमङ्गणम् ।
परितो वारमेकांशं द्विप्रच्छन्नमथापि वा ॥ ६० ॥

तारद्व्यंशाधिकायामं चतुराननमण्डितम्
प्रमुखे तु चतुर्द्व्यंशं निर्गतद्वारभद्रकम् ॥ ६१ ॥
पार्श्वयोर्वापरे मुख्यवासं स्याद् द्विललाटकम् ।
मौलिभद्रमिदं नाम्ना शेषं पूर्ववदाचरेत् ॥ ६२ ॥
त्रिपञ्चषोडशारत्नितारा द्वौ द्वौ प्रवर्धयेत् ।
आचतुर्विंशतेर्व्यासः पञ्चधोक्तस्त्रिशालके ॥ ६३ ॥
नवपङ्क्तिकरारभ्य द्विद्विहस्तविवर्धनात् ।
आपञ्चोत्तरषष्ट्यन्तं षट्षष्ट्यन्तं तु विस्तृतम् ॥ ६४ ॥
चतुःशालविशालाः स्युर्नवविंशतिसंख्यया ।
अद्य(?) द्विसप्तमानं तु संवृताङ्गणकान्वितम् ॥ ६५ ॥
विवृताङ्गणकं शेषं कुर्याद् यत्र यथोचितम् ।
आद्यं तु सर्वतोभद्रं द्वितीयं वर्धमानकम् ॥ ६६ ॥
तृतीयं स्वस्तिकं चैव नन्द्यावर्तं चतुर्थकम् ।
पञ्चमं रुचकं विद्याच्छालानामभिधानकम् ॥ ६७ ॥
तत्तदात्तविशालेन वीजं स्याच्चतुरश्रकम् ।
आत्तव्यासाद् द्विहस्तेनाधिक्यजात्यायतं मतम् ॥ ६८ ॥
चतुर्हस्ताधिकं छन्दं विकल्पं षट्कराधिकम् ।
आभासमष्टहस्तेनाधिक्यं दैर्घ्यमिति स्मृतम् ॥ ६९ ॥
अथ वैशेषिकायाममात्मांशेन विधीयते ।
आत्तव्यासं कर्मजातिर्द्विभागेनाधिकायतम् ॥ ७० ॥
चतुरंशाधिकं वीजाद् दीर्घं छन्दमिति स्मृतम् ।
षडंशदीर्घं विपुलाद् विकल्पमिति कथ्यते ॥ ७१ ॥

अष्टभागाधिकं व्यासादाभासं स्यात् तदायतम्।
षडंशेन विशाले तु नेष्टमाभासदैर्घ्यकम्॥ ७२॥
सर्वतोभद्रविन्यासं संक्षेपाद् वक्ष्यतेऽधुना।
वासव्यासेऽष्टभागे तु द्विभागं मध्यमाङ्गणम्॥ ७३॥
तदर्धं परितो मार्गं द्विभागं गेहविस्तृतम्।
चतुष्कर्णे सभास्थानं सभामध्ये तु वासकम्॥ ७४॥
पूर्वापरगृहे वापि स्वाम्यावासं प्रशस्यते।
सर्वतः कुड्यसंयुक्तं कुल्याभद्वारसंयुतम्॥ ७५॥
बहिर्जालककुड्यं स्यादन्तार्निर्वृत्तपादकम्।
पक्षशालांशके द्वारं मुखं पूर्वेऽपरत्र वा॥ ७६॥
जालकं च कपर्दं च बाह्येऽबाह्ये तथैव च।
क्रकरीवंशशालाश्रमष्टास्यं भद्रसंयुतम्॥ ७७॥
चतुर्दिग्भद्रसंयुक्तमेकैकार्धसभामुखम्।
अन्तर्भद्रसभाकर्णे शङ्खसङ्कलुपान्वितम्॥ ७८॥
मुखपट्टिकयोपेतमध्यकोटिसमन्वितम्।
परितो दण्डिकाद्वारं शिखरे तीव्रपट्टिका॥ ७९॥
प्रस्तरं नासिकायुक्तमन्तरप्रस्तरान्वितम्।
समकार्यं समद्वारं समवंशं तु कारयेत्॥ ८०॥
विपरीतमनर्थाय भवेदेव न संशयः।
मुक्तमुक्ततलं तत्र मण्डपक्रिययान्वितम्॥ ८१॥
एकानेकतलोपेतं प्रासादवदलङ्कृतम्।
देवद्विजनृपाणां च वासयोग्यं सनातनम्॥ ८२॥

सर्वासामपि शालानामेतत् सामान्यमीरितम् ।
हस्तच्छेदप्रवृद्ध्या वा हान्या पूर्णं यथा कुरु ॥ ८३ ॥
कर्करीकर्णवक्रान्ता शालावासचतुष्टया ।
अष्टास्योर्ध्वतलग्रीवा सस्थूपिसमवंशका ॥ ८४ ॥
भद्रोर्ध्वमुखकूटं स्यादन्तर्द्वारं बहिर्मुखम् ।
एतत्तु सर्वतोभद्रं राज्ञामावासयोग्यकम् ॥ ८५ ॥
वासव्यासेऽर्कभागे तु द्विभागं मध्यमाङ्गणम् ।
परितो मार्गमेकांशमन्तर्वारमथांशकम् ॥ ८६ ॥
शालाव्यासं द्विभागेन बाह्यवारं तदर्धकम् ।
एतत्तु सर्वतोभद्रमलङ्कारादि पूर्ववत् ॥ ८७ ॥
व्यासे द्विसप्तभागे तु द्विभागं मध्यमाङ्गणम् ।
परितो वारमेकांशं द्व्यंशं शालाविशालकम् ॥ ८८ ॥
तदर्धं बाह्यवारं तु पृथुवारं द्विभागतः ।
चतुष्टयानां शालानां शिखरं तु सभाकृति । ८९ ॥
मध्ये नासिसमायुक्तं भद्रप्रभृति पूर्ववत् ।
सर्वासामपि शालानां त्यजेन्मध्यस्थपादकम् ॥ ९० ॥
त्रितलादितलोपेतं खण्डहर्म्याभिमण्डितम् ।
एतत्तु सर्वतोभद्रं देवद्विजमहीभृताम् ॥ ९१ ॥
व्यासे द्विरष्टभागे तु चतुरंशमथाङ्गणम् ।
पूर्ववद् योजयेच्छेषं प्रहीणशिखराकृति ॥ ९२ ॥
नासिकातोरणाद्यङ्गैर्जालकैश्च समन्वितम् ।
त्रितलादितलोपेतं प्रासादवदलङ्कृतम् ॥ ९३ ॥

तले तले तु सोपानं मध्ये मध्ये तु मण्डपम्।
विवृतं वाङ्गणं सर्वं युक्त्यानुक्तं प्रयोजयेत् ॥ ९४ ॥
एतत्तु सर्वतोभद्रं नृपाणामधिवासकम्।
अष्टादशांशके व्यासे द्विभागं मध्यमाङ्गणम् ॥ ९५ ॥
परितो मार्गमेकांशमन्तर्वारमथांशकम्।
शालाव्यासं द्विभागेन बाह्यवारं तदर्धकम् ९६ ॥
द्विभागं पृथुवारं स्याद् बाह्यवारमथांशकम्।
शालाकारं सभाकारं यथा वा शिखरं तु तत् ॥ ९७ ॥
त्रितलादितलोपेतं खण्डहर्म्याभिमण्डितम्।
पूर्ववद् योजयेच्छेषं यथायुक्ति यथारुचि ॥ ९८ ॥
स्वामिचित्तवशान्न्यस्तस्थानविन्याससंयुतम्।
अन्यत् प्रासादवत् सर्वमलङ्कुर्याद् विचक्षणः ॥ ९९ ॥
एतत्तु सर्वतोभद्रं नृपेशभवनं स्मृतम् ॥ ९९½ ॥

शालाजातिस्तच्छिरोयुग् विमानं
मुण्डाकारं शीर्षकं हर्म्यमेतत्।
नानाकाराङ्गान्वितानेकभूमा
माला छन्दा स्यात् तु सा मालिकाख्या॰ ॥ १००½॥
व्यासे षड्स्वंशके व्यंशकेऽष्टां-
शार्कैर्मन्वंशैश्चदैर्घ्यं तदंशैः।
व्यंशकेऽष्टांशार्कैर्मन्वंशैर्दीर्घ्यं तत्तदंशै(?)।
एकद्व्यंशं मुख्यवासस्य वारं
दैर्घ्याष्टांशैर्वारमेकं च सार्धम् ॥ १०१½ ॥

वर्धमानस्य विन्यासं वक्ष्ये संक्षेपतः क्रमात् ॥ १०२ ॥

व्यासे षडंशके तत्र द्व्यंशं शालाविशालकम् ।
द्विभागमङ्गणं बाह्ये सर्वतः कुड्यसंयुतम् ॥ १०३ ॥

प्रमुखे मुख्यवासस्य भागं चङ्क्रमणं भवेत् ।
मध्यभित्तिसमायुक्तं कुल्याभद्वारसंयुतम् ॥ १०४ ॥

अपरे दीर्घशाला स्याद् द्विनेत्रोत्तुङ्गसंयुता ।
ईषन्निम्नोन्नतात्प्राविशालाद् दैर्घ्यानतान्विता(?) ॥ १०५ ॥

पक्षके द्वे तु शाले तु वंशं निम्ने द्विवक्रकौ(?) ।
एकैकदिशि निष्क्रान्तं द्विभागं मध्यवारणम् ॥ १०६ ॥

ह्रस्वपादसमायुक्तं यथालङ्कारकं तु तत् ।
शङ्खावर्तं तु सोपानं कर्णे द्व्यंशेन योजयेत् ॥ १०७ ॥

नासिकातोरणस्तम्भजालकादिविराजितम् ।
प्रासादवदलङ्कुर्यादनुक्तं चात्र पूर्ववत् ॥ १०८ ॥

एकद्वित्रितलोपेतं नोदग्द्वारं महीभृताम् ।
तदेवांशेन वारं तु विवृतस्तम्भभित्तिकम् ॥ १०९ ॥

मुख्यगेहार्धदाक्षिण्ये मूलवंशोन्नतोन्नतम् ।
यथेष्टदिशि भद्राङ्गं यथेष्टदिशि वासकम् ॥ ११० ॥

दण्डिकावारसंयुक्तं प्रासादवदलङ्कृतम् ।
द्वारतोरणनासीभिस्तथा वेदिकजालकैः ॥ १११ ॥

यथारुचि यथाशोभं तथा कुर्याद् विचक्षणः ।
एतत्तु वर्धमानं स्याच्चतुर्णामपि शंसितम् ॥ ११२ ॥

व्यासे दशांशके तत्र द्विभागमङ्गणं भवेत्।
तद्बहिर्वारमेकांशं शालाव्यासं द्विभागिकम् ॥ ११३ ॥
तदर्धं तु बहिर्वारं द्वारं भद्रसमन्वितम्।
कूटकोष्ठादिसर्वाङ्गं यथायुक्ति यथारुचि ॥ ११४ ॥
एतत्तु वर्धमानं स्याच्चतुर्णामपि शंसितम्।
अथवा तद्बहिर्वारं द्व्यंशं व्यासे दशांशके ॥ ११५ ॥
मुक्तमुक्ततलं तत्र मण्डपक्रिययान्वितम्।
यथोचितमलङ्कारमुपर्युपरि तत्क्रमात् ॥ ११६ ॥
मुखभद्रं विना तत्र शेषं प्रागुक्तवन्नयेत्।
समं त्रिपादमर्धं वा मुखमण्डपमिष्यते ॥ ११७ ॥
शेषं प्रागुक्तवन्नेयं विप्रादीनां प्रशंसितम्।
त्रिचतुष्पञ्चभौमं स्याद् वर्धमानं मनोहरम् ॥ ११८ ॥
द्वादशांशे विशाले तु द्विभागं मध्यमाङ्गणम्।
शालाव्यासं द्विभागं तद्बाह्यालिन्द्रं द्विभागतः ॥ ११९ ॥
तद्बहिर्वारमेकांशं स्तम्भं कुड्यं यथोचितम्।
पार्श्वयोस्तद्बहिर्द्व्यंशैकांशविस्तारनिर्गमा ॥ १२० ॥
सवारमुखपट्टयङ्गनेत्रशालाविनिर्गता।
पुरतः पार्श्वयोर्नेत्रशालेऽलिन्द्रात् तु पूर्ववत् ॥ १२१ ॥
तयोर्मध्ये चतुर्द्व्यंशे द्वितले वा स्थलान्वितम्।
वारं स्यात् त्रितले तत्र तत्र शाला चतुस्स्थले ॥ १२२ ॥
अपरे कर्णकूटे द्वे कर्तव्ये पञ्चभूमिके।
तयोर्मध्ये चतुर्द्व्यंशे षट्तलेऽर्धसभासुखम् ॥ १२३ ॥

पार्श्वयोर्नेत्रकूटे द्वे मुख्यधाम्नस्तु षट्तले।
पुरतः कर्णकूटे द्वे सोपानं स्यात् तदन्तरे ॥ १२४ ॥
तत्पुरः कर्णकूटे द्वे कर्तव्ये तु चतुस्स्थले।
शाला पञ्चतले कार्या दैर्घ्ये तत्रैव पञ्जरे ॥ १२५ ॥
द्विभागविपुलायामे कर्तव्ये पार्श्वयोस्तु ते।
अङ्गणं मण्डपं चोर्ध्वे तदूर्ध्वे तलवारयुक् ॥ १२६ ॥
वारं नेत्रसमायुक्तं वामे सोपानसंयुतम्।
मुखचङ्क्रमणे गुह्यसोपानं स्यात् तले तले ॥ १२७ ॥
पृष्ठेऽष्टद्व्यंशविस्तारनिर्गमं भद्रशोभितम्।
तदंशे पार्श्वयोर्वक्रे वारं स्यात् त्रितलान्वितम् ॥ १२८ ॥
द्व्यंशैकांशैकविस्तारनिर्गमा पञ्चभूमिके।
सवारमुखपट्टयङ्गपृष्ठशालाविनिर्गता ॥ १२९ ॥
पार्श्वयोर्द्वि(त्रि ? द्वि)भागेन कूटौ द्वौ तु चतुस्स्थले।
पुरतो मण्डपं तत्र वासव्याससमन्वितम् ॥ १३० ॥
द्वितलोपरि भद्राङ्गी शाला नेत्रसमन्विता।
वास्तूनां तु चतुस्सूत्रं यथाशास्त्रं प्रसारयेत् ॥ १३१ ॥
मध्ये स्तम्भं सुसंस्थाप्य पार्श्वे (द्वय ? द्वार)युतं तु तत्
कर्तव्यं विधिना तज्ज्ञैः कम्पद्वारं तदुच्यते ॥ १३२ ॥
प्रासादवदलङ्कुर्यात् स्तम्भाद्यङ्गं तले तले।
सप्तभौमं नृपेशस्य मन्दिरं वर्धमानकम् ॥ १३३ ॥
चतुर्दशांशके व्यासे द्विभागं मध्यमाङ्गणम्।
परितो वारमेकांशं शालाव्यासं द्विभागिकम् ॥ १३४ ॥

द्विभागं पृथुवारं स्याद् बाह्यवारं तदर्धकम् ।
परितो द(धि?ण्डि)कावारं मुष्टिबन्धादिशोभितम् ॥
चूलहर्म्यादिकं कुड्यं महावारमुपर्यपि ।
कूटकोष्ठादिसर्वाङ्गं युक्त्या तत्र प्रयोजयेत् ॥ १३६ ॥
एतत्तु वर्धमानं स्यान्नोदग्द्वारं महीभृताम् ।
व्यासे द्विरष्टभागे तु द्विभागं मध्यमाङ्गणम् ॥ १३७ ॥
तावत् स्याद् गृहविस्तारं परितः कुड्यसंयुतम् ।
द्विभागं पृथुवारं स्यादन्तः स्तम्भं यथोचितम् ॥ १३८ ॥
तद्बहिर्वारमेकांशं पृथुवारं द्विभागतः ।
स्तम्भं कुड्यं यथायुक्ति यथाशोभं तथाचरेत् ॥ १३९ ॥
दण्डिकावारसंयुक्तं पार्श्वे पृष्ठे सभद्रकम् ।
पार्श्वयोर्नेत्रशाले द्वे द्वे महावारसंयु(तम्?ते) ॥ १४० ॥
पादं पादाश्रयं पादं पादार्धाश्रयमेव वा ।
किञ्चिदाश्रयमेवं वानाश्रयं त्रिपदां पदम् ॥ १४१ ॥
वारस्थलं चूलहर्म्ये कर्तव्यं स्यात् तलं तलम् ।
गोपानं च लुपाश्चैव वक्रस्तम्भं च नाटकम् ॥ १४२ ॥
मुष्टिबन्धं च निर्यूहवलभी च कचग्रहम् ।
यत्र यत्रोचितं तत्र योजयेत् तद् विचक्षणः ॥ १४३ ॥
सभा वा मण्डपाकारं मालिकाकारमेव वा ।
एतासामपि शालानामङ्गणं कारयेद् बुधः ॥ १४४ ॥
मण्डपस्य तु मध्ये तु स्तम्भं नैव प्रयोजयेत् ।
मण्डपं पुरतस्तस्य वासव्याससमं तु वा ॥ १४५ ॥

त्रिपादं वा तदर्धं वा युक्त्यान्तःस्तम्भसंयुतम् ।
एकद्वित्रितलोपेतं मालिकाभं यथा तथा ॥ १४६ ॥
विवृतस्तम्भसंयुक्तं वासालिन्द्रान्वितं तु वा ।
अन्तःसोपानसंयुक्तमनुक्तं चात्र पूर्ववत् ॥ १४७ ॥
त्रितलाद्यानवतलमेकादशतलं तु वा ।
एतत्तु वर्धमानं स्याद् भूपेन्द्राणां विशेषतः ॥ १४८ ॥
नन्द्यावर्तस्य विन्यासमलङ्कारमथोच्यते ।
व्यासे षडंशके तत्र द्विभागं मध्यमाङ्गणम् ॥ १४९ ॥
शालाव्यासं द्विभागं स्यात् तन्मानं तु चतुष्टयम् ।
बाह्यवारं च कुड्यं च नन्द्यावर्तसमाकृति ॥ १५० ॥
दिश्यथैकौ नतद्वारं(?) शाला वाथ चतुष्टयम् ।
जालकं च कवाटं च बाह्येऽबाह्ये तथैव च ॥ १५१ ॥
सर्वतः कुडयसंयुक्तं मुख्यगेहं कभित्तिभाक् ।
कुल्याभद्वारसंयुक्तं मुखचङ्क्रमणं भवेत् ॥ १५२ ॥
अन्तर्विवृतपादं स्याद् बाह्ये कुड्यावृतं तु तत् ।
दण्डकावारसंयुक्तं प्रासादवदलङ्कृतम् ॥ १५३ ॥
चतुर्णामुदितं वैश्यशूद्रयोः प्राग्दिगाननम् ।
तदेवांशावृतालिन्द्रं बहिर्द्वारं प्रशोभितम् ॥ १५४ ॥
अधिष्ठानाङ्घ्रिकादीनां पूर्ववद् योजयेद् बुधः ।
एकद्वित्रितलोपेतं मुण्डप्रासादकानितत(?)॥ १५५ ॥
चतुर्णामपि वर्णानां योजयेत् तद्विचक्षणः ।
व्यासे दशांशके तत्र द्विभागं मध्यमाङ्गणम् ॥ १५६ ॥

परितो वारमेकांशं शालाव्यासं द्विभागतः ।
बाह्यतोऽलिन्द्रमेकांशं भद्रप्रभृति पूर्ववत् ॥ १५७ ॥
यथायुक्ति यथाशोभं तथा हर्म्याङ्गमण्डितम् ।
षट्षडंशे विशाले तु द्विभागं मध्यमाङ्गणम् ॥ १५८ ॥
द्व्यंशं शालाविशालं स्यान्मुखगेहं कभित्तिभाक् ।
पृथुवारं द्विभागं (स्यात्) तद्बाह्ये तु समन्ततः ॥ १५९ ॥
परितोऽलिन्द्रमेकांशं स्तम्भं कुड्यं यथेष्टतः ।
सालिन्द्रं चूलहर्म्याङ्गं यथायुक्ति यथारुचि ॥ १६० ॥
द्वारं च मुखभद्रं चाप्यधिष्ठानादि पूर्ववत् ।
चतुष्टयानां शालानां मध्यवंशोर्ध्वमस्तकम् ॥ १६१ ॥
पुरेऽपुरे भवेत् कूटं पक्षशालाननान्वितम् ।
नन्द्यावर्ताकृतिश्चाथ यथायुक्तं चतुर्मुखम् ॥ १६२ ॥
ऊर्ध्वोर्ध्वमङ्गणं कुर्यात् पक्षशालासमोपरि ।
सभा वा मण्डपं वापि मालिका चाङ्गणक्रिया ॥ १६३ ॥
त्रितलादि तलोपेतमूहप्रत्यूहसंयुतम् ।
द्विजानां च महीपानामेतत् प्रासादकं हि तत् ॥ १६४ ॥
चतुर्दशांशके व्यासे द्विभागं मध्यमाङ्गणम् ।
परितो मार्गमेकांशं द्विभागं गेहविस्तृतम् ॥ १६५ ॥
पृथुवारं द्विभागं स्याद् युक्त्यान्तः स्तम्भसंयुतम् ।
तद्बहिर्वारमेकांशं कुड्यस्तम्भादिमण्डितम् ॥ १६६ ॥
चतुर्दिशाननोपेतं नन्द्यावर्तसमाकृति ।
ऊर्ध्वशालास्तथाष्टस्याच्चतुरस्याद् व्यवस्थिता(?) ॥ १६७ ।

द्वादशास्यसमायुक्तमूर्ध्वाधस्ताद् विशेषतः ।
चतुर्दिक्षु सभद्राङ्गद्वारशालकशोभितम् ॥ १६८ ॥
अनुक्तं हि यथा सर्वं पूर्ववत् कारयेद् बुधः ।
व्यासे द्विरष्टभागे तु द्विभागं मध्यमाङ्गणम् ॥ १६९ ॥
शालाव्यासं द्विभागेन पृथुवारं तु तत्समम् ।
तद्बहिर्वारमेकांशं तद्बहिर्वारमेकतः ॥ १७० ॥
सालिन्द्रं चूलहर्म्याङ्गं यथायुक्ति यथारुचि ।
तस्योपरिगता शाला चतुष्कशिरसा सभा ॥ १७१ ॥
त्रितलाद्यानवतलं भूपभूसुरयोग्यकम् ।
द्वाराणि भित्तयः सर्वे ह्युत्तराद्या ह्यनुक्रमात् ॥ १७२ ॥
प्रासादवदलङ्कुर्यान्नन्द्यावर्तं तु जालकम् ।
यथायुक्ति यथाशोभं तथा कुर्याद् विचक्षणः ॥ १७३ ॥
ऊहप्रत्यूहसर्वाङ्गैर्गेहालङ्कारमिष्यते ।
व्यासे षडंशके तत्र स्वस्तिके द्व्यंशमङ्गणम् ॥ १७४ ॥
तावच्छालाविशालं स्यात् कुल्याभद्वारसंयुतम् ।
पृष्ठे तु दीर्घकोष्ठं स्यात् पुरतः कोष्ठकं तथा ॥ १७५ ॥
पक्षके कर्करीशाला मुखपट्टिकयान्विता ।
विना पट्टिकया पृष्ठे कोष्ठकं पृष्ठसङ्गतम् ॥ १७६ ॥
दण्डिकावारसंयुक्तं षण्णेत्रं भद्रसंयुतम् ।
अन्यत् प्रासादवत् सर्वमलङ्कुर्याद् विचक्षणः ॥ १७७ ॥
प्राङ्मुखं स्वस्तिकं वैश्यशूद्रयोः संमतं बुधैः ।
तदेवांशावृतालिन्द्रं खण्डहर्म्याभिमण्डितम् ॥ १७८ ॥

पूर्ववद् भद्रसंयुक्तमलङ्कारादि पूर्ववत् ।
द्विःषडंशे(श ? ऽथ) मन्वंशे षोडशांशे यथेष्टतः ॥ १७९ ॥

अङ्गणं च बहिर्वारं पृथुवारमलिन्द्रकम् ।
शालाव्यासं द्विभागेन सर्वतः परिकल्पयेत् ॥ १८० ॥

द्वारं च स्तम्भकुड्यं च भद्रं युक्त्या प्रयोजयेत् ।
यथायुक्ति यथाशोभं तथा हर्म्याङ्गसंयुतम् ॥ १८१ ॥

शालाकारं सभाकारं हर्म्याङ्गं वाथ शीर्षकम् ।
एतत् स्वस्तिकमित्युक्तमनुक्तं चात्र पूर्ववत् ॥ १८२ ॥

निष्पट्टाः कोटिसंयुक्ताः कर्णे सोपानसंयुताः ।
रुचिकाख्या विचित्राङ्गा नोदग्द्वाराः प्रकीर्तिताः ॥ १८३ ॥

पाषण्डिनां द्विजादीनां सुराणां वासयोग्यकाः ।
चतुर्णामुदितं राज्ञां सर्वमुर्वीदिवौकसाम् ॥ १८४ ॥
वैश्यानामुदितं सर्वं शूद्राणां सम्मतं बुधैः ॥ १८४½ ॥

उक्तव्यासेनान्विता दीर्घहीना
वेदाश्राभास्ताः सुराणां द्विजानाम् ।
दानादीनां सर्वपाषण्डिकानां
चातुश्शालाः संमताः सद्भिरेव ॥ १८५½ ॥

ए(ते ? तद्) वदन्ति मुनयो विपुले नवांशे
वस्वंशके मुनिपदे रसभागिके तु ।
द्व्यंशं गृहस्य विपुलं त्वथ पञ्चभागे
शालविशालमिह भागमितिक्रमेण ॥ १८६½ ॥

अष्टाष्टहस्तविस्तृतं द्विगुणायतं च
द्विद्वारि पङ्क्तिवदनं द्वयमङ्गणं च ।
षट्सन्धिकं भवनवत् परिमण्डनीयं
तत् सप्तवारमवनीसुरमन्दिरं स्यात् ॥ १८७३ ॥

व्यासे पञ्चांशे नवांशायतं स्यात्
षड्भागे रुद्रांशकैः सप्तभागे ।
द्विःषड्भागैरष्टभागे नवांशे
(द्विस्सप्तांशैः) षोडशांशैस्तु दैर्घ्यम् ॥ १८८३ ॥

एवं पञ्चैवायतं सप्तशाले
पूर्वोक्तव्यासांशके पङ्क्तिभागे ।
दैर्घ्यं सैकार्कैर्विकारैः सप्तसप्त-
धर्मांशैर्विंशत्रयोविंशदंशैः ॥ १८९३ ॥

राज्ञामुदीरितमशीतिकरैर्विशाले
दैर्घ्यं (तु) तत्त्रिगुणमर्कललाटयुक्तम् ।
त्रिद्वारि चाङ्गणगुणान्वितमष्टसन्धि
द्विःपञ्चशालमथ हर्म्यमि(ति ? व) प्रयोज्यम् ॥

वासत्र्यंशं सार्धभागं ह्यलिन्द्रं
त्र्यंशैकांशं वा तदर्धं प्रवेशम् ।
बाह्येऽबाह्ये नालनीप्रं तदर्धं
शालानां स्यादत्र सामान्यमेतत् ॥ १९१३ ॥

निरङ्गणं कर्णगताङ्गणान्वितं
बहुप्रवेशं बहिराननान्वितम् ।

अन्तर्बहिर्वक्रयुतं ह्यसीमकं
वासं न सामान्यगताङ्गणान्वितम् ॥ १९२ ॥

हस्तस्तम्भतुलादिकान् नरगृहे युञ्ज्यादयुग्मं यथा
युग्मायुग्मकसङ्ख्यया सुरगृहे युञ्जीत हस्तादिकान् ।
मध्यद्वारमनिन्दितं सुरमहीदेवक्षितीशालये
शेषाणामुपमध्यमेव विहितं तत् संपदामास्पदम् ॥ १९३ ॥

गर्भं कुर्यात्क्षेत्रके भित्तिभागे
पादाधाराच्छ्रभ्रकाधः क्रमेण ।
मध्यस्य स्याद् वामभागे गृहे वा
शालानां स्यान्मुख्यधामन्यवश्यम् ॥ १९४ ॥

भित्तिव्यासेऽष्टांशके चातुरंशं
बाह्येऽबाह्ये तत्त्रिभागं विहाय ।
मध्ये गर्भं योजनीयं सुराणां
विप्रादीनां मन्दिरे निन्दितं तत् ॥ १९५ ॥

वंशद्वारं नैव विप्रादिकानां
वर्णानामावासके योजनीयम् ।
पाषण्ड्यादीनां मुनीनां गृहे तद्
वंशद्वारं योजनीयं न दूष्यम् ॥ १९६ ॥

आद्यमथात्तविशालं त्रिगुणायामं ततः प्रवृद्धिः स्यात् ।
व्यासद्विगुणे त्रयोविंशति यावत् तावत्तु सैकदशसङ्ख्या॥

पुरतो भद्रसमेतं कर्णसभाकोष्ठनीडमण्डितकम् ।
पृष्ठे वारयुतं वा(पि ! द्वि)ललाटं गर्भकूटसमम् ॥ १९८ ॥

एकद्वित्रितलाढ्यं पुरतः परतो विचित्रनास्यङ्गम् ।
एतद् विहारशालं प्रासादवदेव करणीयम् ॥ १९९३ ॥
सर्वासामपि वक्ष्ये पादायामं तु तस्य विष्कम्भम् ।
सार्धद्विहस्तमादि त्रिभिरथ षड्भिः कराग्रजर्घ्या तु ॥
सार्धत्रिचतुर्हस्तावधिकं यावन्नवाङ्घ्रिकायामम् ।
व्यासं षडङ्गुलं स्यात् तस्मादर्धैकमात्रवृद्ध्या तु ॥ २०१३ ॥
दश च चतुर्दशमात्रं यावन्नवधा विशालं स्यात् ।
पूर्वोदितमानं वा योज्यं युक्तिक्रमेण विद्वद्भिः ॥ २०२३ ॥
स्वव्यासकरं त्रिगुणं कृत्वा वसुभिर्हरेत्तु तच्छेषम् ।
ध्वजधूमसिंहश्वावृषखरगजवायसाश्च योनिगणाः ॥२०३३॥
एषु ध्वजमृगवृषभेभाः शुभयुक्ता न शोभनास्त्वन्ये ॥

सैकत्रिंशद्धस्तविस्तारकाभ्यां
द्वाभ्यां द्वाभ्यां वर्धयेत् तत् कराभ्याम् ।
शालाबाह्ये सैकषष्ट्यन्तमाना-
भीष्टायामा संमता स्यात् खलूरी ॥ २०५ ॥
बहिरबहिरभीष्टा कुड्यपादाङ्गशोभा
शिखरमपि लुपारूढान्वितं मण्डपं वा ।
अमरनरविमानाद्यावृता सा खलूरी
भवनतलविहीनैकद्विभूमिप्रयुक्ता ॥ २०६ ॥
प्रथमावरणे द्वितीयके वा
परभागे सदनं तु योषिताम् ।
निर्ऋतौ सूतिगृहं च वर्चसः
पवनादीन्दुदिक्षु वाङ्गनागृहम् ॥ २०७ ॥

यमदिशि भोजनशाला सोमे धनसञ्चयावासम्।
अग्नौ धान्यागारं खे पक्तिर्व्यञ्जनानि तत्रैव ॥ २०८ ॥

आराधनगृहमीशे कूपं तत्रोदितौ स्नानम्।
यस्मिन् यदुक्तमुचितमन्यानि हि तत्र संप्रयोज्यानि ॥

द्वाराणि च कुड्यानि च युक्त्या तु स्वामिवाञ्छवशात्।
अन्यच्छेषं सर्वं कुर्यादुक्तिक्रमेण दृढतरधीः ॥ २१० ॥

अपिच शिखिनि गोष्ठं नैर्ऋतेऽजाविकानां
पवनदिशि निवासं माहिषं चैशकोणे।
भवति तुरगशाला नागशाला च तस्मिन्
दिशि च दिशि च सर्वे वाहना द्वारवामे ॥२११॥

सामान्यं स्यादेतदुक्तं चतुर्णां
वासे राज्ञां योजनीयं विशेषम्
त्रिप्राकारं च त्रिपङ्क्ति त्रिभोगं
शेषाणां चाप्युक्तनीत्या त्रयाणाम् ॥ २१२ ॥

एकद्वित्रीण्यत्र सालानि नृणां
पञ्च त्रीण्येकादि देवालयेषु।
यत्तत् प्रोक्तं धाममानेन पूर्वं
तत्रैवायोज्यं विधिज्ञैर्नराणाम् ॥ २१३ ॥

इति मयमते वस्तुशास्त्रे शालाविधानं नाम

षड्विंशोऽध्यायः।

अथ सप्तविंशोऽध्यायः ।

वर्णानां गृहविन्यासलक्षणं वक्ष्यतेऽधुना ।
चतुर्दण्डात् समारभ्य द्विद्विहस्तविवर्धनात् ॥ १ ॥

त्रिंशद्धस्तावधिर्यावदेकैकं गृहमानकम् ।
क्षुद्राणामष्टधा प्रोक्तं मध्यमानां विधीयते ॥ २ ॥

अष्टदण्डात् समारभ्य द्विद्विहस्तविवर्धनात् ।
द्वात्रिंशद्दण्डपर्यन्तं गृहाणां मानमिष्यते ॥ ३ ॥

अष्टादिशतदण्डान्तं दण्डाद्यामुत्तमे क्रमात् ।
वाटभित्तेरिदं मानं तदभ्यन्तरतो गृहम् ॥ ४ ॥

चतुरश्रं द्विजानां च नृपाणां च विशेषतः ।
अष्टषट्चतुरंशेन दैर्घ्यं स्यात् क्षत्रियादिषु ॥ ५ ।

हीनं षोडशहस्तेभ्यो गृहमानं न कारयेत् ।
नवाष्टसप्तषड्ढस्तैरुत्तुङ्गात्तुङ्गमानतः ॥ ६ ॥

त्रिचतुर्भागविस्तारा पादोनाग्रविशालका ।
छत्रशीर्षकतुल्याभा छत्रनासीविभूषिता ॥ ७ ॥

चतुर्दिक्षु चतुर्द्वारोपेता तल्पसमायुता ।
द्वारगोपुरसंयुक्ता नानावयवशोभिता ॥ ८ ॥

बहिष्टात् परिघोपेता सर्वरक्षासमन्विता ।
वाटभित्तिरिति प्रोक्ता गृहबाह्यसमावृता ॥ ९ ॥

मृण्मया वा लुपारूढा तृणादिच्छादनान्विता ।
खल्लूरिका वा कर्तव्या वेदिकापादशोभिता ॥ १० ॥

गृहक्रिया हि द्विविधा भिन्नाभिन्नप्रकारतः ।
भिन्नं च पिण्डभेदं च वक्ष्ये स्फुटतरं यथा ॥ ११ ॥

असन्धिकं भिन्नगृहं ससन्धिकं
ह्यभिन्नकं भिन्नगृहेषु तेषु वै ।
चतुर्गृहं दिक्षु गतं प्रधानकं
विदिक्षु वा मण्डपकं खलूरिका ॥ १२ ॥

स्याद् वाटभित्तेरबहिः पृथग् गृहं
त्रयं द्विकं वैकमसम्पदां पदम् ।
तस्माच्चतुश्शालमनिन्दितं परं
सविस्तरं तस्य तु मानमुच्यते ॥ १३ ॥

नीचानां नीच (तिष्ठानां ? मानं स्यात्) श्रेष्ठानां श्रेष्ठमुच्यते
श्रेष्ठमानं निकृष्टानां सर्व (मानं ? दा न) प्रयुज्यते ॥ १४ ॥

क्वचिदिष्टं कनिष्ठानां यन्मानं श्रेष्ठजातिषु ।
अल्पत्वे वा महत्त्वे वा सीमासूत्रे विनिश्चिते ॥ १५ ॥
सायते चतुरश्रे वा चतुष्षष्ट्या विभाजिते ।
रज्जुवंशसिराषट्कचतुष्काष्टकसन्धिभिः ॥ १६ ॥
वर्मशूलं च यत्नेन वर्जयेद् वास्तुकोविदः ।
सूत्रादीनां गृहाङ्गैश्च पीडा चेत् सर्वनाशनम् ॥ १७ ॥
तस्मात् सर्वप्रयत्नेन सूत्रादीनि विवर्जयेत् ।
पूर्वादिमध्यसूत्राणि चान्नं धान्यं धनं सुखम् ॥ १८ ॥
इति नामानि तन्नाम्ना चत्वारि स्युर्गृहाणि च ।
अन्नालयं धान्यालयं धनालयं सुखालयम् ॥ १९ ॥

कर्तव्यं वास्तुमध्ये तु मण्डपं प्रथमं बुधैः ।
वास्तुव्यासचतुर्भागं मण्डपस्य तु विस्तृतम् ॥ २० ॥
पञ्चषट्सप्तभागाष्टनवभागैकमेव वा ।
सप्तहस्तादि षण्मानं द्विद्विहस्तविवर्धनात् ॥ २१ ॥
आसप्तदशहस्तान्तं श्रेष्ठमध्यकनिष्ठकम् ।
एकभक्त्या द्विभक्त्या वा चतुष्पादाष्टपादकम् । २२ ॥
द्विजभूपतिवैश्यानां युग्मपादं प्रकीर्तितम् ।
शूद्राणामन्यजातीनामयुग्मस्तम्भमिष्यते ॥ २३ ॥
द्विजवन्नृपवैश्यानां वैशिष्ट्यं मध्यवेदिका ।
त्रिकालबलिलब्धा च पुष्पगन्धादिपूजिता ॥ २४ ॥
सा त्रितालसमुत्सेधा चोत्सेधसमविस्तृता ।
तन्मध्ये ब्रह्मपीठं स्याद् वेदिकार्धप्रमाणतः ॥ २५ ॥
षट्षडङ्गुलहीनं स्यात् तन्मानं नृपवैश्ययोः ।
शूद्राद्यन्तरजातीनां न कुर्याद् ब्रह्मवेदिकाम् ॥ २६ ॥
सायते चतुरश्रे च तत्तदाकृति मण्डपम् ।
पञ्चतालं समारभ्य त्रित्र्यङ्गुलविवर्धनात् ॥ २७ ॥
नवधा तलिपायामाः सप्तकायान्तमानकाः ।
पञ्चाङ्गुलं समारभ्य त्रयोदशाङ्गुलान्तकाः ॥ २८ ॥
नवधा पादविष्कम्भास्त्वग्रेऽष्टांशविवर्जिताः ।
पादोच्चार्धमधिष्ठानं षडष्टांशोनमेव वा ॥ २९ ॥
पादोच्चे त्रिचतुर्भागं चतुरश्रं च वृत्तकम् ।
वस्वश्रं चित्रखण्डं च स्तम्भानामाकृतिः स्मृता ॥ ३० ॥

शमीखादिरखदिरस्तम्भाश्च द्विजराजयोः।
सिलीन्ध्रं पिशितं मधूकं वैश्यस्तम्भाः प्रकीर्तिताः॥ ३१॥
राजादनं च निम्बं च सिलीन्ध्रः पिशितिन्दुका।
शूद्राणां स्तम्भवृक्षाश्च त्वक्साराः सर्वयोग्यकाः॥ ३२॥
पक्वेष्टकाभिः सुधया मण्डपं द्विजभूपयोः।
वैश्यादीनामपक्वाभिर्नानालङ्कारशोभितम्॥ ३३॥
प्रपा वा तत्र कर्तव्या नालिकेरदलच्छदा।
गृहमण्डपयोर्मध्ये त्रिचतुष्पञ्चषट्कराः॥ ३४॥
एकहस्त द्विहस्तं वा क्षुद्रे मार्गविशालता।
सर्वतः समविस्तारं प्रकुर्यादावृतं पथम्॥ ३५॥
अन्नागारादिमध्यं तु वास्तुमध्यात् प्रदक्षिणम्।
आदित्यनन्दपातालभूताङ्गुलमिति क्रमात्॥ ३६॥
धर्मनन्दाष्टधात्वंशा अन्नाङ्गनादिपातका॥ ३७॥
एकैकाङ्गगतं तत्तत्स्तम्भस्थापनकर्माणि।
वास्तुमध्यादुदक्पूर्वं दक्षिणापरतः क्रमात्॥ ३८॥
गृहाङ्घ्रिमध्ययोर्मध्यभित्तिर्मध्यमिति स्मृतम्।
अन्तर्मुखानि गेहानि वास्तुनश्च बहिर्मुखम्॥ ३९॥
महीधरेन्दुभल्लाटमृगादितिपदाश्रितम्।
सौख्यं महीसुरावासं तत्तारायाममुच्यते॥ ४०॥
पञ्चादिनवहस्तान्तं मध्यार्धं च दशार्धकम्।
सप्तैकादशहस्तं स्यादिति मानत्रयं विदुः॥ ४१॥

चूल्युच्चं सर्वगेहानां गृहान्तं विपुलं भवेत् ।
पादोदयसमा भित्तिः स्वपादत्रिगुणा ततिः ॥ ४२ ॥
गेहतारचतुर्भागपञ्चभागान्तरं क्रमात् ।
पादव्यास इति प्रोक्तं गेहव्यासान्तरात्तु वा ॥ ४३ ॥
यावन्तो विपुले हस्तास्तावदङ्गुलसङ्ख्यया ।
सर्वेषामपि गेहानां स्तम्भविष्कम्भमिष्यते ॥ ४४ ॥
महेन्द्रांशे भवेद् द्वारं मुख्यांशे वारिनिःस्रवम् ।
ब्राह्मणानामिदं सर्वं सम्पदां स्यात् सदास्पदम् ॥ ४५ ॥
महेन्द्रार्कार्य(कः?के) सम्यग् भृशभागे महानसम् ।
त्रिहस्तं पञ्चहस्तं च त्र्यर्धहस्तं षडर्धकम् ॥ ४६ ॥
चतुर्हस्तं सप्तहस्तं चतुरष्टार्धहस्तकम् ।
पञ्चहस्तं नवहस्तं पञ्चमानं महानसे ॥ ४७ ॥
गृहक्षतांशके द्वारं जयन्ते वारिनिःस्रवम् ।
प्राच्यावासं नृपस्योक्तं कोशवाहनवर्धनम् ॥ ४८ ॥
गृहक्षतार्किगन्धर्वभृङ्गराजे विवस्वति ।
धान्यालयं प्रकर्तव्यं तत्तारायाममुच्यते ॥ ४९ ॥
पञ्चहस्तं नवहस्तं षडर्धं च दशार्धकम् ।
सप्तैकादशहस्तं स्यान्नवत्रयोदशहस्तकम् ॥ ५० ॥
एकादशपञ्चदशहस्तं पञ्चप्रमाणकम् ।
पुष्पदन्तपदे द्वारं वितथे वारिनिःस्रवम् ॥ ५१ ॥
विशां दक्षिणवासं स्याद् धनधान्यसुखावहम् ।
पुष्पदन्ते सुरे शोषे वारुणे मित्रके पदे ॥ ५२ ॥

धनालयं धान्यसमं किञ्चिन्न्यूनत्वमिष्यते ।
शूद्रस्य पश्चिमे वासं धनधान्यपशुप्रदम् ॥ ५३ ॥
भल्लाटांशे भवेद् द्वारं सुग्रीवे वारिनिःस्रवम् ।
चतुर्णामपि वर्णानामुक्तं वासविधिक्रमम् ॥ ५४ ॥
स्तम्भस्योपरि कर्तव्यं पोतिकोत्तरवाजनम् ।
तुलाजयन्त्यनुमार्गं फलकां भूमिकल्पनम् ॥ ५५ ॥
कपोतं तत्पदं चैव वितस्तीर्जालकानि च ।
मुष्टिबन्धं मृणाली च दण्डिकां च लुपाक्रियाम् ॥ ५६ ॥
लुपाप्रच्छादनं चैव मुखपट्टिकयान्वितम् ।
गृहस्य दक्षिणे पार्श्वे द्वारं प्रतिमहद् भवेत् ॥ ५७ ॥
द्वित्रिहस्तत्रिहस्तार्धं चतुर्हस्तं च भक्तयः ।
चतुष्पदाद्याद्द्वात्रिंशद्भक्त्या वा वास्तुमण्डपम् ॥ ५८ ॥
एकभक्त्याख्यकत्रिंशद्भक्त्या तालेश्वरप्रपा ।
सपालांशं सविष्टा(?) वा नालितालदलच्छदा ॥ ५९ ॥
गृहाणां गर्भस्थानं तु प्रवक्ष्याम्यनुपूर्वशः ।
देवानां चैव विन्यासे विशेषेण प्रभागतः ॥ ६० ॥
पुष्पदन्ते च भल्लाटे महेन्द्रे च गृहक्षते ।
दक्षिणे नेत्रभित्तौ तु सौम्यादौ तु चतुर्गृहे ॥ ६१ ॥
भित्तिव्यासे नवाष्टांशे बाह्ये तु चतुरंशकम् ।
अन्तस्त्रयांशकं नीत्वा मध्ये गर्भं निधापयेत् ॥ ६२ ॥
स्वामिवासस्य विस्तारे पञ्चषट्सप्तभागिके ।
नीत्वान्तर्भागिकं नेत्रं तस्माद्दक्षिणभागिके ॥ ६३ ॥

स्तम्भमूले विधातव्यं गर्भं गुह्यतरं वरम् ।
द्वारस्य दक्षिणस्तम्भे तद्भित्तौ गूढपादके ॥ ६४ ॥
वस्तुमण्डपमध्यस्य दक्षिणे वाङ्घ्रिमूलके ।
पिण्डभिन्नगृहे गर्भस्थानं पञ्चविधं भवेत् ॥ ६५ ॥
तस्योपरि निधातव्यं मुहूर्तस्तम्भमुत्तमम् ।
विधिज्ञैस्तत्र खदिरं खादिरं च मधूककम् ॥ ६६ ॥
राजादनं यथासंख्यं विस्तारायाममुच्यते ।
भानुरुद्रदशद्वारवितस्त्यायामसंयुताः ॥ ६७ ॥
तत्सङ्ख्याङ्गुलविस्तीर्णाः स्वाग्रेऽष्टांशविवर्जिताः ।
भूतसार्धचतुर्वेदगुणतालनिखातकाः ॥ ६८ ॥
वृत्तकुड्मलखण्डाग्रबुद्बुदाकृतिशीर्षिकाः ।
द्विजादीनां चतुर्णां हि स्तम्भाः सम्यक् प्रपूजिताः ॥ ६९ ॥
पिण्डशाला च कर्तव्या त्यक्तमध्यस्थपादका ।
गृहमध्यमभित्तिश्च पादमध्यमवर्जिता ॥ ७० ॥
तामाश्रित्य तु कुल्याभद्वारद्वयमिहेष्यते ।
यत्र चाभ्यन्तरद्वारं पूर्वदक्षिणतो दिशि ॥ ७१ ॥
दक्षिणे गृहपार्श्वे तु गृहपार्श्वे महानसे ।
अभ्यन्तरे तु यद् द्वारं पश्चिमोत्तरतो दिशि ॥ ७२ ॥
उत्तरे गृहपार्श्वे तु पार्श्वे पश्चिमतो गृहे ।
शालासु भिन्नशालासु सन्धिकर्म न कारयेत ॥ ७३ ॥
देवतास्थापनं पिण्डशालासु तु विधीयते ।
नेष्यते बाह्यदेवानां पङ्कजस्य निवेशनम् ॥ ७४ ॥

शेषाश्च निष्पदाः सर्वे रक्षणार्थं निवेशिताः।
कदाचित् पिण्डशालाभ्यो मध्यं न प्रविधीयते ॥ ७५ ॥
पार्श्वयोः पृष्ठतः पूर्वे पादानां च समुच्चयम्।
प्रवक्ष्याम्यनुपूर्वेण हस्तसङ्ख्यावशात् पुनः ॥ ७६ ॥
त्रिहस्ते वा त्रिहस्तार्धे स्तम्भा अष्टौ समाहिताः।
चतुर्हस्ते च सार्धे च पञ्चहस्ते च सद्मनि ॥ ७७ ॥
द्विरष्टस्तम्भमुद्दिष्टं षट्षडर्धे च सप्तके।
त्रिरष्टाङ्घ्रय उद्दिष्टाः सार्धाष्टनवहस्तके ॥ ७८ ॥
चतुरष्टाङ्घ्रयः प्रोक्ता दशार्धैकादशेऽपि च।
पञ्चाष्टस्तम्भसङ्ख्याः स्युः सार्धे द्वादशहस्तके ॥ ७९ ॥
त्रयोदशविशाले तु षडष्टैवाङ्घ्रयः स्मृताः।
विस्तारे च तथायामे समाः पादास्तु सङ्ख्यया ॥ ८० ॥
सप्तहस्तं तु विस्तीर्णं षड्भागेन विभाजयेत्।
द्विभागेन मुखेऽलिन्द्रं नवहस्तेऽष्टभागके ॥ ८१ ॥
त्रिभागं पुरतोऽलिन्द्रमेकादशविशालके।
दशभागे चतुर्भागमार्यभागे त्रयोदशे ॥ ८२ ॥
षडंशं पुरतोऽलिन्द्रमेवं भागक्रमं विदुः।
स्वामिस्थानस्य विस्तारं चतुष्पञ्चाशदङ्गुलम् ॥ ८३ ॥
अष्टसप्तत्रिमात्रं हि महत्त्वे तु विधीयते।
षट्षडङ्गुलवृद्ध्या तु पञ्चमानं विधीयते ॥ ८४ ॥
षष्टिभागे कृते स्तम्भे षोडशांशेन वेदिका।
वेदिकाद्विगुणं पादं शेषं प्रस्तरमानकम् ॥ ८५ ॥

पादबन्धमधिष्ठानं पादं सर्वाङ्गसंयुतम् ।
उत्तरोपरि भूतानि कपोतप्रतिसंयुतम् ॥ ८६ ॥
व्यालेभमकरैः सिंहैर्नासिकाद्यैरलङ्कृतम् ।
द्वारतोरणसंयुक्तं विचित्रतरभित्तिकम् ॥ ८७ ॥
स्वामित्रासमिदं वासे कर्तव्यं चात्र मण्डपम् ।
न जातु स्वामिनो वासे वंशानुगतशायनम् ॥ ८८ ॥
स्वामिस्थाने स्थिताः स्तम्भा नेत्रभक्त्या प्रकीर्तिताः ।
एकैकान्तरिताः पादा निरन्तरनिवेशिताः ॥ ८९ ॥
मूलस्तम्भार्धविस्तारा यथेष्टालङ्कृतैर्युताः ।
उपर्युपरि वासानां स्वामिस्थानं विधीयते ॥ ९० ॥
इष्टकासुधया वापि फलकामयभित्तिकम् ।
हेमताम्रादिकं चैव राज्ञां यदि विचित्रकम् ॥ ९१ ॥
अन्नागारादिषु द्वौ द्वौ पाञ्चालादिलुपोच्छ्रयौ ।
लुपाक्रियाक्रमं सर्वं पूर्ववत् परिकल्पयेत् ॥ ९२ ॥
धनक्षयो मन्दवेधे तीव्रे स्याद् ऋणबन्धनम् ।
त्रिचूली वैश्यशूद्राणां पञ्च सप्त महीभृताम् ॥ ९३ ॥
ब्राह्मणानां नवैवं तु एकादशं तु दैविकम् ।
पाषण्ड्याश्रमिणां युग्मसङ्ख्या चूली विधीयते ॥ ९४ ॥
गर्भाधानं चङ्क्रमणं काभित्तिं मुख्यवासकम् ।
शिलास्तम्भं तलं कुड्यं नृणां वासे न कारयेत् ॥ ९५ ॥
तृणाद्यैर्मृन्मयं छाद्यं लोष्टैश्छाद्यममृन्मयम् ।
ब्रह्मस्थानं तलं निम्नं गृहान्तस्थलमिष्यते ॥ ९६ ॥

निम्ने गृहस्थले द्वारं प्रच्छन्नजलभूमिकम्।
सर्वेषामपि वर्णानां पादोच्चांर्धं मसूरकम् ॥ ९७ ॥
केचित् स्वभर्तृवक्षोरुनाभ्युत्सेधं वदन्ति वै।
अधिष्ठानं च याम्यादिचतुर्गृहविधौ क्रमात् ॥ ९८ ॥
एकस्यैव प्रधानत्वादीदृशेषु गृहेषु वै।
तस्य कर्तुश्च भोगानां स्थानं तत्रैव कल्पयेत् ॥ ९९ ॥
कश्चिल्लवणयोः पात्रं प्रागुदग्दिशि विन्यसेत्।
अन्तरिक्षे भवेच्चुल्ली सत्यके स्यादुलूखलम् ॥ १०० ॥
ऐशान्यां पचनस्थानं सर्वेषां देहिनां हितम् ॥ १००½ ॥

वसुभाङ्गुलवैपुलोच्छ्रिताभ्यां नयनेशाक्षकराग्रजप्रवृद्ध्या
सविकाराङ्गुलरत्निकान्तमानं कथितं पञ्चविधं हि चुल्लिभेदम् ॥
चतुरर्कांघवसानमास्यतारं पुटतारं च तथैव पृष्ठकूटम्।
समतुङ्गं विपुलं तु चुल्लिकार्धं ह्यधमानामधमादिमानमेव ॥
नरशीर्षकवन्नृपस्य चुल्ली चतुरश्रं द्युसदां महीसुराणाम्।
चतुरायतकं विशां परेषामितरेषामितरेषु सर्वमिष्टम् ॥

इन्द्वग्निभूतमुनिनन्दकरुद्रसङ्ख्या-
श्चुल्ल्यो नृणाममरधाम्नि समासमाः स्युः।
सर्वाः सुरावनिसुरावनिपेषु योग्याः
शेषेषु तत्तदुदिताश्च मता यमीन्द्रैः ॥ १०४½ ॥

अन्नप्राशनमार्यांशे चेन्द्राणी च सविन्द्रके ॥ १०५ ॥
श्रवणं तु विवस्वांशे मित्रांशे तु विवाहकम्।
क्षौरमिन्द्रजये विद्याद् वायौ सोमे च संमतम् ॥ १०६ ॥

व्ययं चोपनयं चैव पितृदौवारिके जले।
सुगले पुष्पदन्ते च प्रसूतिगृहमिष्यते ॥ १०७ ॥
जलकोशमापवत्से कुण्डमापे विधीयते।
अङ्गणं तु महेन्द्रांशे पेषणी च महीधरे ॥ १०८ ॥
वस्तुभेदं प्रवक्ष्यामि पूर्वोक्ते सद्मनि क्रमात्।
दिशाभद्राख्यमादौ तु गरुडपक्षमतः परम् ॥ १०९ ॥
कायभारं तुलानीयमिति वस्तु चतुर्विधम् ।
गेहायामसमं दिक्षु भाद्रकं दिशिभाद्रकम् ॥ ११० ॥
अङ्गणं दिक्षु कर्तव्यं विदिक्षु प्रतिवाटभूः।
शेषं पूर्ववदुद्दिष्टं विशेषाद् द्विजभूपयोः ॥ १११ ॥
वेश्मन्यपि यथा राज्ञां गरुडपक्षविधिक्रमम्।
विस्ताराद्विगुणायाममायामं पञ्चभागिकम् ॥ ११२ ॥
द्विभागं पश्चिमे त्यक्त्वा शेषमष्टाष्टभागिकम्।
मण्डपादीनि सर्वाणि पूर्ववत् परिकल्पयेत् ॥ ११३ ॥
प्रधानं दक्षिणावासं शेषं भोगाधिवासकम् ।
भृङ्गराजाग्निदौवार्ये सुग्रीवे चित्रभागिके ॥ ११४ ॥
अरिष्टाङ्गारिमन्त्यं च तत्रोपस्करभूमिकम्।
वाहनं द्वारवामे च दानशाला च वारुणे ॥ ११५ ॥
असुरे धान्यवासं स्यादायुधं चेन्द्रराजके ।
मित्रावासं तथा मित्रे रोगे लूखलयन्त्रकम् ॥ ११६ ॥
भूधरे कोशगेहं स्यान्नागांशे घृतमौषधम्।
जयन्ते चापवत्से च पर्जन्ये च शिवे क्रमात् ॥ ११७ ॥

विषं च विषसातं च कूपं देवगृहं भवेत्।
सवित्राद्यन्तरिक्षान्तं सव्यञ्जनमहानसम् ॥ ११८ ॥
वितथे पूष्णि सावित्रे भक्तगेहं मनोहरम्।
एवमैश्वर्ययुक्तानां वैश्यानां प्रविधीयते ॥ ११९ ॥
विशां यथार्हकं सर्वं त्यक्तपश्चिमभागकम्।
कायभारामिति प्रोक्तं तुलानीयं प्रवक्ष्यते ॥ १२० ॥
विस्तारद्विगुणायाममायामं सप्तभागकम्।
त्रिभागं वस्तुमध्ये तु चतुष्षष्टिविभाजिते ॥ १२१ ॥
मण्डपादीनि सर्वाणि पूर्ववत् परिकल्पयेत्।
तत्पूर्वापरयोर्द्विद्विभागं त्यक्त्वा प्रयत्नतः ॥ १२२ ॥
पादायामे पञ्चभागे युगांशं द्वारायामं शेषभागं षडंशम्।
त्र्यर्धं द्व्यर्धं चोत्तराधःप्रतिः स्याद् द्वारे बद्धं पूर्ववत् तस्य तारम्॥

तरुणरविमयूखप्रेक्षणादन्नशालं
व्यतिनतमपराह्णे वारुणादस्यजालम्।
धनगृहमतितुङ्गं दुर्निरीक्षं त्रिशङ्को-
रतितरमुरुतुङ्गं दक्षिणागारमिष्टम् ॥ १२४ ॥
मुनिशुभकररश्मिप्रेक्षणादत्र हेतोः
सुरगृहमतिनीचं चाथ कर्तव्यमेव।
द्विजनृपवणिजां वा शूद्रकाणां गृहाणा-
मुदयनतविभागप्रोक्तमायामनैच्ये ॥ १२५ ॥
गृहगतपरमेशं राक्षसे पुष्पदन्ते
शुभकरमथ भल्लाटांशकेंऽशे महेन्द्रे।

धनकुलपशुवृद्धिं शंसते तस्य भर्तु-
गृहगतशुभमानं पादमध्यं च भित्तेः ॥ १२६ ॥
दक्षिणापवरकं गृहेशितुर्वामरङ्गमुदितं तु योषितः ।
तद्विपर्ययमशोभनं तयोश्चित्तदुःखमनिशं ददाति हि ॥१२७॥
मध्यं प्रोक्तं वस्तुगेहाङ्घ्रिकानां भित्तेर्युक्त्या तत्क्रमं सम्पदद्ध्यै ।
तत्तन्मिश्रं सर्वसम्पत्क्षयं स्यात्तस्मात्सम्यक् सम्परीक्ष्यैव कुर्यात्॥
मेषे वृषे चान्नगृहं प्रकुर्यान्मृगेन्द्रके कर्कटके च धान्यम् ।
धनं तुलायामथ वृश्चिके वा सुखालयं वै मकरे च कुम्भे ॥

इति मयमते वस्तुशास्त्रे चतुर्गृहविधानो नाम
सप्तविंशोऽध्यायः ।

अथ अष्टाविंशोऽध्यायः ।

अथ निष्पन्नगृहं प्रविश्य तं त्वरितं न प्रविशेदनिष्ठितम् ।
यदि निष्पन्नमवेशितं चिरं सुरभूतादिगणाश्चरन्त्यलम् ॥ १ ॥
अथ कर्मान्तमुपेत्य तद्गृहं शुभनक्षत्रतिथौ च वारके ।
शुभहोरासुमुहूर्तकोशके करणे लग्नयुते विशेच्छुभम् ॥ २ ॥
पूर्वेद्युर्वासयित्वा द्विजपशुवृषभांस्तर्पयित्वा जलाद्यैः
स्वाध्यायैर्होमशान्तिद्विजवरमुदितैस्तद्गृहं स्वस्तिवाच्यैः ।
पूतं कल्कैर्हरिद्रागरुसरुषपकुष्ठादिकानां वचानां
कुड्ये संलेपितं तैः सह भुवि सलिलैश्चन्दनस्यानुसिक्तम् ॥
पवनस्योत्तरपूर्वभागे त्वधिवासं निशि(मा?चा)रभेत् सुधीः ।
सवितानादि पताकलङ्कनैर्बहुवर्णाम्बरचित्रमण्डपैः ॥ ५ ॥

सितवस्त्रधरः सुवर्णयज्ञः सितपुष्पश्च सितानुलेपनः।
स्थपतिः सुमनाः सुवर्णरत्नैर्विविधैर्निष्ठितभूषणान्वितः॥ ६॥
कलशान् पञ्चकपञ्च वारियुक्तान् नववस्त्रान् मणिहेमसंयुतान्।
मतिमान् शालिगिरौ सतण्डुले ह्युपपीठे तु पदे न्यसेत् ततः॥
बल्यन्नं सितरक्तपीतकृष्णं मुद्गान्नं पयसान्नकं यवान्नम्।
पिष्टान्नं कृसरान्नकं गुलान्नं शुद्धान्नं कलशोत्तरं न्यसेत्॥ ७॥
पर्यङ्कोपरितल्पबन्धने शयने दीपतुरीयसंयुते।
निवसेदम्बरवेष्टिते शुभे स्थपतिः शम्बरमुच्यते सदा॥ ८॥

बलिचरुसकलाश्चं रत्नहेमप्रयुक्तं
दधिगुलमधुपुष्पाज्याक्षताभिस्तु लाजैः।
रजनितगरुकुष्ठानां प्रयोगेऽच्छकल्कै-
र्युतमपि+ तदानां निक्षिपेद्धेमपात्रैः (?)॥ ९॥

भवनविहितदेवान् स्वस्वकोष्ठे निधाय
स्थपतिरमलकुम्भान् हस्तपात्रावलैश्च।
सिततरकुसुमं वै धूपदीपं च गन्धं
दृढतरमतिमद्भिस्त+को धारयित्वा (?)॥ १०॥

प्रणवादिनमोन्तकेन नाम्ना विहितं स्वाम्बरमादरात्सरेम्यः(?)।
प्रथमं विधिना त्वजाभि नत्वा(?)बलिमात्रं विनिवेदयेत्तु तस्मै॥
स्वायंभुवः स्वस्य चतुर्मुखेषु चतुष्टया(?)नान्दिषु तैतिलानाम्।
यथार्हकैः स्वैर्बलिभिश्च पुष्पकैः सगन्धधूपादिभिरत्र तर्पयेत्॥

इन्द्राय पूर्वदिशि बन्धुभिरग्नयेऽग्नौ
याम्ये यमाय निर्ऋतौ सह बन्धुवर्गैः।

पित्रे प्रतीच्यपि बलिं वरुणाय दद्याद्
वायौ सबन्धुरनिलाय बलिं नयेद्धि ॥ १३ ॥
सोमाय सोमपदके दिशि चोत्तरस्यां
मित्रैः सह स्वबलिमत्र निवेदयेत् तत् ।
पूर्वोत्तरे दिशि शिवाय सबन्धुवर्गै-
रेवं हि दिक्षु च विदिक्षु बलिं विदध्यात् ॥ १४ ॥
ईशे चर(न्त्यै!क्यै)ज्वलने विदार्यै व्यपूर्यतानां पितृबाह्यभागे(?)
एवं पुनर्मारुतबाह्यभागे स्यात् पापराक्षस्यपि भोजनीयाः ॥
स्तम्भे वनाय च दिनाय दिवाचरेभ्यो
दिक्षे(?) च तत्र च विदिक्षु निशाचरेभ्यः ।
उ(र्वी ? र्व्या) क्षिपेद् बलिमघोरगदेवताभ्यो
धर्माय वीर्यविदिवेऽखिलदेवताभ्यः ॥ १६ ॥
द्वारस्य वामपदके मनवे परेभ्यो
दद्युच्छ्रयैः(?) +शयने विधिना बलिं तत् ।
शालासु मण्डपसभास्वथ मालिकायां
मध्येऽङ्गणं तु मुखमण्डपके विमाने ॥ १७ ॥
धान्येष्टकेष्टपदकेऽभ्यमरान्त्य(म!मां)स्ता-
नाहूय गन्धकुसुमादिभिरर्चयित्वा ।
दत्त्वोदकं सुबलिमत्र निधाय पश्चाद्
देयं जलं स्थपतिना विहितं च धूपम् ॥ १८ ॥
तुलसिसर्ज्जरसार्जुनमञ्जरीघनवचाकपटोलसगुग्गुलुः ।
त्रपुषहिङ्गुमहौषधिसर्षपाः कुरवकोऽत्र सदैव सधूपराट् ॥ १९ ॥
ददति धान्यधनानि बहून्यहो हरति भूतपिशाचसराक्षसान् ।

दहति कूटभुजङ्गममक्षिकान् मशकमूषिकलूतिकलूतकान् ॥
पश्चाच्च पात्रान्तिकपश्चिमांशे धान्यास्तरे तक्षकसाधनानि ।
सर्वाणि विन्यस्य बलिं च दत्त्वा तेभ्यो वदेत् संग्रहमध्यमस्थः ॥
निरुजा मुदिता सधना प्रतिका यशसा महताद्भुतवीर्ययुता ।
सततं निरुपद्रवकर्मयुता पृथिवी पति जीवतु कर्मविधे(?) ॥
धारानिपातात् सलिलप्रकोपाद् दंष्ट्रानिपातात् पवनप्रकोपात् ।
अग्नेश्च दाहान्मुषिताच्च चोराद् रक्षन्त्विदं सद्म शिवं च मेऽस्तु ॥

उक्त्वैवमेवमखिलान्यपि साधनानि
स्थित्वा प्रणम्य शिरसा स्थपतिः कराभ्याम् ।
आदाय तानि सकलानि तदीयबाहौ
सम्यङ् निधाय विधिना स्वजनैः सभृत्यैः ॥ २४ ॥
संग्राह्य बन्धुजनपुत्रसहायकाद्यै
र्गच्छेत्स्वकीयभवनं प्रति तुष्टचेताः ।
संन्यस्य सर्वमततद्बलिशेषमन्नं
सम्यक्क्षिपेत्सलिलके गृहदेवताभ्यः ॥ २५ ॥

अथ सम्यग् गृहमार्जने कृते सितकुष्ठागरुचन्दनाम्बुभिः ।
कलशोदैरपि गन्धसंयुतैर्मणिहेमाम्बुभिरत्र सेचयेत् ॥ २६ ॥
अथ सिद्धार्थकलाजशालिकान् भवनाभ्यन्तरतो विकीर्य++ ।
उपदंशैर्युतमष्टधान्य++धनरत्नं गृहवस्तुवेदय सर्वम् ॥ २७ ॥

गृहपति(ग?गृहि)णी समङ्गलौ च
सुजनसुभृत्यसुतानुजाभिधौ(?) ।
स्वभवनं गृहिवस्तुसमग्रकं
प्रविशताम(वि?नु)चिन्त्य जगत्पतिम् ॥ २८ ॥

प्रीत्या प्रविश्य गृहवस्तु निरीक्ष्य सर्वं
तौ दंपती च शयनेऽप्युपविश्य पश्चात् ।
सव्यञ्जनोदनमथो गृहिणी गृहीत्वा
निर्वर्तयेद् गृहबलिं बलिशेषमन्नम् ॥ २९ ॥

स्वमूलादास्यै स्वकुलानुगां वै(?) गत्वाथ देवद्विजतक्षकादीन् ।
धनैश्च रत्नैः पशुभिश्च धान्यैः सन्तर्प्य वस्त्रादिभिरत्र नित्यम् ॥

स्वजनगुरुजनाद्यैर्मित्रभृत्यादिवर्गै-
रनुगतजनवृन्दैरत्र भोक्तव्यमादौ ।
गृहपतिरपि पत्नी तत्र नत्वा गुरूंस्त-
त्सुतजनमपि पौत्रैर्भोजनीयान् क्रमेण ॥ ३१ ॥

अम्भोभिः पूर्णकुम्भैः सफलकदलिकामञ्जुलैः पूगवृक्षै-
र्दीपैरश्वत्थपत्रैः सिततरकुसुमैः साङ्कुरैः पालिकाभिः ।
कन्याभिर्मङ्गलाभिर्युवतिभिरमलैर्विप्रमुख्यैरुपेतं
द्वारं तत्तोरणाढ्यं गृहमनघतरं वेशयेद् वेश्मनाथम् ॥ ३२ ॥

सितवस्त्रजलप्रदीपपूर्णं सितकुसुमाम्बरधारणं सुहृष्टम् ।
गृहपतिपुरतो यथा विवाहे गृहिणिकरग्रहणं गृहप्रवेशे ॥ ३३ ॥

अदत्तबलिभोजनमदच्छदमगर्भं
द्विजस्थपतिकादिभिरतर्पितमतल्पम् ।
विशत्यपि गृहं यदालमेव हि विशत्यौ (?)
विपत्पदविमेयमतितुष्टहृदयः सः ॥ ३४ ॥

अतिसन्तुष्टमना गृहेश्वरो युतयोषित्स्वजनप्रियानुगः ।
स्वगृहं प्रविशेत् प्रविश्य(वि?चै)वं शुभवाग्भिः परिपूर्णतर्णकः ॥

ग्रामाग्रहारपुरपत्तनकादिकानां
देयो बलिङ्गपटके(?) च विदिक्षु दिक्षु ।
सन्दौ चतुष्कसहिते सुरमन्दिरे च
श्रेष्ठेकजायनिलयेऽखिलदेवताभ्यः(?) ॥ ३६ ॥

इति मयमते वस्तुशास्त्रे गृहप्रवेशो नाम
अष्टाविंशोऽध्यायः ।

अथैकोनत्रिंशोऽध्यायः ।

अथ वक्ष्ये राजगृहं संक्षेपाद् बाह्यनगरशिबिरयुतम् ।
त्रिचतुर्भागे नगरे प्राच्यां वाप्युक्तशालायाम् ॥ १ ॥
नरपतिगृहमथ राज्ञा दक्षिणतः पश्चिमांशे तु ।
पूर्णे योधकभवनं स्यात् सप्तनवांशे प्रतीच्यां तु ॥ २ ॥
अङ्कुरादीनां भवनं(शेनासा?सेनेशा)नां हि तत्रैव ।
विश्वनृपैश्वरभवनं मध्येवासं त्रिभागभागेषु ॥ ३ ॥
नगरांशवशान्मानं ह्येतद्दण्डेन (सो? सं)वक्ष्ये ।
सचतुश्चत्वारिंशच्छतदण्डे वेश्मविस्तारम् ॥ ४ ॥
युगवसुभानुविकारैर्दण्डैः क्षपयेत् ततः क्रमशः ।
द्वात्रिंशद्दण्डान्तं वेश्मव्यासं(तो? तथो)क्तानाम् ॥ ५ ॥
तत्तद्वेश्मविशालामूर्ध्वे संवर्धयेत्तु तथा ।
सप्तचतुर्दण्डयुतपञ्चशतज्येष्ठविस्तारम् ॥ ६ ॥
द्वात्रिंशद्दण्डादाद्वात्रिंशन्मानमेवमुद्दिष्टम् ।
ज्येष्ठाज्येष्ठविशालमन्येषामन्यदिष्टं स्यात् ॥ ७ ॥
दैर्घ्यं व्यासद्विगुणं द्विगुणं पादोन(वा? म)र्धकं पादम् ।
द्वादशशालाकारं चतुरं वृत्तं तदायतं शकटम् ॥ ८ ॥

नन्द्यावर्त्त कौक्कुटमिभकुम्भं स्वस्तिकं चैव ।
गोलापञ्चमृदङ्गमग्निमिति ह्येकमानयुतम् ॥ ९ ॥
इष्टव्यासायामं प्रागेवालं विचिन्त्य कर्तव्यम् ।
तस्माद्धीनं यत्तन्निष्पन्नं वास्तु येन केनापि ॥ १० ॥
अशुभमवनीपतेस्तत् सततं विपदां पदं भवति ।
पौराणां यद्वस्तु वर्धितुमिच्छेद्बहिस्ततस्तस्मात् ॥ ११ ॥
प्रागुत्तरदिशि वृद्धिः शस्ता परितस्तु वा न्याय्या ।
प्रागङ्गणमथ मुख्यं दक्षिणतो वाप्यथाङ्गणं श्रेष्ठम् ॥ १२ ॥
वेश्माभ्यन्तरमध्ये दण्डार्धव्यासतुङ्गपीठं (स्यात) ।
दण्डेन बहिस्तस्मात् पीठेनैवात्र एव सहवेदी ॥ १३ ॥
तद्वेद्या दक्षिणतः पञ्चकषड्हस्तदण्डकं नीत्वा ।
क्षोणीभृतां प्रतिभवनं वेद्यादपरे तु सूत्रमध्यगतम् ॥
तद्वेद्या उत्तरतस्तावन्मानं विहाय तद्वेद्या ।
प्राक्सूत्रमध्यगतं देव्या धाम्नस्तु तत्र तत्रैव ॥ १५ ॥
त्रिष्षोडशदण्डा वा द्वात्रिंशद्दण्डमानका वापि ।
सचतुर्विंशतिदण्डाः षोडशदण्डं तु वाथवा नीत्वा ॥
नृपतिर्दैर्घ्यायामं बहिः प्राकारत्रिहस्तविस्तारम् ।
एकादशकरतुङ्गं तद्बाह्ये सप्तहस्तमानेन ॥ १७ ॥
परितः पन्थास्तिस्रस्तस्मान्नवदण्डमाया(वल्य?म)म् ।
वेश्मावल्या वृत्तं कूटतति(सेत्व?स्त्व)र्कदण्डमानेन ॥
सार्धदशा(व?द)त्युच्चं तस्मात् पन्था बहिस्तु नवहस्तैः ।
तस्माद् द्विष्षोडशभिर्दण्डैर्मर्यादिरेव भित्तिः स्यात् ॥ १९ ॥

व्यासात् सपाददण्डं पञ्चदशारत्निभिस्तु तत्तुङ्गः ।
भित्तेरभ्यन्तरतः परितो मार्गस्त्रिदण्डेन ॥ २० ॥
द्वादश भवनं दण्डान्यथ रक्षावेशनानि योज्यानि ।
भित्त्याभ्यन्तरतो वा बाह्याद् वा मानयेद्दढतरति(?) ॥
त्रिप्राकारं त्रिपथं त्रिभागयुग्घीननृपभवनयुतम् ।
सचतुर्गोपुरकान्तं मुखगोपुरमुन्नतं हि तत्रैव ॥ २२ ॥
निम्नं पाश्चिमवेशं मुख्यं स्यात् प्राङ्मुखं भवनम् ।
दक्षिणमुखमपि व्यालं नोदक्प्रत्यग्दिशि सुभद्रमुखम् ॥
पञ्चमुखं त्वथ राज्ञां नेष्टं स्याद् वेशनं चयं तस्य ।
राज्ञां श्रीदेवीनामालयकान्तरालयं केचित् ॥ २४ ॥
अथ मध्ये त्वाङ्गणकं शतपादयुता प्रपा वा स्यात् ।
दक्षिणतो राजगृहमभिषेकं स्यात् प्रतीचीतः ॥ २५ ॥
उत्तरदिशि भवनं स्याद् राजमहिष्यास्त्वनेकमेकतलम् ।
पश्चिमदिग्गतभवनं प्राङ्मुखमेवावनीपतेर्मुख्यम् ॥ २६ ॥
परितः परिखा बाह्ये प्राकाराण्येव द्वित्रिदण्डानि ।
नवदण्डविशालान्तं परिखाविपुलं समुद्दिष्टम् ॥ २७ ॥
परिखाया बहिरबहिर्मार्गविशालास्त्रिदण्डेन ।
परिखामूलविशालं स्वव्यासादष्टकेन भागेन ॥ २८ ॥
गाम्भीर्याद् युक्तिवशादाकृत्या चैव पालिकाभासा ।
भवनस्य बहिर्देव्या यानि गृहाण्यत्र तत्र युक्त्या तु ॥
तानि च दैविकभागे सम्यग् वक्ष्येऽहमत्रापि ।
अन्तर्मण्डलबाह्यं तु दैवतांशवशाद् गृहम ॥ ३० ॥

अर्याशे द्वारहर्म्यं स्याच्चन्द्रे सूर्येऽङ्गणं भृशम् ।
(प्र?भृ)शे व्योम्नि च वृत्तं (स्यात्) पूष्णे हेमं सदक्षिणम् ॥
शालानां वित(थो?थि)राक्षादभूदङ्गणकं विदुः(?) ।
सेनावेशनहर्म्यं तु यमभागेऽतितुङ्गवत् ॥ ३२ ॥
गन्धर्वे नीडभा नृत्तयोग्या रङ्गविभूषिता ।
विमानमन्दिरं वापि शाला वा हर्म्यमेव वा ॥ ३३ ॥
भृङ्गराजेऽश्वशाला (भ्या ? स्याद्) वृषे चार्तवसूतिका ।
पितरि स्थानहर्म्यं स्याद् दौवारिकसुवर्णयोः ॥ ३४ ॥
जललीला विधातव्या पुष्पदन्ते खलूरिका ।
लवणं तत्र विज्ञेयं मरीन्त्राद्यंशतोचितम् ॥ ३५ ॥
वरुणासुरशोषेषु मित्रे स्याच्छङ्करालयम् ।
राजदेवीगृहं गर्भागारदक्षिणवामयोः ॥ ३६ ॥
गेहनृत्तरसाङ्गानि मित्रे सो(मा?प)स्करं गृहम् ।
अन्तर्विवृत्तवेशार्थं रोगादिमुपदापणे(?) ॥ ३७ ॥
वर्तमानादिकं चापि शालानां पादशालकम् ।
नागे सैरन्ध्रिधात्रीणां मुख्ये कन्यागृहं भवेत् ॥ ३८ ॥
भैषज्यं चापि भल्लाटे मृगे सांवाहिकागृहम् ।
रुचकादिचतुश्शालाविमानं वात्र योजितम् ॥ ३९ ॥
अभितो मज्जनागारमुदीच्यामापवत्सयोः ।
पानीयोष्णोदकं धाम यच्च प्रासादवद् बुधैः ॥ ४० ॥
स्वेष्टदैवतमीशाने जयन्ते च विधीयते ।
महेन्द्रे भोजनस्थानं महीधरमरीचयोः ॥ ४१ ॥

सम्बन्धो वात्र कुर्वीत सभापर्वतकूर्मवत् ।
द्वारश्च भित्तयः सर्वाः स्वामिपार्श्ववशा(त्मनः?न्मताः) ॥
प्रथमावरणे प्रोक्ता द्वितीयावरणे क्रमात् ।
इन्द्रे मातृगृहे छत्रभेर्यादीनां निवासकम् ॥ ४३ ॥
शङ्खकाहलतूर्याणामन्येषां तत्र सम्मतम् ।
सत्ये दानार्चिते शाला भृशे धर्मोदकालयम् ॥ ४४ ॥
पङ्क्तिले ज्वलनांशे तूलूखलं चेन्धनादिकम् ।
पूषाभागे तु सालीन्द्रे वितथे वाजिशालकम् ॥ ४५ ॥
पूर्वस्थाः पश्चिमद्वारा दक्षिण(स्थमु ? स्था उ)दङ्मुखाः ।
पश्चिमस्थाः पूर्वमुखा उदक्स्था दक्षिणाननाः ॥ ४६ ॥
सर्वे गृहस्य मार्गेणान्तरिताः सद्मसम्मुखाः ।
राक्षसे शस्त्रशाला स्याद् द्वारशालाथ वामके ॥ ४७ ॥
व्यालकामीन्द्रकाजालिप्रभृतीनां मृली (?) भवेत् ।
धर्मराजेऽन्नपानादिकर्मणामालयं भवेत् ॥ ४८ ॥
मध्यरङ्गसमायुक्तां चतुश्शालां समालिखेत् ।
सेनापतेः प्रशस्ते स्याद् गन्धर्वांशे (ज्वला?जया)वहम् ॥
भृङ्गराजसमान्या वाजिता वा शालका मता ।
व्यालकामीन्द्रकाजालिप्रकृतीनां मृषा भवेत् ॥ ५० ॥
निर्ऋतौ माहिषं गेहं दौवारिकसुवर्णयोः ।
दानशालेक्षणाशालास्नानपीठादिके गृहे ॥ ५१ ॥
नागे रुद्रांशके चैव सायतादिपुका भवेत् ।
कन्यकानां च धात्रीणां मुख्याभागे विमानकम् ॥ ५२ ॥

कञ्चुकीनां च माघूनामन्यत् सामान्यतो बुधैः (?) ।
भल्लाटे सोममार्गांशे तृणादीनां निवासके ॥ ५३ ॥
कुब्जिनीवामनीकन्याषण्डकीनां तथादितौ ।
धात्रीणामुदितौ गेहमीशे पर्जन्यके पदे ॥ ५४ ॥
आ(पश्चै?पे चै)वापवत्से च वापी कूपं च दीर्घिका ।
पानीयसदनं पुष्पोद्यानं तत्रैव कीर्तितम् ॥ ५५ ॥
जयन्ते दक्षिणे शाला दानशाला सुरेन्द्रके ।
धाम्नस्त्वभिमुखा सर्वा शाला प्राग्दक्षिणान्विता ॥ ५६ ॥
इन्द्रे शास्त्रं रवौ गानं स(र्धे?त्ये) चाध्ययनं भृशम्
महामहानसं व्योम्नि गौर्वत्सा पूष्णि पावके ॥ ५७ ॥
वितथे लवणं चैव वल्लूरस्थायुचर्मणाम् ।
राक्षसे नागवासं च चित्रशिल्पादिसौधकम् ॥ ५८ ॥
धर्मांशे दण्डकावासं शूर्पं वा लाङ्गलं तु वा ।
गन्धर्वे भृङ्गराजे च रसादीनां निवासकम् ॥ ५९ ॥
मृष्टे दार्हन्तु(?) पित्रंशे दानं दौवारिके मतम् ।
सुग्रीवे मल्लधामं स्यात् पुष्प(गे ? के) युगकोष्ठकम् ॥ ६० ॥
वारुणे युवराजस्य शाला वा (मा)लिका भवेत् ।
हयेभसदनं चैव पुरोहितगृहं तथा ॥ ६१ ॥
असुरे चेन्द्रशाला स्याच्छोषे शरभकालयम् ।
खरोष्ट्रायतनं रोगे भैषज्यं च प्रकल्पयेत ॥ ६२ ॥
वायौ वापि भवेद् गोत्रनागे पुष्करणी च वा ।
मुख्यभल्लाटयोर्हस्तिवाजिशाला विधीयते ॥ ६३ ॥

सोमे प्रसूतिका चोपनीतिका च प्रवक्ष्यते ।
ऋभादीन्युदिताशाले जयन्तीदीर्घिकादिका ॥ ६४ ॥
विहाराराममूमिः स्यात् तत्र साङ्गणका सभा ।
द्वितीयावरणे प्रोक्ता सर्वेषा(भ्या?म)न्तरा(न)ना ॥ ६५ ॥
वेश्मनां पुरतः पार्श्वे शेषराजबलावलम् ।
तद्वाह्ये वणिजादीनां वासपङ्क्तिस्तु युक्तितः ॥ ६६ ॥
अपरे दीर्घिकायामं वापीकूपादिकं क्रमात् ।
तत्रैवान्तःपुरं मूलं भृत्यानां वासपङ्क्तिकम् ॥ ६७ ॥
सर्वत्र दीर्घिकाराममवापीकूपसमान्वितम् ।
नानाजातिसमाकीर्णं नानास्त्रीजनसंयुतम् ॥ ६८ ॥
नानाशिल्पसमोपेतं षड्बलैः परिपूरितम् ।
प्रागुदक्प्रागवाक्कोणे शाला हस्त्यश्ववासका ॥ ६९ ॥
नानावर्णसमोपेता नानापणिकयान्विता ।
सर्ववर्णयथाराजास्वस्यनाम्नाभिधानका(?) ॥ ७० ॥
नगरावृतसालः स्याद् विशालः स्याद् द्विदण्डकम् ।
कथ्यते पञ्चषट्सप्तहस्तैर्वा विस्तरं क्रमात् ॥ ७१ ॥
व्यासद्वित्रिगुणोत्सेधं बहिर्वास्तुचयान्वितम् ।
अभीप्सित+तुर्वात्रपरिपावप्रयोमतम्(?) ॥ ७२ ॥
तद्बहिः शिल्पिकोपेतं सर्वत्रै(व) समन्वितम् ।
सर्वेषां संप्रशस्तं स्याज्जहाल्पे च गोपुरम् ॥ ७३ ॥
स्वाम्यावाससमं बाह्यगोपुरं प्रविधीयते ।
अल्पत्वे स्वामिवासस्य तलादेकोनमिष्यते ॥ ७४ ॥

नन्दरुद्रतले मूले सप्तभूद्वारगोपुरम् ।
एकैकतलसंख्याभिर्हीनमभ्यन्तरे क्रमात् ॥ ७५ ॥
विशेषेण नरेन्द्रेण नरेन्द्रद्वारमुत्तमम् ।
राक्षसांशेऽथवा मुख्या द्वारपञ्चत्रिभूमिकम् ॥ ७६ ॥
पुष्पदन्ते च भल्लाटे द्वारं नीचतलान्वितम् ।
सुग्रीवांशेऽथवा मुख्ये जयन्ते वितथेऽपि च ॥ ७७ ॥
पक्षद्वारं प्रकर्तव्यमेकद्वितलसंयुतम् ।
अष्टसालं बहिःसालं सच्छिद्रं च सचक्रकम् ॥ ७८ ॥
विशेषेण नरेन्द्राणामिन्द्रभागे तु मन्दिरम् ।
ब्रह्मांशमाश्रितं वेश्म सर्वसम्पत्सुखावहम् ॥ ७९ ॥
सकलक्षितिपेन्द्राणामेकादशतलं भवेत् ।
नवभूमिर्द्विजा(राज्ञां?तीनां) नृपाणां सप्तभूमकम् ॥ ८० ॥
षट्तलं मण्डलीकुड्य पञ्चभूमावराजते ।
वैश्यानां तु चतुर्भौमं योधसेनेशयोरपि ॥ ८१ ॥
एकादित्रितलान्तं च शूद्राणां प्रविधीयते ।
सामन्तप्रमुखादीनां कारयेत् पञ्चभूमकम् ॥ ८२ ॥
युग्मं वायुग्मभूमं वा सर्वभूपेन्द्रमन्दिरम् ।
राज्ञां स्त्रीणां च देवीनां युग्मं वायुग्ममेव वा ॥ ८३ ॥
सदण्डिकं लुपारोहि द्विनेत्रं प्रस्तरान्वितम् ।
मृण्मयं तु तृणाच्छाद्यमेकद्वितलसंयुतम् ॥ ८४ ॥
स्तूपित्वर्णलुपाहीनं प्रशस्तं सर्वजातिषु ।

मिश्रितान्तरवर्णानां संपदैश्वर्यभोगिनाम् ॥ ८५ ॥
रुचकादिनिवासांश्च युक्त्या तत्र प्रयोजयेत्।
अनुक्तं सर्वमत्रैव युक्त्या तद् योजयेत् सुधीः ॥ ८६ ॥
सामान्येनोदिता राज्ञां राजधानी तु पण्डितैः।
विशेषेण नरेन्द्राणां वक्ष्ये वेश्म सनातनम् ॥ ८७ ॥
प्राकारो विपुलो दण्डपरिखा द्वित्रिदण्डकैः।
वृत्तमार्गश्चतुर्दण्डैर्विंशद्दण्डैर्गृहावलिः ॥ ८८ ॥
वेश्यालीलावृतो मार्गस्त्रिचतुर्दण्डमानतः।
वप्रमार्गस्त्रिदण्डं स्यात् प्राकारं पञ्चहस्तकम् ॥ ८९ ॥
तस्यापि परिघा प्रोक्ता चतुर्दण्डैकविस्तृता।
परिघापरितो मार्गाश्चाष्टयष्टिविशालकाः ॥ ९० ॥
ततोऽष्टचत्वारिंशद्भिर्विश्वापालिरधावृता।
तद्बहिः परितो मार्गाः षट्सप्ततनुरादिकम् ॥ ९१ ॥
चतुर्दण्डं ततो विप्रप्राकारं सप्तहस्तकम्।
दण्डेनैकेन विधृतं नागपूरितबन्धनम् ॥ ९२ ॥
अष्टदण्डादिसूर्यान्तं परिघाविपुलं भवेत्।
बाह्याभ्यन्तरमार्गं तु प्राकारविपुलं तथा ॥ ९३ ॥
तद्बहिर्दशदण्डेन सीमा सर्वजनालया।
प्राकारं वा सत्रासं च परिघाश्च समीरिताः ॥ ९४ ॥
वप्रः प्राकारमित्येवं वास्तुविद्भिः प्रशंसितम्।
पञ्चावरणकं शस्तावरुणा द्विचतुष्टयैः ॥ ९५ ॥
अन्तःपरिवृतं युक्तियुक्तीतीक्ष्येनिवेशयेत्(?)।

आत्तविशालायामे पश्चांशेंऽशं मुखेऽमुखे नीत्वा ॥ ९६ ॥
शेषे षण्णवभागे त्रिंशतिपञ्चांशब्रह्मवस्तु स्यात् ।
तस्मिन् शतपादयुतं मण्डपमन्तस्तु वेदिकापीठम् ॥९७॥
अन्तरसंयुतयत्तत्प्रासादो वा प्रवाततः परितः ।
पन्थाभागस्तेन समा दशखल्लूरिका परितः(?) ॥ ९८ ॥
द्वारचतुष्टययुक्ता सौष्ठिककोष्ठान्विता तथा शुभदा ।
युक्त्यासनमिदमुदितं तन्मुखदेवांशके तु नवके वा ॥
प्रासादादिष्टांशे दक्षिणतो राजकत्वे वा ।
उत्तरदिश्यपि दिष्टं ज्येष्ठयुवत्यालयं तु ततः ॥ १०० ॥
आर्यपदे(ह्नि ? नि)हितं तद्वारकहर्म्यप्रतीच्यवितनम्(?) ।
शाला वा ह्यभिषेका सर्वविचित्रान्विता सभा तत्र ॥१०१॥
कर्णचतुष्टयकेऽन्त(र्वृद्ध ? र्द्ध)ढपदयुक्ता सभा खल्लूरियुता ।
प्रागुत्तरदिशि सलिलं स्नानं देवालयं तु होमाग्रम् ॥
सेनालोकनहर्म्यं कूटं वा प्रागवाग्दिशि यत्तत् ।
पश्चिमदक्षिणकोणे नृत्तकवाद्यादिलीलया च सभा ॥
उत्तरपश्चिमकोणे वासं स्याद् गीतकादिवनितानाम् ।
प्राच्यां दिश्यङ्गणकं दुर्गाया मेरुगोपुरकम् ॥ १०४ ॥
प्रागुत्तरदिशि सलिलं तत्क्रीडाङ्गणं च सभा तत्र ।
ग्रासनपानायतनं कुर्यात् स(म्यक् तु) लक्षणाभियुतम् ॥
तत्प्राग्दक्षिणकोणे मध्याङ्गणकान्विता सभा तत्र ।
रत्नाष्टापदवस्त्रप्रभृतीनां वासमिष्टं स्यात् ॥ १०६ ॥
तत्परदक्षिणकोणे मध्याङ्गणकादिसंयुता च सभा ।

तद्बहिरावृतभागे यत्र स्वभवनानि तत्र वनितानाम्॥
अपरे चारामयुतं वासक्रीडान्वितं तु तत् सजलम्।
प्रत्यगुदग्दिशि कोणे सर्वस्त्रीणान्विता(?) सभावासम्॥
अत्रानुक्तं सर्वं पूर्ववदिष्टं बहिस्त्वयस्त्वबहिः(?)।
एतत् पद्मकमुदितं राज्ञामावासकं मुनिभिः॥ १०९॥
गृहीतविपुलायामे स्थानीयांशे तु मध्यमम्।
सकले ब्रह्मणः पीठं वेदिकान्तं तु मण्टपम्॥ ११०॥
दक्षिणे चोत्तरे चैव राजदेवीगृहं भवेत्।
पश्चिमे नृपतीशस्य मन्दिरं बहुभूमिकम्॥ १११॥
प्राच्यां दिश्यङ्गणं मध्ये द्वारशोभादिमण्डितम्।
द्वारस्य पश्चिमे प्राच्यादभिषेकालयं भवेत्॥ ११२॥
एतत्पीठपदे न्यासं तस्मिन् सालं तु पूर्ववत्।
उपपीठपदे तस्माद् बाह्ये पूर्वादिषु क्रमात्॥ ११३॥
जयन्ते जानुभागे च भृशभागेऽङ्गणं भवेत्।
तन्मध्ये द्वारहर्म्यं स्यात् त्रितलादितलान्वितम्॥ ११४॥
अन्नं महानसे कुर्याद् द्वितले मूलकोजकम्।
तस्मिन् पादांशमाश्रित्य द्वारप्रासादयोगिकम्॥ ११५॥
यमे भृङ्गे नृपे चैव पित्रंशे योषितां गृहम्।
शुभगे नृत्तशाला स्याद् वारुणे नृपमन्दिरम्॥ ११६॥
शोषे चान्तःपुरं वायौ वापीक्रीडासमन्वितम्।
मुख्ये वासं महिष्यास्तु शाला वा मालिका भवेत्॥
सोमभागे तुलाभारं हेमगर्भं तु तत्परे।

दित्यंशे हेमरत्नानि गन्धागारमिहोच्यते ॥ ११८ ॥
तत्रैव हस्तिशाला स्यादीशे वापी च कूपकम् ।
वचोगेहं(?) तु तत्रैव जलयन्त्रं विधीयते ॥ ११९ ॥
तत्र तालं च मार्गं च पूर्ववत् परिकल्पयेत् ।
स्थण्डिलं तद्बहिर्भागे पर्जन्यांशे महेन्द्रके ॥ १२० ॥
भानुसत्यान्तरिक्षा वै वाङ्गणं कारयेत् सुधीः ।
महेन्द्रांशे भवेद् द्वारं चतुष्पञ्चतलान्वितम् ॥ १२१ ॥
तत्रैव शङ्खभेर्यादितौर्यशब्दादिचित्रकम् ।
अनुक्तं पूर्ववत् सर्वं परितः प्रविधीयते ॥ १२२ ॥
परमशायिबाह्ये तत् तत्प्राच्यामङ्गणं भवेत् ।
जयन्ताद्यन्तरिक्षान्तमङ्गणं कारयेद् भृशम् ॥ १२३ ॥
अनुक्तं पूर्ववत् सर्वं श्यानांशादिक्रमेण च ।
स्थानीये तद्बहिर्भागे प्राच्यां दिश्यङ्गणं भवेत् ॥ १२४ ॥
अङ्गणस्य तु विस्तारं दैर्घ्यंद्विसप्तभागिकम् ।
द्वारगोपुरसंयुक्तं दुर्गाधामसमन्वितम् ॥ १२५ ॥
महामहानसं तस्य प्राग्दक्षिणगतं भवेत् ।
तत्र कर्मान्तवत्सानां लेखनानां तु कर्मिणाम् ॥
दक्षिणे चाष्टभागे तु नैवाङ्गणमहान्तरम् ।
अश्वलीलार्थकं वाथ गजलीलार्थकं तु तत् ॥ १२७ ॥
तत्रैव तुङ्गकूटं स्यान्निर्ऋतौ नृपमन्दिरम् ।
खर्जूरिं तद्बहिर्भागे तद्बाह्यैर्योषितां गृहम् ॥ १२८ ॥
वरुणे नृपवा(मं ? सं)स्याद् योषितां सङ्करालयम् ।

जलक्रीडा सभा वाथ मालिका वासमन्दिरम् ॥ १२९ ॥
वायुभागे तु वापी स्याद् विहाराश्रमभूमिकम्।
सोमभागे तुलाभारं हेमगर्भं तु तत्परे ॥ १३० ॥
ईशदेशे शिवा सर्वं युक्त्या तत्र प्रयोजयेत् ।
तद्बहिर्नगरं वाथ शिबिकं पूर्ववत् क्रमात् ॥ १३१ ॥
एतत्सौबलमित्युक्तं नाम्ना राजेन्द्रमन्दिरम् ।
अथ राज्ञां प्रतिभवनं वक्ष्ये वै(शे ?)केन संक्षिप्य ॥ १३२ ॥
आत्तविशालायामे तत्रोभयचण्डिते तु मध्य(प?ग)ते ।
ब्रह्मासनमथवास्मिन्नभिषेकार्हसभासु मण्टपकम् ॥
तदपरभागे भवनं तेन सहैवैषुसप्तनवतलकम् ।
पृष्ठे तद्द्विकपार्श्वे चाङ्गणयुक्ता खलूरिकांशेन ॥ ॥ १३४ ॥
भोजनभोज्यालयका नृपतेर्वाञ्छावशादबहिः ।
तत्प्रागुत्तरकोणे मज्जनशाला च देवगृहम् ॥ १३५ ॥
पुरतोऽङ्गणमुरुविपुलायामोपेतं नवांशेन ।
प्रागिव तत्र खलूरी कर्तव्या मध्यदेशयुता ॥ १३६ ॥
द्वारं द्वित्रितलाढ्यं तस्मिन् भेरी निधातव्या ।
मण्डपमुखमिह भवनं पार्श्वे पोतस्य पार्श्वकर्तव्या ॥ १३७ ॥
................यद्यद्द्वारे प्रयोगिके नृपतेः ।
त्रिद्विकपार्श्वेऽङ्गणके गोलादीनां हि द्वारस्था ॥ १३८ ॥
प्रागुत्तरदिशि कोणे भवनं स्यान्मूलकोशगृहम् ।
तदपरभागे वस्त्रप्रभृतीनामालयस्थलं कुर्यात् ॥ १३९ ॥
द्वारस्योत्तरपार्श्वे पानीयोष्णोदकालयं कुर्यात्।

(कुर्याद्) वचनालयकं सर्वद्रव्यालयं तु तत्रैव ॥ १४० ॥
द्वारस्य दक्षिणदिशि (त)त्रादिवासकं कुर्यात् ।
तद्दक्षिणदिशि गन्धप्रभृतीनामालयं कुर्यात् ॥ १४१ ॥
प्राग्दक्षिणतटकोणे भवनं स्यान्मूलकोशगृहम् ।
राक्षसभागे तत (तु?)तत्पश्चिमभागे द्विपेन्द्रमन्दिरकम् ॥
तत्परदाक्षिणकोणे शैवस्थानं सरत्नहेमगृहम् ।
तत्प्रत्यगुदक्कोणे दानाध्ययनार्थकालयं कुर्यात् ॥ १४३ ॥
प्रायःप्रयोगद्वारं....शते तु नीचं तत ।
द्वारस्यो(द ? भ)यपार्श्वे सारद्रव्यालयं तु कूटगृहम् १४४
तत्रैव हस्तिशाला सर्वौषधिशस्त्रशाला स्यात् ।
अन्यत्सर्वं नृपते(रिच्छावशतः) प्रकर्तव्यम् ॥ १४५ ॥

अथ नृपेशगृहं च मुखाङ्गणं परियुतं हि भवेन्मुखमण्डपम् ।
अपिच भोगगृहं तु निवारणं नृपतिवाञ्छतिगृहा ++++(?) ॥
तद्दक्षिणतः पार्श्वे द्विष्पट्पदके महाङ्गणं (दीह्यव?दिव्यम्)।
तस्मिन् पश्चिमभागे मण्डपमथ मालिका वाथ ॥ १४७ ॥
शाला तदुभ (वप?यपार्श्वे) अभितः स्नानं च म(ण्डपं च)स्यात् ।
अङ्गणकदक्षिणके सर्वद्रव्यालयान्तमेव स्यात् ॥
वेशनपरिकामीन्द्रकात्कूटशालाविचित्रितं पुरतः(?) ॥ १४८? ॥
पुरतो भवनाङ्गणयोरद्विकपार्श्वभागतः परितः (?) ।
अपरो स्त्रीवासावासाङ्गणकं मालिकाभिधापङ्क्तिः ॥ १४९? ॥
भवनस्योत्तरपार्श्वे तत्र महिष्यालयं तु तत्तुङ्गः ।
भागं तत्रिकपार्श्वे राज्ञां स्त्रीणां च मा(ग्रह?लिका)पङ्क्तिः ॥

तत्रैव कन्यकानां वासं वसुधात्र कुब्जकादीनाम् ।
एकद्वित्रिभिरंशैर्दक्षिणतश्चोत्तरक्रमशः ॥ १५१½ ॥
तत्रोद्यानविशालं सालं कुर्यात् तु तत्र बहिरेव ।
तत्रैवोत्तरभागे यत्र युता सम्मता जलक्रीडा ॥ १५२½ ॥
तत्र च सलिलावासं(स्याद्) नृपतेर्दीर्घिका चैव।
अपरे नृपतेश्च गृहं स्त्रीणां स्यादेव सङ्करा शाला ॥
प्रागुत्तरदिशि बाह्ये नव स्वेष्टदेवताश्च गृहम् ।
तत्राग्रायणशाला पुष्पोद्याना(दी?)नि (च?) कूपं स्यात् ॥
प्राच्यां तु महाङ्गणकं त्रिंशद्भागैर्विधातव्यम् ।
समहेन्द्रद्वारं तत् त्रितलं वा गोपुरं चतुःस्थलकम् ॥
....जासरस्वतीसद्मान्तान्येतानि द्वारदक्षिणतः ।
अभ्यन्तरमुखयुक्तान्येद्वितयत्रेखभौमानि(?) ॥ १५६½ ॥
तत्प्राचि शङ्खभेरिप्रभृतीनामालयं तु स्यात् ।
तद्दक्षिणतो दभ्रं महानसं सर्वरक्षयुतम् ॥ १५७½ ॥
अङ्गणदक्षिणभागे द्वारं स्यादेव द्वित्रितलसहितम् ।
द्वारस्योभयपार्श्वे लेखकयोस्तत खल्लूरी स्यात् ॥ १५८½ ॥
अङ्गणकोत्तरपार्श्वे कर्तव्या चैव (द्वनृकाच ?) सभा ।
दक्षिणमुखगतसहिता सर्वविचित्रा मनोहरा तुङ्गा ॥
तदपरभागेपू....शस्तानन्तु गीतकादिसहाः(?) ।
अन्यत्सर्वं नृपतेरिच्छावशतः प्रकर्तव्यम् ॥ १६०½ ॥
वेश्मावधूविहिततुङ्गविशालमूलं
(स्या ? सा)लं शिलाभिरथ चेष्टकया (प्रयोज्यम्) ।

तद्बाह्यतः परिघयान्वितमिष्टकाद्यै-
र्युक्तं+++मिति वेश्मवरं हि नाम्ना ॥ १६१३ ॥

आवाहनोद्वाहनतोयकर्दमै-
र्झषैर्जलूकाभिरनेकसर्पकैः ।
पद्मारिभूकण्टकमत्स्यकच्छपैः
(कुली)रशङ्खैः परिघा समन्विता ॥ १६२३ ॥

वासाग्निनालम्बनकुड्यसंयुता
जलैर्लताभिः परिपूर्णपत्रिका ।
अभ्यन्तरप्रार्थनतोन्नतान्विता
चित्रान्विताभि(त्तिर)नेकयन्त्रकम् ॥ १६३३ ॥

एवं दुर्गे राजवे (श्मन्य ? श्मानि) कुर्याद्
बाह्येऽबाह्येऽभ्यन्तरे तत्क्रमेण ।
सर्वे रक्षा भूपतीनां जनानां
तस्मात् त (स्या ? स्मा) द् बाह्यतः षड्बलं तत् ॥

स्थानीयमाहुतं वै(व?)परमं यात्रामणिस्तथा विजयः ।
नगरं चतुर्विधं हि प्रोक्तं तज्ज्ञैर्नरेन्द्राणाम् ॥ १६५३ ॥

तत्कुलमूलनृपेशैर्जनपदमध्येऽभ्रंस्थितस्थानम् ।
सतृणजलोर्वीगर्भं नगरं स्थानीयमिति कथितम् ॥ १६६३ ॥

प्रभुमन्त्रोत्साहा(ख्यै)र्युक्तं शक्तित्रयवरावनिपैः ।
तृणभूजलगर्भयुतं नद्यावारह्ययुक्तं च(?) ॥ १६७३ ॥

नन्यान्नजजातुरत्नच्छागम्मत्युच्यते परैर्नगरम् (?) ।
आरभ्यापकयुक्तं सतृणं संग्रामयात्रके विहितम् ॥ १६८३ ॥

संग्रामं तदभीष्टं विजयं युक्त्याणितयद्गर्भम् (?) ।
गर्भत्रयैरुपेतं विजयमिति प्रोच्यते प्राज्ञैः ॥ १६९ ॥

महति वेश्म(नि) वान्वितकार्मुकैर्भवनमत्र विगृह्य ततः परम् ॥
परिवृतं सकलं हि यथापुरा भवति शेषमशेषबला(र्ध?र्थद)म् ॥

त्रिहस्ताद्य (ण्ड?ष्ट) हस्तादिवृद्ध्या पञ्चान्तरङ्गिका ।
पञ्चैव भक्तयस्ताभिर्हस्तिशाला विधीयते ॥ १७१ ॥

षण्णवेति चतुस्सप्तत्रिपञ्चैरिति कीर्तिताः ।
भक्तयस्त्रिविधा शाला विस्तारायामतः क्रमात् ॥ १७२ ॥

अल्पत्वे तु महत्त्वे तु यथा योग्यं तथाचरेत् ।
मुखशालैश्च भक्त्या तु मध्ये विस्तारनिर्गता ॥ १७३ ॥

शयनस्थानकं भक्त्या दक्षिणे प्रविधीयते ।
राजादनो मधूकश्च खदिरः खादिरस्तथा ॥ १७४ ॥

तिन्त्रिणी चार्जुनी चैव स्तम्बकं पिशितः शमी ।
क्षीरिणी पद्मकाद्यास्ते शालास्तम्भा गतास्य च(?) ॥ १७५ ॥

सप्ताष्टनवहस्तोच्चमवगाहादुप+या ।
विस्तारस्तु विशात्वास्यादवगाहो यथाबलम्(?) ॥ १७६ ॥

शालास्तम्भा इमे प्रोक्ता विटपाभशिखान्वितम् ।
सुवृत्ते हस्तिनः स्तम्भस्त्वेकहस्तविशालतः ॥ १७७ ॥

त्रिपा(द्यो?दो)च्चार्धहस्तो वा विस्तारं त्रिविधं स्मृतम् ।
चन्द्रभागेऽष्टभागेन हीनाग्रस्तारकान्वितम् ॥ १७८ ॥

शालाव्यासे तु पञ्चांशं नीत्वा पृष्ठे त्रियंशकम् ।
आपादं षोडशांशे तु वामेऽष्टांशान्यपोहतम् ॥ १७९ ॥

स्थापयेत्तु तदालानान् पूर्वोक्तांश्च समान्वितम् ।
अनुपादार्धमानेन भित्त्युत्सेधो विधीयते ॥ १८०३ ॥
तदूर्ध्वे कटकच्छाद्यं घाटनोद्घाटनक्षमम् ।
वितस्तिर्गोस्तनं पश्चात् स्थापयेद् बहिराननम् ॥ १८१३ ॥
कारयेद्धस्तमानेन फलकाप्रस्तरं तलम् ।
शिलाभिर्वेष्टकाभिर्वा प्रस्तरं नैव कारयेत् ॥ १८२३ ॥
मूत्रद्वारयुतं लब्धद्वारयुक्त्या क्रमान्वितम् ।
अन्यत्सर्वं यथायुक्ति तथा कुर्याद् विचक्षणः ॥ १८३३ ॥
नवाष्टसप्तषट्पञ्चहस्ते पञ्चविसारिणि ।
त्र्यभक्त्याद्यैकविंशद्भक्त्यान्तायाममीरितम् ॥ १८४३ ॥
चतुर्मुखचतुश्शाला सप्रग्रीवाश्च सालकाः ।
दशद्वादशहस्तैर्वा स्तम्भव्यासं प्रकीर्तितम् ॥ १८५३ ॥
त्रिचतुःपञ्चषड्ढस्तैः कुड्योत्सेधं विधीयते ।
अभिन्नानां तु भिन्नानां भित्तिबन्धं यथेष्टतः ॥ १८६३ ॥
नेत्रभित्तौ च पृष्ठे च जालकं स्याद् गृहे गृहे ।
गृहान्ते कर्णधारा स्या(त्त?)त्तदर्भा वयोचिताः(?)
अयुग्मवंशविस्तीर्णाः फलकैः प्रस्तरं तलम् ।
मूत्रच्छिद्रसमायुक्तं सारदारुमयैर्दृढम् ॥ १८८३ ॥
प्रत्येकं तुरगस्थानमेकभित्तिस्ववेशनम् ।
सारदारुमयं कीलं द्विसप्ताङ्गुलदैर्घ्यकम् ॥ १८९३ ॥
द्वित्र्यङ्गुलं तु विस्तारं सूचिकाग्रसमान्वितम् ।
पश्चाद् बन्धोऽग्रबन्धे तु योजयेद् दृढखातवत् ॥ १९०३ ॥

मयूरवानरादीनामालयं शुकपञ्जरम् ।
चित्रं गोयुग्मगोवत्सपानधान्यघनालयम् ॥ १९१½ ॥
वस्त्ररत्नायुधद्यूतकर्मान्तावरणालयम् ।
दानभोजनशाला च यागशाला सदक्षिणा ॥ १९२½ ॥
दक्षिणं पञ्जरावासं यथास्थानं प्रयोजयेत् ।
उद्याने चापि वास्थाने स्थानमण्डपमिष्यते ॥ १९३½ ॥
कूटागारं तु वा वृत्तशालायां वृषभस्य तु ॥ १९४ ॥

उत्तुङ्गकुड्या नृपमन्त्रशाला
पूर्वापरव्यामयुता मनोज्ञा ।
सभा च वा चावृतकुड्यहीना-
तिदूरतः प्रेक्षणकर्मयोग्या ॥ १९५ ॥

कूटाकारं तु वा तस्मिस्ततः पश्चिमतो दिशि ।
राज्ञां सिंहासनं युक्त्या प्राङ्मुखं कल्पिते यथा ॥१९६॥
तत्पूर्वदक्षिणे भागे मन्त्रिणां चासनं भवेत् ।
दूतस्य प्रागुदग्भागे प्रशस्तासनमुत्तरे ॥ १९७ ॥
सेनापतेस्तद्दक्षिण्ये सर्वं नालिसमान्तरम् ।
पञ्चान्देकाङ्गलीकामनोज्ञामन्त्रनलिनका(?) ॥ १९८ ॥
मन्त्रेणैकेन सुषिरा मुकुलाग्रद्वयान्विता ।
व्यासायामे तु पञ्चांशषडंशैकांशद्व्यंशकैः ॥ १९९ ॥
मध्येङ्गणं तदावृत्तं स्तनमात्रोच्चभित्तिकम् ।
वृत्तोपलं तु तन्मध्ये प्रागुदग्जलपात्रकम् ॥ २०० ॥
केशक्षालनपर्यङ्कं तद्दक्षिणगतं भवेत् ।

प्रागुदग्द्वारसंयुक्ता तथा मण्डपमालिका ॥ २०१ ॥
प्रासाधिकासनं मित्रे सुदृशां स्थानमण्डपम् ।
पञ्चादि पञ्च (पा ? मा)न्तं वा व्यासं तत्रोजसंख्यया ॥
सभामण्डपशालानां सामान्यमिष्टदैर्घ्यकम् ।
पञ्चादशकरव्यासं त्रिसप्तारत्निदैर्घ्यकम् ॥ २०३ ॥
सैकद्वादशहस्तान्तं चूल्यन्तादिमनोहरम् ।
शालाभिषेकयोग्या सा कर्तव्या प्रागिवानना ॥ २०४ ॥
तदङ्गमध्यमे रङ्गसंयुक्ता च सभा भवेत् ।
मण्डपं दक्षिणे राज्ञां तदुदीच्यां दिशि क्रमात् ॥ २०५ ॥
पद्माभिषेकसंवासं धामं तत्र प्रयोजयेत् ।
पञ्चसप्तनवारत्निव्यासतार(त्थि ? द्वि)वैदिकम् ॥ २०६ ॥
त्रिचतुष्पञ्चभागं वा वेदिकोदयमीरितम् ।
वेदिकोदयपादोच्चं स्वव्याससममिष्यते ॥ २०७ ॥
अन्तःस्तंभसमायुक्तं त्यक्तमध्यस्थपादकम् ।
द्विषड्भिरष्टमात्रं तु त्रिष्षडङ्घ्रिविशालकम् ॥ २०८ ॥
एकभक्त्यावृतं तत्र जालं तद्वद्वहिष्प्रभम् ।
तुलाभारार्हकं कूटं मण्डपं वा प्रभा भवेत् ॥ २०९ ॥
त्रिहस्तं तोरणस्तम्भं दैर्घ्यं वासं दशाङ्गुलम् ।
नवाष्टसप्तमात्रं वा पृष्ठभागशिखान्वितम् ॥ २१० ॥
वस्तुमध्ये निधातव्यं दक्षिणोत्तरगं यथा ।
तोरणान्तरमुत्सेधं सममेव विधीयते ॥ २११ ॥
नि।विष्टविष्टकं मध्यवक्रतुण्डसमन्वितम् ।

पूर्वापरायतं भर्तृतुलान्तादचलं चरेत् ॥ २१२ ॥

तुलान्तरकराराणां महाराजस्य योग्यताम् ।
कीलितं वितलं मध्ये कुण्डलं सारदारुजम् ॥ २१३ ॥
योजयेद् वक्रतुण्डेन यथाबलसमन्वितम् ।
त्यक्त्वा तु षण्मुखात् षण्डादेवं तु फलकासनम् ॥२१४॥
तत्समाङ्गमितालिम्बी शृङ्खलाबलसंयुतम् ।
वक्रतुण्डद्वयं द्विद्विभूतं यत्नेन योजयेत् ॥ २१५ ॥
वस्तुनश्च चतुर्दिक्षु प्राङ्मुखस्य च तोरणम् ।
स्तम्भं विष्टं तुलामात्रं कुर्यात् साराङ्घ्रिपैः शुभैः ॥ २१६ ॥
वस्तुमध्यगतं बाह्ये परितस्तत्प्रभा भवेत् ।
तत्समं वरिवश्चापि(?) तद्बाह्ये योजयेद् बुधः ॥ २१७ ॥
औदुम्बरवटाश्वत्थन्यग्रोधास्तोरणं भवेत् ।
पीतं रक्तं तथा श्वेतं नीलं कुर्याद् ध्वजं क्रमात् ॥ २१८ ॥

तुलासमं तत् समुपेत्य भूपतेः
सुखं समास्तामभरेन्द्रदिङ्मुखम् ।
समीक्ष्य राशिं निजहेमसञ्चयं
विराजनावर्धनदो यथा भुवि ॥ २१९ ॥

हेमगर्भयुतं सप्तनवरत्नापभित्तिकम् ।
व्यासेन चतुरश्रा सा व्यासतुल्योच्छ्रिता तलात् ॥२२०॥
दशद्वादशमात्रैर्वा स्तम्भव्यासं प्रकीर्तितम् ।
वृत्तो वा चतुरश्रो वा चावगाहेद् यथाबलम् ॥ २२१ ॥

त्रिहस्तावृतभित्तिः स्याद् दण्डोत्सेधं स्त्ववेदिका ।
स्तम्भाग्रस्थोऽन्तराविष्टद्व्यष्टद्वयविभूषिता ॥ २२२ ॥
लुपारूढाग्रविस्तारं समोत्सेधाः प्रशंसिताः ।
सप्तहस्तद्विहस्तादिव्यासोत्सेधेन वेदिका ॥ २२३ ॥
पञ्चहस्तद्विहस्तेन व्यासोत्सेधेन वा भवेत् ।
सभामध्ये निधातव्यं तन्मध्ये च वटक्रिया ॥ २२४ ॥
बहिर्जालककुड्यं स्यात् तद्बाह्ये च प्रभा भवेत् ।
सभा नीव्रसमुत्सेधो विशाला दण्डमानतः ॥ २२५ ॥
त्रयोविंशतिहस्तेन तद्बहिः परिघा भवेत् ।
चतुर्दिक्षु चतुर्द्वारं तोरणं क्षीरपादपैः ॥ २२६ ॥
सोपानं योग्यदेशे तु चतुर्दिशि विधीयते ।
द्वारतुल्योन्नतव्यासं निर्गमद्वारतोरणम् ॥ २२७ ॥
स्तम्भाग्रस्तोरणाविष्टकंसादिष्वष्टमङ्गलम् ।
चक्रवर्तिशिखोपेता द्वारे द्वारे प्रयोजयेत् ॥ २२८ ॥
चित्रान्वितपताकाश्च भेरीश्रीकुम्भदीपिकाः ।
नन्द्यावर्तेन चाष्टौ तु सर्वेषामष्टमङ्गलम् ॥ २२९ ॥
द्वारद्वयोच्छ्रितं शालारक्ष्यवासं यथाबलम् ।
तद्बहिर्जनचारेण बाह्या रक्षा प्रकीर्तिता ॥ २३० ॥
राजेच्छया कुमार्या तद्देव्या कुल्याविमानकम् ।
मालिकान्ते च भूमा वा योजनीया मनोभवा ॥ २३१ ॥

यत्रोचितं नृपतिचित्तवशाद् विमानं
सारालिभोगभवनं च निवारणं च ।

कुड्यं गजाश्वनिलयं युवतीनिवासं
कर्तव्यमाद्यनिखिलं नगरं च युक्त्या ॥ २३२॥

इति मयमते वस्तुशास्त्रे राजवेश्मविधानो नाम

एकोनत्रिंशोऽध्यायः ।

अथ त्रिंशोऽध्यायः ।

द्विजनृपवणिजां वा सद्मनां शूद्रकाणा-
मभिमुखविनिवेशद्वारतारं च तुङ्गम् ।
पृथगथ निजभेदं मण्डनं चापि नाम्ना
सुखमनुगतबुद्धिर्वस्तुवाक्यं मुनीनाम् ॥ १ ॥

त्रिवितस्तिविशालं स्याद् दैर्घ्यं सप्तवितस्तिकम् ।
विस्तारायामतस्तस्मात् षड्द्वादशकराग्रजे ॥ २ ॥

वृद्धया त्रिपञ्चसैकेषु षड्वितरत्यन्तकानिभिः(?)।
पञ्चविंशतिमानानि द्वारतारोदयानि हि ॥ ३ ॥

तदाद्यशयनीयस्य गृहस्य द्वादशैव हि ।
समावृतखल्लूरीणां तानि चोक्तानि पण्डितैः ॥ ४ ॥

नगरग्रामदुर्गाणां द्वादशोक्तानि वेश्मनाम् ।
विस्तारद्विगुणोत्सेधं षण्मात्रं साधिकं भवेत् ॥ ५ ॥

नवमात्राधिकं वाथ सर्वेषां समुदीरितम् ।
सषण्मात्रद्विभागं च सत्रिमात्राद्वितालकम् ॥ ६ ॥

द्वितलं क्षुद्रमानं च त्रिविधं परिपठ्यते ।
स्वव्यासद्विगुणोत्सेधं षण्मात्रं वा द्विमात्रकम् ॥ ७ ॥
अधिकं शुभदं चारं विप्रादीनां गृहे मतम् ।
स्तम्भायामाष्टभागे तु षष्ठांशं तु तत+ति ॥ ८ ॥
नीचमध्येत्यपि द्वारं भूमौ भूमौ विधीयते ।
व्यासद्विगुणतुङ्गं तु नेष्टतारं नृणां गृहे ॥ ९ ॥
स्तम्भायामाष्टभागेन तुङ्गद्वारं सुरालये ।
नन्दपङ्क्त्यंशहीनं वा विस्तारं स्यात् तदर्धतः ॥ १० ॥
++++वशाद् भूमौ भूमावत्र विधीयते ।
विपादपादविस्तारा सार्धो वा योगविस्तरा ॥ ११ ॥
स्तम्भव्याससमो वापि तदर्थवलयद्रूनम्(?) ।
त्रिपादं चोत्तराधस्ता+++न्तस्य वाजनम् ॥ १२ ॥
त्रिचतुष्पञ्चषड्भागे भागेन स्तम्भवैपुलम् ।
कवाटबहलं प्रोक्तं देवद्विजमहीभृताम् ॥ १३ ॥
द्विकवाटविशेषेण एक एव प्रकीर्तितः ।
सामन्तप्रमुखादीनां द्विकवाटं प्रशस्यते ॥ १४ ॥
सार्धवेदेषुपातालनन्दरुद्रकरान्विता ।
उच्चानि तानि तल्पानि वेश्माभ्यन्तरतोलीन्द्रः(?)॥ १५ ॥
गुल्फार्धविमलार्धं तु किञ्चिच्चीत्रं यथाबलम् ।
वेश्माभ्यन्तरतल्पोच्चे त्रिचतुष्पञ्चभागिके ॥ १६ ॥
द्वित्रिवेदांशतुङ्गं तत्सरदपंपूर्ववर्तींति(?) ।
युग्मे महत्तरेऽल्पे च दक्षिणस्थे कवाटके ॥ १७ ॥

विपुले चायते तस्मिंस्त्र्यंशे पञ्चांशकेतुके ।
उपरिष्टादधस्तात्तु पार्श्वयोस्त्र्यंशमंशकम् ॥ १८ ॥
त्यक्त्वा शेषं प्रवेशेन यदावारं तदुच्यते ।
यथाबलं यथाशोभमधःपट्टैर्दृढीकृतम् ॥ १९ ॥
मध्ये महत्तरे हीने योग्यव्यासकलान्वितम् ।
त्रिचतुःपञ्चषण्मात्रं व्यासार्धं द्वित्रियंशकम् ॥ २० ॥
सत्रिपादत्रिभागैकनभाजनविकासमम्(?) ।
बाहुली दशमात्रा स्याद्धस्तिहस्ताद्विशालि वा ॥ २१ ॥
वितस्तीनां विधातव्यं नेत्रं यामुद्रपाणिवत्(?) ।
अयुग्मफलकं ग्राह्यं मध्यसन्धिविवर्जितम् ॥ २२ ॥
तल्पस्य भेषणी चैते मध्यं त्यक्त्वा समाहिते ।
कवाटयुगलोपेते यथाबलमभेषणी ॥ २३ ॥
अथ तल्पघनस्यान्यघनाद् द्विगुणविस्तृता ।
दण्डत्रिपञ्चसप्तैव नवैकादशसंख्यया ॥ २४ ॥
अश्वस्कन्धनखा हस्तेऽश्वत्थपत्राग्रसन्निभा ।
स्वस्तिकाभास्तु घटिका मिर्णका वाथवा मता ॥ २५ ॥
श्रीमुखैर्वामदण्डैश्च पिञ्जरीगलकार्गलैः ।
क्षेपणैः सर्पपत्रैश्च गुच्छगैर्वनकैस्तथा ॥ २६ ॥
गुल्फैरन्तर्गतैर्ग्रास्यैर्वालाभैर्मध्यकुण्डलैः ।
विषाणपरिघाक्षुद्रदण्डैर्युक्तं कवाटकम् ॥ २७ ॥
इन्द्रनीलसमोपेतं सर्वचित्रमनोहरम् ।
अघवासान्यलोहैश्च युक्त्या तत्र दृढीकृतम् ॥ २८ ॥

गुल्फैः सार्धैर्ललाटैश्च शृङ्गायोमयपत्रकैः ।
बध्नीयात् सर्वयत्नेन यथाशोभं यथाबलम् ॥ २९ ॥
मुकुलानन्तरं पत्रत्रिनेत्रा सूचिकायता ।
योगोदयत्रिभागैकनिखातं वा यथाबलम् ॥ ३० ॥
तल्पतीव्रस(ना?मा) तीव्रद्विगुणं द्वित्रिकान्वितम् ।
पद्मपत्रविचित्राणि पट्टाङ्गस्कन्धपट्टिका ॥ ३१ ॥
प्रवेशदाक्षिणे तल्पे स्थापितव्या मनोहरा ।
सार्गला दक्षिणं योगं वामे योगं सतल्पकम् ॥ ३२ ॥
विदध्याद् वामहस्तेन तल्पं दक्षिणपाणिना ।
घटिकां रोपयेद् विद्वान् युग्मे युग्मे करेण तु ॥ ३३ ॥
घाटनोद्घाटने तल्पे स्वस्वनन्दांशपूजिते ।
भेरीसमानशब्दं च हस्तिसिंहस्वरोपमम् ॥ ३४ ॥
वीणावेणुस्वरं चैव शस्तं कन्धरगर्जितम् ।
क्रोशनं कूजनं सर्वमन्यच्चापि विनिन्दितम् ॥ ३५ ॥
अधस्तादुपरिष्टात्तु प्रशस्तं घाटनं समम् ।
सच्छिद्रान्त्यार्गलत्वं च योगार्गलविघट्टनम् ॥ ३६ ॥
बन्धुक्षयकरं शत्रुपीडनोपद्रवं सदा ।
स्वयमेव पिधानं यत् स्वयमापवृतं तु तद् ॥ ३७ ॥
तद् द्वारं बन्धुनाशाय संपदं संपदां पदम् ।
वृक्षकर्णावधःस्थूणकूपवृद्धं तथैव च ॥ ३८ ॥
देवायतनविद्धं च विधिविद्धं तथैव च ।
वल्मीकभस्मविद्धं च सिरामर्मादिविद्धकम् ॥ ३९ ॥

विषणाडीसमानं च फणयोः पद्ममेव च ।
स्थूलभावावनं रक्षाद्वारं तद्(तु?)लसितं वरैः ॥ ४० ॥
गमनागमने गजोपरिष्टाद् द्विजधातावरणास्पृशाचा(?) ।
क्षयदं नृपतेर्हितं तु यत्सिपदेऽवनतं विवेशतः (?) ॥
फुल्लप्रवेशने भूपः सुचिरं जीवितं ध्रुवम् ।
पराज्याधिपत्यं च क्षीणत्वं चैव याति सः ॥ ४२ ॥
मध्यद्वारं तु देवानां द्विजानामवनीभृताम् ।
शेषाणामपि सर्वेषामुपमध्यं विधीयते ॥ ४३ ॥
द्वात्रिंशद्देवतांशेषु तेषु माहेन्द्रके पदे ।
राक्षसे पुष्पदन्ते च भल्लाटे च चतुर्ष्वपि ॥ ४४ ॥
तद्दिगीशानमाश्रित्य द्वारं कुर्यात् सुशोभनम् ।
अन्तर्द्वारबहिर्द्वारमेवं युञ्जीत बुद्धिमान् ॥ ४५ ॥
शेषद्वाराणि सर्वाणि सर्वदोषप्रदानि हि ।
ब्राह्मणोऽभिमुखं ब्रह्मापरावृत्तिर्निषिध्यते ॥ ४६ ॥
किमनेन प्रलापेन द्वारमन्यद् विगर्हितम् ।
विशालं व्यक्ततारं स्याद् व्यत्यस्तं रोगदायि तत् (?) ॥
विवृते संवृते कार्ये स्थापिते स्थितिमद् भवेत् ।
उपरिष्टादधस्ताच्च व्यासायामं समं शुभम् ॥ ४८ ॥
अतिदूरे सशब्दत्वमथ धावकधावनम् ।
दोषदं सततं पत्युर्विपदामास्पदं भवेत् ॥ ४९ ॥
जयन्ते वितथे चैव सुग्रीवे मुख्यके पदे ।
जलद्वारं प्रयोक्तव्यं क्रमादन्यद् विवर्जितम् ॥ ५० ॥

पर्जन्ये भृशमार्गे तु पूष्णि भागे नृपे तथा ।
दौवारिके तु रोगांशे नागेऽदितिपदे क्रमात् ॥ ५१ ॥
उपद्वारं प्रयोक्तव्यं तत्सुरुङ्गमिति स्मृतम् ।
एकद्वितलसंयुक्तं बहुरक्षासमन्वितम् ॥ ५२ ॥
पादाधिष्ठानयोर्मानं नीत्वा शेषं यदुन्नतम् ।
तच्चु तन्त्रोपपीठोच्चे पूर्वोक्तद्वारतुङ्गकम् ॥ ५३ ॥
पुरतो वर्णकं गुह्यं सोपानं तल्पसंयुतम् ।
द्वारगोपुरगम्भीरं गृही योगं निधापयेत् ॥ ५४ ॥
सीमां सालं च सीमान्तं वेश्मादीनामुदीरितम् ।
इदानीं द्वारशोभादिगोपुरान्तं तु विस्तृतम् ॥ ५५ ॥
दैर्घ्यमुत्तुङ्गमानं तु संक्षेपाद् वक्ष्यते क्रमात् ।
पञ्चसप्तत्रित्रिधैकादशत्रयोदशमानतः ॥ ५६ ॥
प्रथमावरणे द्वारशोभाव्यासास्तु पञ्चधा ।
त्रिपञ्चाद्यात्रयोविंशद्वारशाला करान्तकम् ॥ ५७ ॥
पञ्चविंशत्कराद् यावत् त्रयस्त्रिंशत्करान्तकम् ।
द्वारगोपुरविस्तारं पञ्चैव परिगीयते ॥ ५८ ॥
विस्तारत्रितयो द्व्यंशं पादमर्धं द्विपादकम् ।
तत्समं वाधिकं तेषामायामाः स्युः पृथक् पृथक् ॥ ५९ ॥
उत्तुङ्गं तु तथैवेष्टमथवोन्नतमिष्यते ।
पञ्चांशेभ्यश्च सप्तांशे सप्तांशेभ्यो दशांशके ॥ ६० ॥
स्वव्यासादधिकोत्सेधान् पूर्वोक्तानामुदीरितम् ।
वक्ष्यते द्वारशोभादिपञ्चाख्यालङ्कृतिक्रिया ॥ ६१ ॥

द्विचतुष्कषडायामं नालीगेहं तदर्धतः।
शेषं तु भित्तिविष्कम्भं मध्ये द्वारं प्रयोजयेत् ॥ ६२ ॥
त्रिवर्गमण्डपाकारं नाम्ना (भा ? तत्) श्रीकरं भवेत्।
तदेव परितो भक्त्या महाद्वारसमन्वितम् ॥ ६३ ॥
संवृतं विवृतं वापि लाङ्गलाकारभित्तिकम्।
द्वारोपरिष्टात् सोपानं प्रस्तलस्तुलसंवृतम् ॥ ६४ ॥
सकलं दुस्तकं कोष्ठं काननं मुखपट्टिका।
मध्यपादसमायुक्तं नासिका मध्यमे भवेत् ॥ ६५ ॥
महाद्वारेऽष्टनासं स्या(द्व ? द्वा)मे तच्छीतमिष्यते।
तदैककरं कोष्ठं काननं मुखपट्टिका ॥ ६६ ॥
श्रीभद्रमेतदुद्दिष्टं नाम्ना सर्वेषु पूजितम्।
एकभूमि त्रिधा प्रोक्तं द्वितलं वक्ष्यतेऽधुना ॥ ६७ ॥
चतुष्षड्विस्तृतायामद्वारतारं विशिष्यते।
एकत्रिभागिकैवासायामं तालीगृहं तथा ॥ ६८ ॥
अर्धांशं परितः कुड्यं बहिर्वारमथांशकम्।
तदर्धं तद्बहिः कुर्यात् त्र्यंशगोपानमञ्चकम् ॥ ६९ ॥
सोपानपीठमधिष्ठानं स्तम्भादिपरिमण्डितम्।
महावानेऽष्टनास्यङ्गं श्रीकरं कोष्कृताकृति ॥ ७० ॥
मुखेऽमुखे महानासद्विभागविस्तृतान्विता।
सभद्रं वा विभद्रं वा भद्रं पादसमन्वितम् ॥ ७१ ॥
प्रादक्षिण्येन सोपानं महावाराधिरोहणम्।
नाम्नेदं रतिकान्तं स्यात् सर्वेषां रतिवर्धनम् ॥ ७२ ॥

तदेव शिखरं दभ्रचतुर्णासिसमन्वितम् ।
यत् कान्तविजयं नाम्ना सर्वेषां कान्तिवर्धनम् ॥ ७३ ॥
प्रहीणशिखराकारं हारोपेतं तदेव हि ।
द्वारे परीतनास्यङ्गमेतन्नाम्ना सुमङ्गलम् ॥ ७४ ॥
एतद् द्वितलकं प्रोक्तं त्रितलं वक्ष्यतेऽधुना ।
चतुष्पङ्क्तिविस्तृतायामं द्वारतारं विशिष्यताम् ॥ ७५ ॥
द्वारस्य पार्श्वयोर्व्यासावंशेनांशेन योजितौ ।
तत्तत्परिवृतं कुड्यमर्धांशेन विधीयते ॥ ७६ ॥
द्वारे न परितो वारं द्विकं चैवात्र नासिकम् ।
गेहद्वयं सगोपानं हारोपेतमुपर्यपि ॥ ७७ ॥
वास्तलं च तयोर्मध्ये द्वारतारं विधीयते ।
द्वारहर्म्यमिदं नाम्ना मर्दलं राजमन्दिरम् ॥ ७८ ॥
षट्पङ्क्तिविस्तृतायामं द्वारतारं विधीयते ।
द्वारस्य पार्श्वयोर्व्यासमेकैकांशेन योजितम् ॥ ७९ ॥
तत्तत्परिवृतं कुड्यमर्धभागेन सम्मतम् ।
बहिः परिवृतं वारमेकैकांशेन योजयेत् ॥ ८० ॥
जलस्थलितयोर्मध्ये द्वारतारं विधीयते ।
बहिष्टात् परितो वारं भागेनैव समन्वितम् ॥ ८१ ॥
व्यासावृतं महांशारं प्रत्येकं चेष्टनासिकम् ।
प्रहीणशिखराकारं हारोपेतमुपर्यपि ॥ ८२ ॥
नासिका बाह्यपादे तु द्विसप्त परिकीर्तितम् ।
द्वारसोपानमार्गं च युक्त्या तत्र प्रयोजयेत् ॥ ८३ ॥

मात्रखण्डमिदं नाम्ना राज्ञामेतज्जयावहम् ।
व्यासायामे दशाष्टांशे द्वारतारं विशिष्यताम् ॥ ८४ ॥
नालीगृहे द्विभागेन परितोऽन्धारमंशकम् ।
अंशेन परितोऽलिन्द्रं हारं भागेन योजयेत् ॥ ८५ ॥
द्विभागं कूटविस्तारं शालायामं षडंशकम् ।
विस्तारे चतुरंशेन कोष्ठकायाममिष्यते ॥ ८६ ॥
हारा भागेन कर्तव्या चूलहर्म्यसमन्विता ।
जलस्थलं तदेवाहुः कूटशालान्तरेऽपि वा ॥ ८७ ॥
एवमादितलं प्रोक्तं द्वितले भागमुच्यते ।
पूर्ववन्नालिगेहं च गृहपिण्डिहरद्रकम् (?) ॥ ८८ ॥
अर्धेन परितः पिण्डिगोपानप्रस्तरान्वितम् ।
उपरिष्टान्महावारमष्टनासिसमन्वितम् ॥ ८९ ॥
शिखरं कोष्ठकाकारमायामार्धेन विस्तरम् ।
मुखेऽमुखे महानासिविभागविस्तृतान्वितम् ॥ ९० ॥
उपर्युपरि वेशं च युक्त्या मध्याङ्घ्रिसंयुतम् ।
प्रादक्षिण्येन सोपानमुपर्युपरि योजयेत् ॥ ९१ ॥
सोपपीठमधिष्ठानं स्तम्भादिपरिमण्डितम् ।
ऊहप्रत्यूहसंयुक्तं नाम्नेदं श्रीनिकेतनम् ॥ ९२ ॥
त्रितलं त्रिविधं प्रोक्तं शुद्धमिश्रतयान्वितम् ।
नानावातायनोपेतमन्तस्सालेषु सम्मतम् ॥ ९३ ॥
अधुना सप्तभौमादि चतुर्भूमांतमिष्यते ।
द्विसप्ताष्टांशके व्यासाद् द्वारे द्वारं विशिष्यताम् ॥ ९४ ॥

नालिगेहं द्विषड्भागं व्यासायामसभित्तिकम् ।
परितो द्व्यंशमानेनालीन्द्रं कुर्याच्चतुष्टयम् ॥ ९५ ॥
हाराचतुष्टयं कुर्यादर्धांशेन समन्ततः ।
तद्बहिस्त्वेकभागेन परितोऽलीन्द्रमिष्यते ॥ ९६ ॥
हाराभागं तु भागेन गृहपिण्डिस्तदर्धता ।
हाराभागेन कर्तव्यं पार्श्वयोः पञ्जरस्य तु ॥ ९७ ॥
सप्रत्यङ्गसहामूलं भूमाभूममुपर्यपि ।
त्रितले खण्डहर्म्यादिमण्डितं वा स्थलान्वितम् ॥ ९८ ॥
उपर्युपरि च ग्रीवा महावारचतुष्टयम् ।
उपर्युपरि युक्त्याङ्घ्रिं योजयेद् द्वारमप्युभे ॥ ९९ ॥
अयुग्मस्तूपिकोपेतं शिरसाम्याङ्गपट्टिका ।
तोरणे जालकं क्षुद्रनीडैः सम्यग्विचित्रितम् ॥ १०० ॥
तले तले महावारे युक्त्या नास्यङ्गसंयुतम् ।
द्वारस्योभयपार्श्वे तु कूटशालान्तरे ततः ॥ १०१ ॥
उपपीठादिरोहार्थं सोपानं चारमिष्यते ।
सोपानाङ्गणकूटस्य त्रिखण्डं शृङ्गमण्डलम् ॥ १०२ ॥
उपर्युपरिसोपानं युक्त्या तत्र प्रयोजयेत् ।
भद्रकल्याणमित्युक्तं नाम्नेदं द्वारगोपुरम् ॥ १०३ ॥
तदेव शिखरे मध्ये नासिका पार्श्वयोर्द्वयोः ।
मुखेऽमुखे तु नास्यङ्गयुक्तं तस्य सुभद्रकम् ॥ १०४ ॥
द्व्यंशं वारितलं गर्भे गेहं तत्पार्श्वयोर्द्वयोः ।
द्विभागं चतुरश्राभं चतुर्नास्यङ्गसौष्टिकम् (?) ॥ १०५ ॥

भद्रसुन्दरमित्युक्तं नाम्ना तत्तंतमेव हि (?) ।
द्विरष्टद्विनवांशेन व्यासे पार्श्वेन योजयेत् ॥ १०६ ॥
स्वव्यासांशं चतुर्भागेऽप्यधिकं स्यात् तदायतम् ।
शेषं युक्त्या प्रकर्तव्यं शुद्धमिश्रतयान्वितम् ॥
एवं सप्ततलं ज्ञात्वा नाम्ना तत् त्रिविधं भवेत् ।
तदेवाधःस्थलं त्यक्त्वा षट्तलं यत्क्रमेण तु ॥ १०८ ॥
सुबलं सुकुमारं च सुन्दरं चेतिकीर्तितम् ।
द्विसप्तविस्तारायामे द्वारतारं विशिष्यताम् ॥ १०९ ॥
गृहपिण्डिं च गेहं च पूर्ववत् परिकल्पयेत् ।
हारालीन्द्रं तु पञ्चार्धार्धांशेन परितः क्रमात् ॥ ११० ॥
अलीन्द्रं बाह्यभित्तिं च भागेनांशेन योजयेत् ।
अङ्गणे साष्टिकद्व्यंशं शालायामं षडंशकम् ॥ १११ ॥
जलस्थलं त्रिभागेन कूटशालान्तरे विदुः ।
विस्तारे वा स्थलद्व्यंशं महावारत्रयान्वितम् ॥ ११२ ॥
शेषं पूर्ववदुद्दिष्टं पञ्चभूमं यथाक्रमम् ।
श्रीच्छन्दं श्रीविशालं च विजयं चेति कीर्तितम् ॥११३॥
नाम्नेदं त्रिविधं प्रोक्तं नानावयवशोभितम् ।
तदेव व्यासं व्यायामे द्व्यंशेन परिवर्जितम् ॥ ११४ ॥
महावारद्वयोपेतं कूटकोष्ठं च पूर्ववत् ।
ललितं चैव कल्याणं कोमलं च त्रिधा मतम् ॥ ११५ ॥
नाम्ना चतुस्तलं चैव ग्रामादीनां च वेश्मनाम् ।
त्रिद्व्येकालीन्द्रयुक्तं वा सप्तभौमादिषु त्रिषु ॥ ११६ ॥

शेषं कुड्ये प्रयोक्तव्यं त्रित्रिकैरपि कारयेत् ।
यथाबलं यथाशोभं तथा मण्डनमण्डितम् ॥ ११७ ॥
स्तम्भायामं विशालं च प्रस्तरं पूर्ववद् भवेत् ।
ऊर्ध्वे भूमेरधो भूमेरवधिः प्रथयिष्यते ॥ ११८ ॥
प्रवेशदक्षिणे गर्भमारूढे भित्तिके भवेत् ॥ ११८½ ॥

एकादिसप्तान्ततलानि युक्त्या
त्रिसप्तभेदानि हितानि नाम्ना ।
प्रोक्तानि विप्रादिचतुष्टयानां
मयेन वेशायतनानि वासे ॥ ११९½ ॥
आद्यत्रयं सकलवर्णहितं तदैवै-
श्वर्योपयुक्तमनुजेषु विधीयते हि ।
ग्रामाग्रहारपुरपत्तनके द्वितीयं सर्वं
नृपेशभवनाविहितं सुराणाम् ॥ १२०½ ॥

इति मयमते वस्तुशास्त्रे द्वारविधानो नाम
त्रिंशोऽध्यायः ।

अथैकत्रिंशोऽध्यायः ।

अथ वक्ष्ये यानानां शयनानां लक्षणं क्रमशः ।
शिबिका च रथं यानं पर्यङ्कादीनि शयनानि ॥ १ ॥
अथ शयने तज्जातान्यपि पीठाद्यासनानि ततः ।
पीठेति(च) शिखरेति मौण्डीति मया त्रिधा मता शिबिका ॥
व्यासायामसमस्ता भेदाः सत्र्यंशशिखरिभित्तिवशात् ।
व्यासायामोत्सेधान्यधुना वक्ष्ये पृथक् पृथक् तासाम् ॥ ३ ॥

व्यासं त्रिवितस्ति स्यादायामं पञ्चकैर्वितस्तिः स्यात् ।
अधमं त्रिवितस्ति स्यान्मध्यं तस्मादङ्गुलाधिक्यम् ॥ ४ ।
तस्मात् त्र्यङ्गुलमधिकमुत्तममेतत्तु कथ्यते मुनिभिः ।
विपुलाध्यर्धायामं स्वस्वव्यासं च कर्णमात्रं वा ॥ ५ ॥
व्यासार्धं भित्त्युच्चं शेषं तस्मात् त्र्यङ्गुललक्षणम् (?) ।
मध्यममधमं तस्मात् त्र्यङ्गुलहीनं त्रिधोत्तुङ्गम् ॥ ६ ॥
व्यासायामोच्चवशात् त्रिविधोक्ता पैण्डिका शिबिका ।
सैकत्रिंशतिमात्रैः सप्तत्रिंशत् सपञ्चकं त्रिंशत् ॥ ७ ॥
मात्रैरथवा विपुलं दैर्घ्योच्चं पूर्वमेव तत् कार्यम् ।
उत्कृष्टमध्यमाधमविपुलं पञ्चार्धयुगलमिति मात्रैः ॥ ८ ॥
निजविपुलार्धोत्सेधात् कर्तव्यं सम्यगीष्कायामा (?) ।
पञ्चचतुस्त्र्यङ्गुलिभिर्विपुलं सार्धं तु तत्तीव्रम् ॥ ९ ॥
सक्षुद्रपट्टिका(थ ?)वा यानावनिमाञ्जकं प्रयुतम् ।
द्व्यर्धं द्विमात्रसार्धैकाङ्गुलयुक्तत्रिहस्तं स्यात् ॥ १० ॥
व्यासं त्रिपादमर्धं तयोस्तु मध्यं च तत्तुङ्गम् ।
गोलार्धाकृतिकं वा छत्राभं वाथ वेत्रभेदनिभम् ॥ ११ ॥
हस्तेषिकयोर्मध्ये षड्भागैः कम्पकानि चत्वारि ।
सार्धद्व्यङ्गुलविपुलं द्व्यङ्गुलमर्धार्धमात्रविस्तारम् ॥ १२ ॥
अर्धं त्रिपादाङ्गुलकमुत्सेधं ह्येव कम्पकानां तु ।
अधरोर्ध्वे चैकांशाङ्गुलिकं फलकादिरपि युक्तम् ॥
मध्यमकम्पं त्यक्त्वा युक्तिवशान्मध्यभित्तिमाने तु ।
मध्ये द्व्यंशे फलका नरनारीचक्रवाकशोभयुतम् ॥ १४ ॥

वल्लीचतुष्पदाद्यैः संयुक्ता नाटकादिकैरपि च ।
हस्ताधिकयोर्मध्ये व्यालस्थानं विधीयतेऽग्रे तु ॥ १५ ॥
स्वव्यासकर्णमात्रमुदितं निर्गमनमुष्टिबन्धं स्यात् ।
तदधो ह्रस्वाङ्घ्रियुतं तदधोभागेन तुङ्गमेव स्यात् ॥
तत्समनिर्गमयुक्तं स्वव्यासार्धं तु कम्पकं पुरतः ।
नक्रमुखेन तु युक्तं लोहैनैवाथवेभदन्तेन ॥ १७ ॥
भक्तय(?)विपुला दैर्घ्यंशरसप्तकनन्दकाख्यदशरुद्राः ।
कम्पव्यासघनाभ्यां स्तम्भव्यासं तु बाहल्यम् ॥ १८ ॥
दैर्घ्याधिकाग्रमूले कर्तव्या युक्तिबलवशात् (तु) शिखा ।
आत्तविशालं धृत्वेधितयोर्मूले तदग्रे च ॥ १९ ॥
पञ्च चतुष्टयमात्रं निर्गमनं पद्मचित्रयुतम् ।
तद्गमलाग्रहहस्तं + तमानिं वा समानकर्णं वा ॥ २० ॥
हत्वेधितोपरिष्टाद् विपुलं कम्पं च वा फलकम् ।
एकाहिशनसमोच्चं शोभार्थं वा फलार्थं स्यात् ॥
तत्रैव ह्रस्वपादैर्गुलिकाभिः शोभितं तदुक्त्यापि ।
अथवा मुखतो द्वारं पञ्चैत्रांशं गुणांशकं वा तु ॥ २२ ॥
त्रिचतुर्मात्रविशालं षट्सप्ताष्टाङ्गुलोत्सेधम् ।
पादं य(कु ? द्) भक्तं तदवलम्बं भैरिकं सुवृत्तं च ॥ २३ ॥
गुल्फायामसुपट्टैर्मतिभिः पट्टैस्तु कीलकं कुर्यात् ।
एवं प्रोक्ता शिबिका वैठीकानापि चित्राङ्गा ॥ २४ ॥
स्वव्याससमेन तत्सेधः स्वव्यासार्धं त्रिभागभिच्चिश्च ।
पादसमेता शिखरोपेता सा शेखरीति संयुक्ता ॥ २५ ॥

मौण्डी मुण्डाकारा शिखराभिर्येव भित्तिसंयुक्ता ।
व्याससमोत्सेधयुता मण्डपमवमण्डपादिताभिमता ॥ २६॥

पद्माध्यतत्तुमानं तासां सम्यक् प्रयोक्तव्यम् ।
शार्कालस्तिमिश + + पनसो निम्बार्जुनौ मधूकश्च ॥ २७॥

याने शयने चैते प्रोक्ता वृक्षाः पुराणैस्तु ।
[श्रीनतसुखमधिरुह्य यान्तं श्रीमत्तत्प्रकटनिजात्मनस्य ॥

तद्यानं तदपि शिबिकालक्षणयुक्तं तत्संपदं सदध्या ।

इति शिबिकाध्यायविधिः ।?]

द्विचक्रवाह्ये विस्तारं षट्सप्ताष्टवितस्तियुक् ॥ २९ ॥

चक्रनाभिद्वयं नाभिच्छायामोक्षान्तरस्य तु ।
द्वारबाह्यं च तावत् स्याद् विस्तारार्धाधिकायतम् ॥

चतुस्त्रिद्व्यङ्गुलोत्सेधं बाहल्यं पञ्चभारकम् ।
त्रिसप्तनवधा तत्र व्यासोत्सेधाश्च पूर्ववत् ॥ ३१ ॥

आयामानुगतं तिर्यक् कुल्यकम्पं दृढीकृतम् ।
मध्यभारोपरि तुलामध्यनिर्गमनाग्रतः ॥ ३२ ॥

ललाटं तु त्रिहस्तादि तदग्रं कुटिलाकृति ।
मध्यभार इति प्रोक्तं कूपरो युगभागभाक् ॥ ३३ ॥

भारोपर्यङ्गुलघनफलकाप्रस्तरो भवेत् ।
अक्षमक्षोत्तरं चक्रभद्रभारोपयानकम् ॥ ३४ ॥

उत्सेधं पञ्चषट्सप्तबाहल्यं द्वित्रिमात्रकम् ।
अष्टादशाङ्गुलं दैर्घ्यं पार्श्वे भागोपयानकम् ॥ ३५ ॥

पोतिकाकारसंयुक्तं मयपट्टैर्दृढीकृतम् ।
अक्षोर्ध्वोत्तरबाहुल्यतुल्यच्छिद्रात्ममध्यमम् ॥ ३६ ॥
तदधस्त्वक्षरक्षार्थं पार्श्वयोर्बन्धनं भवेत ।
उपधानविधानं तु तुल्यव्यासार्धतीव्रकम् ॥ ३७ ॥
अक्षस्यावधि दैर्घ्यं स्याद् दारु चेत् चतुरश्रकम् ।
अयःपट्टैश्च कीलैश्च स्वशिखाभिर्दृढीकृतम् ॥ ३८ ॥
सार्धबद्धकरं पादोत्सेधचक्रार्धमिष्यते ।
अक्षान्तरसमं चक्रं विस्तारं परिकीर्तितम् ॥ ३९ ॥
नाभिर्दशाङ्गुलोत्सेधा वितस्त्यायामविस्तृतम् ।
तत्पट्टनाभिमध्ये तु द्वात्रिंशद्वा त्रिरष्टकम् ॥ ४० ॥
अष्टाष्टकं तु वा तत्र युक्त्या संख्यासमन्वितम् ।
अकारवर्णमूलाग्रत्र्यङ्गुलं सार्धमात्रकम् ॥ ४१ ॥
मूले षण्णवमाकारं मूलेऽग्रे शिखयान्वितम् ।
रोहारोहघने चैव अक्षोत्तारं तथा बकम् ॥ ४२ ॥
भारस्योदयपट्टैश्च कीलकैः पट्टबन्धकैः ।
योग्यं च द्व्यंशपादांशैरयःपट्टैश्च बन्धयेत् ॥ ४३ ॥
तत्स्थाने चोपपीठे च गुह्यं युक्तिवशान्नयेत् ।
अक्षान्तेऽक्षोत्तरबन्धे दारुकीलैः प्रयोजयेत् ॥ ४४ ॥
पादोत्सेधद्विभागैकं भागं स्याच्चूलिकोच्छ्रयम् ।
अग्रे पार्श्वे तले वा तु गलिका पट्टिकान्तरे ॥ ४५ ॥
पृष्ठे पञ्चाङ्गुलोत्सेधं मुखपट्टिकयावृतम् ।
अन्तरे कर्णत्रातस्य मुकुलाग्रोत्तरान्तिका ॥ ४६ ॥

भारो भारोपधानं च अक्षमक्षोत्तरं तथा ।
कूबरः कूबरस्याग्रे ह्रयपट्टैश्च कीलकैः ॥ ४७ ॥
तत्तद्योगैश्च तत्स्थाने बन्धयेश्चाभवेदपि(?) ।
अक्षमक्षोत्तरं मध्ये दारुकीलं प्रयोजयेत् ॥ ४८ ॥
सर्वराजाधिपत्यैश्च राजयुद्धैर्महोत्सवैः ।
मङ्गले देवपूजायां सोमयागं तथैव च ॥ ४९ ॥
इत्येव कर्मणादिष्टं रथारोहणमिष्यते ।
वासद्वित्रिगुणायामं वक्रं तत्तत्समन्वितम् ॥ ५० ॥
सप्ततालं तु वा दैर्घ्यं त्रिचतुर्मात्रविस्तृतम् ।
स्वस्वपादवशात् तत्र पूर्वं चाधरतो दिशि ॥ ५१ ॥
हारोपर्यन्तरोपेतं ह्रस्वपादोत्तरान्वितम् ।
चतुष्षष्टिकसंख्याभिः स्तम्भयुक्तसमन्वितम् ॥ ५२ ॥
षट्सार्धपञ्चपञ्चैव तालेन चरणोदयम् ।
सप्ततालं तुलादैर्घ्यं त्रिचतुर्मात्रविस्तरम् ॥ ५३ ॥
स्वस्वपादवशात् तत्र पूर्ववच्चोत्तरादिकम् ।
एकद्वित्रितलोपेतमेकं वाथ चतुर्मुखम् ॥ ५४ ॥
मण्डपाकारसंयुक्तं शालाकारशिरःक्रियम् ।
त्रिचतुष्पञ्चषट्सप्तहस्तचक्रान्तमिष्यते ॥ ५५ ॥
चक्रोत्सेधं चतुष्पञ्चषट्क+वेष्टतीव्रकम् ।
अक्षमक्षोत्तरं चैव वारो वा यानकं यथा ॥ ५६ ॥
अष्टाष्ट(द्वि?वि)पुलोत्तुङ्गैर्दारुकीलैर्दृढीकृतम् ।
एकद्वित्रितलोपेतैः प्रासादवदलङ्कृतम् ॥ ५७ ॥

षोडशस्तम्भसंयुक्तं दिग्दिक्षु मुखभद्रकम् ।
सर्वालङ्कारसंयुक्तं रङ्गं तद्योजयेद् दृढम् ॥ ५८ ॥
तथैव शिल्पिमानीय योजनीयं विचक्षणैः ॥ ५८½ ॥

पादुकं मिथुनांशकपद्मकं
लेखिते चरणांशकमूर्तिकम् ।
(तु? ति)र्यगादिकृतपट्टिककल्पितं
पद्मबोधिरसकुड्मलमेव च ॥ ५९½ ॥

+त्रिपादकरनन्दवर्गकैर्द्विप्रभागमिति गण्यमिष्यते ॥ ६० ॥
पद्मं तु पट्टीसहकर्णप्रस्तरं व्यालं तु नक्रक्रममेव शोभितम् ।
कर्णांशपद्मं जगति प्रतिष्ठां नराप्रवेशं कुमुदं तु भागम् ॥ ६१ ॥
वस्वंशकर्णं गुणभागपट्टी शिवांशवेदी सकलं धरातलम् ।
शरण्यपद्मं च तु कर्णवेदिका वर्णेन वेदी गलपक्षमंशम् ॥ ६२ ॥
प्रस्तरांशमुनिदेवसानकं नाट्यताल उपधानकल्पितम् ॥ ६२½ ॥

इति मयमते वस्तुशास्त्रे यानाधिकारो नाम

एकत्रिंशोऽध्यायः ।

अथ द्वात्रिंशोऽध्यायः ।

त्रिवितस्तिकृतव्यासं पञ्चवितस्त्यायतं च शयनं स्यात् ।
विस्तारायामाभ्यां त्रिःपञ्चममात्रमाधिकं ज्येष्ठम् ॥ १ ॥
चतुरङ्गुलेन पञ्चाङ्गुल्यैर्वा व्यासयुक्तमिषिकायाः ।
व्यासार्धं बाहल्यं व्यासत्र्यंशेन मध्यपट्टं स्यात् ॥ २ ॥

व्यासत्रिचतुर्भागं वाहल्यं चैषिकायास्तु ।
पृष्ठललाटेऽधिकयोर्निर्गमनं व्यास एव कर्णे वा ॥ ३ ॥
पार्श्वेऽधिकाग्रमूले मध्याशिखा वा यथाबलं कुर्यात् ।
एवं निर्गमनं स्यात् पादाधिकयोर्यथाबलं कुर्यात् ॥ ४ ॥
शेषकपादो गमनं सार्धवितस्तिर्वितस्तिरथ हीनम् ।
स्वोद्गमचतुरंशो वा त्र्यंशो वा पादमेव विष्कम्भम् ॥ ५ ॥
पादशयने हि हिता ऋजुपादव्याघ्रपादमृगपादाः ।
ह्रस्वेऽधिकसिद्धशिखास्वयनामासदशप्रकाराः स्युः(?) ॥६॥
फलका पर्यङ्को वा पट्टविचित्रापि वाधिका कार्या ।
शयनविशालव्यासा तुङ्गे वै पादपट्टिकोपेता ॥ ७ ॥
तोरणमूर्ध्वोपमिता कुण्डककीलार्धसार्धवक्रतुण्डा ।
पर्यङ्कशिबिका(का)र्या विजरीविप्रादिप्रोष्टनाकिञ्चित् (?) ॥
पूर्वशिरः पर्यङ्कं दक्षिणमुखयनुवशमपि (?) ।
दक्षिणतःशिरसं वा पश्चिममुखमन्यदिङ् नेष्टम् ॥ ९ ॥
व्याघ्रमृगपादशयनं द्विजनृपयोः शेषयोस्तु भृशशेषम् ।
नवसप्तपञ्चविंशत्यङ्गुलविस्तारतः समोत्सेधम् ॥ १० ॥
उत्कृष्टमध्यमाधमासनमृजुपादं शयनवत् कार्यम् ।
समचतुरश्रं पीठं (व्या ? ह्या)सनमिति सायतं प्रोक्तम् ॥
अष्टांशाधिकदैर्घ्यं द्विगुणायतमेव विशालं तु ।
सिंहेभभूतवृषयुग् देवानां विप्रनृपयोस्तु ॥ १२ ॥
सिंहेभयुक्तमेवं त(त्त)न्नाम्नाभिधानं स्यात् ।
सोत्तरमब्जकपोतं लिङ्गान्तरिताभिर्युक्तम् (?) ॥ १३ ॥

नानाचित्रविचित्रं द्युसदां राज्ञां च वक्ष्येऽथ ।
उपपीठयुक्तमेतद्युक्तेऽर्थे पद्मबन्धयुतम् ॥ १४ ॥
कर्णे मध्ये मध्ये स्तम्भमृगेन्द्रैर्विचित्रं स्यात् ।
तदुपरि तोरणयुक्तं सविजिकमथ हेमरत्नाढ्यम् ॥ १५ ॥
सिंहासनमिदमुदितं मुनिभिर्यथाबलाङ्गसंयुक्तम् ।
एतद्व्यासं चासनफलकमपि द्विगुणदैर्घ्यकं पादम् ॥ १६ ॥
पञ्चाङ्गुलान्तमुन्नतमुत्सेधार्धं तु वाजनं चोर्ध्वे ।
अपरार्धमुत्तरं स्यात् तावद्व्यासं तदन्तरं घातम् ॥ १७ ॥
व्यासायामे मध्ये पञ्चांशैकांशमायतं च गतः ।
विष्टरमष्टोत्तरमायतनं चोत्तरमन्यथाशोन्तम् (?) ॥ १८ ॥
जात्युत्तमायतव्यावासनशयनी यथा तथा चेष्टा(?) ।
उक्तोत्सेधायामा स्वस्वांशेनैव वर्धिता हीना ॥ १९ ॥
आद्यं षडङ्गुलं स्याद् द्व्यङ्गुलवृद्ध्या करान्तमाना च ।
दशधा विस्तृतमुदितं चतुरङ्गुलविपुलमपि वदन्त्येके ॥
चतुरश्रमायताश्रं वृत्तं विपुलार्धमुत्तुङ्गम् ।
व्यासषडष्टांशं वा हरिच्चरणयुतं सकम्पवाजनकम् ॥२१॥
तदुपरि पद्मदलं स्यात् कर्णिकयालङ्कृतं यथाशोभम् ।
शोभनमिदमिदमुदितं सर्वे देवेषु पूजितं ह्येव ॥ २२ ॥
नानाचित्रसमेतं सुगृहार्चनपीठमेवमिदमुदितम् ।
न्यग्रोधोदुम्बरवटपिप्पलबिल्वामलसारदारुमयम् ॥ २३ ॥
ते सर्वे योग्याः स्युः पीठेऽस्मिन् सर्वसिद्धिकरणीयम् ॥

अष्टघनरश्मिभिरतुर्यगृहवृद्ध्या
भानुदिशि सर्वमहनाद्यक्रुषिहारैः ।

आयव्ययगुह्यसुडच्छुरंशमितिवारै-
यौनशयनविधिरथासनमिदं स्यात् (?) ॥ २४३ ॥

इति मयमते वस्तुशास्त्रे यानशयनाधिकारो नाम
द्वात्रिंशोऽध्यायः।

अथ त्रयस्त्रिंशोऽध्यायः।

निष्कलं सकलं मिश्रं लिङ्गं चेति त्रिधा मतम्।
निष्कलं लिङ्गमित्युक्तं सकलं बेरमुच्यते ॥ १ ॥
मुखलिङ्गं तयोर्मिश्रं लिङ्गार्चाकृतिसन्निभैः।
बिम्बमूर्तिः शरीराभा विश्वमूर्तिस्वरूपकैः ॥ २ ॥
छन्नदेहप्रतिच्छन्दप्रतिमाङ्कैस्तु नामभिः।
दृश्यो देवसमाख्यातो निष्कलं वक्ष्यतेऽधुना ॥ ३ ॥
श्वेता रक्ता च पीता च विप्रादीनां हिता सिता।
एकवर्णा घना स्निग्धा शिला भूमिनिमग्नका ॥ ४ ॥
व्यासायामवती ग्राह्या यौवनातिमनोरमा।
वातातपानलालीढा मृद्वी क्षाराम्बुसंश्रिता ॥ ५ ॥
दुःस्थानस्थानरूक्षा च या कर्मान्तरयोजिता।
रेखाविन्दुकलङ्काढ्या वृद्धा वक्रा च या शिला ॥ ६ ॥
सशर्करा विवर्णा च सत्रासायतनस्थिता।
निःस्वना सदरीभेदा सगर्भा निन्दिता वरैः ॥ ७ ॥
एकवर्णा घना स्निग्धा मूलाग्रादार्जवान्विता।
गजघण्टारवा या सा पुंशिलेति प्रकीर्तिता ॥ ८ ॥

स्थूलमूला कृशाग्रा या कंसंतालसमध्वनिः।
स्त्रीशिला कृशमूलाग्रा स्थूला षण्डेति निःस्वना ॥ ९ ॥
सकलं निष्कलं मिश्रं कुर्यात् पुंशिलया सुधीः।
युञ्जीयात् स्त्रीशिलाः सम्यङ् नारीवेरं च पिण्डिका ॥ १० ॥
षण्डोपलेन कर्तव्यं ब्रह्मकूर्मशिले तथा।
नन्द्यावर्तशिले वापि कर्तव्या तेन चात्मना ॥ ११ ॥
प्रासादतलकुड्यादि कर्म कुर्याद् विचक्षणः।
सा शिला त्रिविधा बाला मध्यमा स्थविरेत्यपि ॥ १२ ॥
टङ्कघातादिमृद्वी या मन्दपक्वेष्टकोपमा।
शिला बाला मता तज्ज्ञैः सर्वकर्मसु निन्दिता ॥ १३ ॥
स्निग्धागम्भीरनिर्घोषा सुगन्धा शीतला मृदुः।
नबिलावयवा तेजःसाहिता यौवना शिला ॥ १४ ॥
मध्यमा सर्वयोग्या स्यात् सर्वकर्मार्थसिद्धिदा।
मत्स्यमण्डूकशकला रूक्षा वृद्धा शिलाशिवा ॥ १५ ॥
रेखाबिन्दुकलङ्काढ्या सा त्याज्या सर्वयत्नतः।
छेदने तक्षणे यत्र मण्डलं दृश्यते यदि ॥ १६ ॥
सा शिला गर्भिणी विद्वांस्तां प्रयत्नेन वर्जयेत्।
मुखमुद्धरणेऽधोंऽशमूर्ध्वभागं शिरो विदुः ॥ १७ ॥
शिलामूलमवाक्प्रत्यगुदग्रं प्रागुदग्दिशि।
अग्रमूर्ध्वमधोमूलं पाषाणस्य स्थितस्य तु ॥ १८ ॥
नैर्ऋत्यैशानदेशाग्रा वह्न्यग्रा वह्निवायुगा।
उत्तरायणमासे तु शुक्लपक्षे शुभोदये ॥ १९ ॥

प्रशस्तपक्षनक्षत्रे मुहूर्ते करणान्विते।
गच्छेल्लिङ्गं समुद्दिश्य वनं चोपवनं गिरिम् ॥ २० ॥
अथवा शुद्धदेशे तु भूमग्नोपलसंयुतम्।
ऐन्द्र्याशायां तु सौम्यायामैशान्यां वा विशेषतः ॥ २१ ॥
निमित्तैः शकुनैर्योग्यैः सह मङ्गलशब्दकैः।
स्थापकः स्थपतिः कर्ता कृतकौतुकमङ्गलः ॥ २२ ॥
स्थापकः स्थपतिश्चैव सितवस्त्रपरिच्छदौ।
श्वेतगन्धानुलेपौ तौ सितवस्त्रोत्तरीयकौ ॥ २३ ॥
सितपुष्पशिरोयुक्तौ प्राप्तपश्चाङ्गभूषणौ।
गन्धैः पुष्पैश्च धूपैश्च मांसेन रुधिरेण च ॥ २४ ॥
पायसोदनमत्स्यैश्च भक्ष्यैश्चापि पृथग्विधैः।
अर्चयेदीप्सितान् वृक्षानुपलान् वनदेवताः ॥ २५ ॥
भूतक्रूरबलिं दत्त्वा कर्मयोग्यां वरेच्छिलाम्।
स्थपतिर्वरवेषाढ्यो मन्त्रयेत् प्राङ्मुखो वरः ॥ २६ ॥

अयं मन्त्रः—

ॐ। अपक्रामन्तु भूतानि देवताश्च सगुह्यकाः।
युष्मभ्यं तु बलिर्भूयात् क्रूराश्च वनदेवताः ॥ २७ ॥
कर्मैतत् साधयिष्यामि क्रियतां वस्तुपर्ययः।
एवमुक्त्वा नमस्कृत्य शिलाश्छेत्तुं समारभेत् ॥ २८ ॥
तत्रैव स्थापको युक्त्या जुहुयात् तदुदग्दिशि।
हेमसूच्यष्टिलाभ्यां तु शोधयेत् प्रथमं पुनः ॥ २९ ॥

तीक्ष्णशस्त्रेण महता यष्टिलेन प्रहारयेत् ।
इष्टायामविशालाभ्यामधिकं ग्राह्य यत्नतः ॥ ३० ॥
चतुरश्रसमं कृत्वा मुखभागं विचिन्त्य च ।
शुद्धिं कृत्वार्चयित्वा तु गन्धाद्यैर्विधिपूर्वकम् ॥ ३१ ॥
लिङ्गं वा पिण्डिकां बेरमौपलं वार्क्षमेव वा ।
वस्त्रैरावेष्टयित्वा तु रथे संस्थाप्य यत्नतः ॥ ३२ ॥
सर्वमङ्गलसंयुक्तमानीयात् कर्ममण्डपे ।
यथोक्तविधिना सम्यक् कुर्यादन्तरितेन च ॥ ३३ ॥
यथोक्तविधिना नैव लभ्यते यदि पिण्डिका ।
गृहीत्वान्यत्र पूर्वोक्तविधिना तदुदग्दिशि ॥ ३४ ॥
नीत्वा तत्र खनित्वा तु शुभऋक्षमुहूर्तके ।
गृहीत्वा विधिवद्धुत्वा शुद्धिं कृत्वाम्भसा ततः ॥ ३५ ॥
गन्धाद्यैरर्चयित्वा तु सर्वमङ्गलघोषणैः ।
आनीयात् कर्म पूर्वत्र दिशि कोष्ठादिमुच्यते ॥ ३६ ॥
लिङ्गमानाद् विमानं वा लिङ्गं वा हर्म्यमानतः ।
गर्भमध्ये च सूत्रात् तु वामेऽर्चालिङ्गमेव वा ॥ ३७ ॥
स्थापयेत् किञ्चिदंशं तु आश्रयित्वा विचक्षणः ।
त्रिःसप्तांशे कृते द्वारे ब्राह्मेंऽशे मध्यमे भवेत् ॥ ३८ ॥
कृत्वा षडंशकं तच्च वामे द्व्यंशं व्यपोह्य च ।
तदंशमग्रं नीत्वा तु प्रागुदग्गतसूत्रकम् ॥ ३९ ॥
तद् ब्रह्मसूत्रमित्युक्तं तत्सूत्रं शिवमध्यमम् ।
गर्भार्धमधमं श्रेष्ठं पञ्चत्रिंशं शिवायतम् ॥ ४० ॥

भवन्ति नव लिङ्गानि तयोर्मध्येऽष्टभाजिते ।
श्रेष्ठमध्यकनिष्ठानि त्रित्रिभेदानि तानि हि ॥ ४१ ॥
नागरे नागरस्योक्तं मानं लिङ्गस्य मन्दिरे ।
विकारांशे तदायामे भूतगङ्गाग्निविस्तरम् ॥ ४२ ॥
जयदं पौष्टिकं सार्वकामिकं नागरे विदुः ।
गर्भे त्रिसप्तभागे तु दशांशं द्राविडेऽधमम् ॥ ४३ ॥
त्रयोदशांशकं श्रेष्ठं गर्भेऽष्टांशे तु पूर्ववत् ।
त्रिःसप्तांशे निजायामे षट्पञ्चचतुरंशकम् ॥ ४४ ॥
जयदादिविशालं तत् पूर्ववद् द्राविडे मतम् ।
वेसरे पञ्चपञ्चांशे गर्भागारे विमानके ॥ ४५ ॥
त्रयोदशांशकं हीनं श्रेष्ठं स्यात् षोडशांशकम् ।
तयोर्मध्येऽष्टभागे तु नव लिङ्गानि पूर्ववत् ॥ ४६ ॥
पञ्चपञ्चांशके दैर्घ्ये वसुधातुरसांशके ।
वेसरस्योदितं व्यासं पूर्ववज्जयदादिकम् ॥ ४७ ॥
विकारपरिधौ भूतव्यासः सर्वत्र कीर्तितः ।
गर्भमानमिदं प्रोक्तं हस्तमानं तु वच्म्यहम् ॥ ४८ ॥
आरभ्यैककरं नन्दहस्तान्तं षट्षडङ्गुलैः ।
वृद्ध्यायतास्त्रयस्त्रिंशत्सङ्ख्या लिङ्गस्य कीर्तिताः ॥ ४९ ॥
पञ्चारत्निविमानाद्या द्वादशक्ष्माद्यसद्मनः ।
क्रमेणैव त्रयस्त्रिंशत्सङ्ख्या तासां विधीयते ॥ ५० ॥
केचित् त्र्यङ्गुलवृद्ध्या तु वदन्त्येकादिहस्ततः ।
आयादिसम्पदामर्थं मानादेकाङ्गुलक्षयात् ॥ ५१ ॥

प्रवृद्ध्योत्तुङ्गमाख्यं तत्र दोषो न विद्यते ।
पञ्चपञ्चाङ्गुलं मूलाद् वृद्ध्याष्टककलाङ्गुलैः ॥ ५२ ॥
वृद्ध्या लिङ्गायतं शस्तं प्रत्येकं नवमानकम् ।
क्षुद्राल्पमध्यमोत्कृष्टहर्म्याणामुदितं क्रमात् ॥ ५३ ॥
द्वारोदयसमं श्रेष्ठं त्रिभागोनं कनिष्ठकम् ।
स्तम्भोत्सेधेनवांशे तु मुनिभूतांशकोदयम् ॥ ५४ ॥
तत्तद्गर्भेऽष्टधा भक्ते नव लिङ्गोदयाः स्मृताः ।
नागरादिषु सौधेषु प्रोक्तव्यासानि पूर्ववत् ॥ ५५ ॥
प्रासादशिखरग्रीवस्तूप्योऽधिष्ठानमानकैः ।
केचिद् वदन्ति मुनयः कुम्भयोन्यादयो वराः ॥ ५६ ॥
ग्रीवोत्सेधस्य मानं तु मानाङ्गुलैर्विभाजयेत् ।
वृद्ध्या हान्याङ्गुलिच्छेदं परिहृत्य विचक्षणः ॥ ५७ ॥
उत्सेधेऽष्टगुणैः सप्तविंशद्भिर्हरणे ततः ।
शेषमश्वयुजाद्यं तु नक्षत्रं तु चतुर्गुणे ॥ ५८ ॥
नवभिर्हरणे शिष्टमंशकं तस्करादिकम् ।
भुक्तिः शक्तिर्धनं राजा षण्डश्चाभयकं विपत् ॥ ५९ ॥
समृद्धिरिति विख्यातान्यंशकानि नव क्रमात् ।
तस्करं च विपत् षण्डं निन्दितं वस्तुपारगैः ॥ ६० ॥
उत्तुङ्गवसुनन्दाग्निगुणैकांशाष्टभिर्हृते ।
शिष्टं धनमृणं चैव योनिकं स्याद् यथाक्रमम् ॥ ६१ ॥
धनाधिकमृणं क्षीणं मानं तत् सम्पदां पदम् ।
योनिषु ध्वजसिंहश्च वृषो हस्ती शुभावहाः ॥ ६२ ॥

तुङ्गं नवगुणं कृत्वा सप्तभिः क्षपयेत् ततः।
